Im Gop. Br. wird das *avarasakthaṃ* sowohl dem Maitrāvaruṇa als dem Brāhmaṇācchaṃsin gegeben, und der *ūru* dem Acchāvāka und dem Potar. *Apāna* [S. 87. Z. 7] muss dieselbe Bedeutung haben wie *vaikartaḥ* Ait. Br. = *prauḍhaḥ*. Die Bedeutung des *prauḍhaḥ* ist auch unbekannt.

I 3. 19. [S. 88. Z. 6] *taṃ vā etaṃ dhīkṣitaṃ santaṃ dīkṣita ity ācakṣate* vgl. Śat. Br. III 2. 2. 30, wo man dieselbe quasi-Etymologie findet.

I 3. 20. *itthaṃ ced vo 'pasamavatsur hanta* [S. 90. Z. 6]. *avatsur* ist korrupt, vielleicht wird gemeint eine augmentierte Form von *samāvartate*. Vielleicht *samāvartsuḥ*? 3 plur. aor.?

Khaṇḍa I 3. 20 ist undeutlich.

I 4. 7. man erwartet *devikāhavīṃsi* statt *devatāhavīṃṣi* [S. 96. Z. 9], denn in I 4. 8. [S. 99. Z. 7] steht *yad devikāhavir-*

bhiś caranti; in Kauṣ. Br. XIX 7 (init.) *devikābhyo havīṃṣi.*

I 4. 7. [S. 96. Z. 9] die Hss. *kāmāddaśātirātram* wschl. *kāmād atirātram.* Diese Worte sind wahrscheinlich Interpolation; das *atirātra* hat hier keine Bedeutung. Aber [S. 99. Z. 10] *atha yad daśātirātram upayanti* zu l. wschl. *yad atirātram upayanti.* Diese Stelle beruht auf I 4. 7. Dann ist die Interpolation sehr alt.

I 4. 14. [S. 105. Z. 2] und I 4. 15. [S. 105. Z. 11] *anakūtyai* habe ich in *anagūrtyai* geändert nach Śat. Br. XII 2. 3. 5.

[S. 105. Z. 7] die Hss. *daśarātrāya mahāvratam mahāvratād udayanīyāyātirātraḥ.* Man muss lesen: *daśarātrān mahāvratam mahāvratād udanīyo 'tirātraḥ.* Die Dative sind durch eine Parallelstelle I 4. 22. [S. 110. Z. 7] verursacht.

I 4. 20. [S. 109. Z. 1] *daśarātram uddhiḥ pṛṣṭhyābhiplavau cakre ' daśarātram uddhiṃ ' pṛṣṭhyābhiplavau cakre ' tantraṃ kurvīta.*

Śat. Br. XII 2. 2. 4. *pṛṣṭhyābhiplavau tantre kurvīta.* Diese Lesart scheint mir weniger gut zu sein, vgl. S. B. E. XLIV S. 149.

[S. 109. Z. 4] *ime prāṇā nānā santa ekodayāccharīram adhivasati.*

Ś. Br. XII 2. 2. 4. *ime prāṇā nānā santa ekotayaḥ samānam ūtiṃ saṃcaranti.*

Die Bedeutung von „*ekoti*" ist zweifelhaft, vgl. S. B. E. XLIV S. 149.

I 5. 1. [S. 113. Z. 4] die Hss. *jyotir gaur āyur gaur āyur jyotir* Śat. Br. XII 2. 2. 12 *jyotir gaur āyuh*; das ist viel besser, denn es ist die Rede von einem *tryahas tryāvṛttiḥ.*

I 5. 3. *grīvā* wird durcheinander im Sing. und Plur. gebraucht.

[S. 115. Z. 11] *trivṛtaṃ hy eva śiro bharati: tvag asthi majjā mastiṣkaṃ.*

Ś. Br. XII 2. 4. 9. *śira evāsya trivṛt' tasmāt tat trividhaṃ bhavati tvag asthi mastiṣkaḥ*. Hat man im Gop. Br. *majjā* auszuscheiden? Sonst hat man ein *caturvidham*.

[S. 116. Z. 6] *pṛṣṭīkuṇḍīlāni* ist nicht im P. W. belegt, vielleicht muss hier mit Śat. Br. *karūkārāṇi* gelesen werden.

Vielleicht ist statt *pṛṣṭī°* *praṣṭi°* zu lesen.

I 5. 3 und 4 enden gedankenlos: *ya evaṃ veda sa vā eṣa saṃvatsaraḥ*.

I 5. 4. [S. 117 Z. 5] die Hss. haben *variṣṭhā*. Ist es nicht besser mit Ś. Br. *varṣīyasī* zu lesen, weil der zweite Finger doch nicht der gröszte ist?

[S. 117. Z. 7] *anayor variṣṭhā*. Ś. Br. *āsāṃ varṣiṣṭhā*.

Im Śat. Br. ist die Reihenfolge besser; denn die *paṅkti* muss an fünfter Stelle kommen, und die *virāj* an vierter. Die *virāj* wird nicht deutlich behandelt; zum zweiten Male spricht Gop. Br. über den *variṣṭhā*-finger; Ś. Br. spricht hier von *annāditamā*.

I 5. 5. stimmt mit Ś. Br. XII 3. 2. 1 überein; *catuḥ* und *pañca* fehlen im Gop. Br.; Ś. Br. hat *rātrayaḥ* statt *ahorātrāṇi* und spricht später von 720 Tagen und Nächten; Gop. Br. spricht von 360 prāṇas.

I 5. 8. [S. 123 Z. 7] zwischen *niṣkrīṇīya* (1e p. opt. med.) und *tasmād etena* u. s. w. ist wahrscheinlich eine Lücke; oder man muss eingreifen und *nirakrīṇāt* lesen.

I 5. 9. Ś. Br. XII 3. 5. 3—11.

Die Reihenfolge weicht im Ś. Br. ab; auch spricht man im Gop. Br. von *gṛhamedha* [S. 124. Z. 9] und *mithunam*; [S. 124. Z. 11] diese fehlen im Ś. Br.

I 5. 10. [S. 125 Z. 2] die Hss. lesen *suśruvuḥ*. Oft werden *ś* und *s* verwechselt. Aber ein Plural ist hier nicht am Platz; auch die Bedeutung von *sru* passt hier nicht, ich lese mit Ś. Br. *śaśrāma*.

I 5. 11. Man findet die Formen: *prātaḥsavanena* [Instr.] *mādhyaṃdine savane* [Loc.] und *tṛtīyasavane* [Loc.] neben einander.

I 5. 12. 13. 14. vgl. Das Vaitāna Sūtra des Atharvaveda, übersetzt von W. Caland, XVII 10.

I 5. 21. Die Legende des *Dadhyañ āṅgirasa* wird nicht im Ś. Br. gefunden; wohl gibt Ś. Br. XII 3. 3. 3 die Aufzählung der siebzehn Silben der fünf heiligen Wörter.

I 5. 23. Nach Gautama ist die Reihenfolge der *haviryajña: agnyādheya*, *agnihotra*, *darśa-* und *paurṇamāsa*, *caturmāsya*, *āgrayaṇeṣṭi*, *nirūḍhapaśubandhu* und *sautrāmaṇī*.

II 1. 2—4 behandelt das *prāśitra* [vgl. Kauṣ. Br. VI 13, 14, Ś. Br. I 7. 4. 5, T. S. II 6. 8. 5, Ait. Br. III 33]. Die Legende ist sehr verschieden behandelt worden; im Ś. Br. und Ait. Br. fragen die Götter *Rudra*, ob er *Prajāpati* strafen wolle. Im T. S. und Gop. Br. rächt sich Rudra, weil er vom Opfer ausgeschlossen worden ist.

II 1. 3. [S. 146. Z. 13] *tad u haika āhuḥ*; diese „*eke*" sind, wie es scheint, die Kauṣītakins, vgl. Kauṣ. Br. VI 14 (init.).

II 1. 7. [S. 150 Z. 2] vgl. Vait. 3. 19—20, Übersetzung von Caland. Nur hs. D. liest *samakṣam*, die andern lesen *samṛkṣam*. Alle Hss. lesen wie Vait. das korrupte *prajāpatiṃ* statt *prajāpatiḥ*.

II 2. 10. ist Kāṭh. XXXIV 17 und 18. Das Kāṭh. ist viel korrupter als Gop. Br.

II 2. 11. [S. 176. Z. 6] M. S. I 9. 8: S. 139 Z. 5 liest *tena vyāvṛtam agacchaṃs te°* statt *te na vyā°*.

II 2. 11 vgl. Vait. XIII 13 (das Vait. übersetzt von Caland).

II 2. 13—14 vgl. Vait. XXIX 7.

II 2. 13. [S. 178 Z. 13] alle Hss. *anitir asi*. vgl. Vait. XX 13, Bemerkung.

II 2. 13. [S. 178. Z. 15] die Hss. lesen *prāvo 'syahnāṃsi*, diese Lesart hat gar keine Bedeutung. T. S. III 5. 2. 3 hat *pravāsi anuvāsi*.

II 3. 8. Gop. Br. (ed. Bibl. Ind.) muss die vierte Zeile (S. 126) von oben als erste Zeile gelesen werden.

II 3. 9. [S. 194. Z. 15] *prājā aśvamāraṃstad* .... Wahrscheinlich muss die Bedeutung dieser Worte sein: „Die Menschen bekamen dann Atem." Vielleicht eine Form von *śvasiti*, aber welche?

II 3. 13. [S. 200. Z. 7 u.s.w.] muss man lesen: *na hy atra nārāśaṃsāḥ sīdanti* oder *na hy anārāśaṃsāḥ sīdanti*?

II 4. 7. vgl. Vait. XXIII 22, Bemerkung.

II 4. 8. [S. 215. Z. 13] *tāṃ yad anupoṣya* vgl. Vait. XXIV 15, Bemerkung.

II 4. 11. [S. 219. Z. 3 und 4] *samabhyavāguḥ* aor. ist hier nicht am Platz. Er ist hierher gekommen durch Ausgleich. Vielleicht muss man *samabhyaveyuḥ* lesen.

[S. 219. Z. 8] *tasmād utthā*, vielleicht *tasmād ukthā?* Ist es eine quasi-Etymologie; *ukthā* aus *utthā* entstanden?

II 4. 13 ist mir nicht deutlich.

II 4. 14. [S. 221. Z. 5] die Hss. *dve saṃśasyaṃsta aindraṃ ca bārhaspatyaṃ caikam aindrābārhaspatyaṃ* (?), vgl. Vait. XXV 8.

II 5. 4. [S. 230. Z. 16] *agāt* ist augmentierter Injunktiv, der in späteren Texten mehr vorkommt.

II 5. 5. [S. 231. Z. 5] Gop. Br. *yathābhyāghāram*. Kauṣ. Br. XVII 8 *yathābhyāgāram*. Die richtige Form ist *yāthābhyākāram*.

II 5. 7. [S. 233. Z. 11] Hs. D. liest richtig *saṃśānāni* wie in Ś. Br. und andern Texten. Garbe hat schon im Vait. XXX 6, wo alle Hss. *saṃśyānāni* haben, diese Form in *saṃśānāni* verändert.

II 5. 8. vgl. Vait. XXVII 6. Es befremdet, dass auch eine Hs. des Gop. Br. *ruheyam* statt *roheyam* [S. 235. Z. 2] liest.

II 6. 2. [S. 245. Z. 15] Ait. Br. VI 20 [S. 173. Z. 1] hat *ye vai te na ṛṣaya pūrve pretās te vai kavayas* statt *ye vai tena* u.s.w.

II 6. 3. [S. 246. Z. 11] Ait. Br. VI 21 [S. 173. Z. 16 und 17] hat *kadvantāḥ* statt *kadvantaḥ*.

II 6. 4. [S. 248. Z. 8] die Hss. *satrāyaṇarūpam*, auch Ait. Br. VI 22. [S. 174. Z. 14]: statt *sattrāyaṇarūpam*.

II 6. 9. [S. 256. Z. 15] *buḍila āśvitarāsyuḥ*. Ait. Br. *bulila āśvatara āśviḥ*.

II 6. 10. [S. 259. Z. 4] vgl. Vait. XXXI 27, wo Caland vorschlägt: *tasmād ṛgmebhya evādhi preṣitavyaṃ ṛgmebhyo 'dhi vaṣaṭkṛtyam* zu lesen.

II 6. 13. [S. 266. Z. 1] alle Hss. wie Ait. Br. *ativāda*; Vaitāna Sūtra und Kauṣ. Br. *atīvāda*.

II 6. 14. Der Anfang ist sehr korrupt.

[S. 268. Z. 15] *tvam indra śarma riṇetīme* ..... und auch Vait. XXXII 30 *tvam indra śarma riṇeti*. Man erwartet doch: *tvam indra śarma riṇā iti*.

II 6. 15. [S. 270. Z. 1] *abhūtodyam*? Ist es ein Wort? Und ist *udya kṛtya* von *vadati*?

Wörter, die nicht im P. W. vorkommen, oder nicht genügend belegt sind.

I 1. 13. [S. 10. Z. 15] *acaritin*, auf dieselbe Weise gebildet wie *sucaritin* (Jaim. Śrautra Sūtra), kommt nicht im P. W. vor, wohl °*carita*.

I 1. 13. [S. 10. Z. 15] *aparāgya*: feindlich gesinnt? (*aparāga* feindliche Gesinnung).

Böhtlingk schlägt vor *aparārdhya*.

I 1. 14. [S. 11. Z. 16 u.s.w.] *saṃdhiti* (nicht belegt).

I 1. 24. [S. 16. Z. 14] *nāmākhyātam* nicht im P. W., wohl *nāmākhyātika* = sich auf das Nomen und das Verbum beziehend.

I 1. 29. [S. 22. Z. 5] *khilaśruti*? Deussen übersetzt: eine ergänzende Schriftstelle.

I 1. 30. [S. 22. Z. 11] *viṣayin* nicht belegt, (*viṣaya* Gebiet Reich).

I 1. 32. [S. 24. Z. 8] *yathāmanas* nicht im P. W.

I 1. 39. [S. 31. Z. 15] *samitsaṃbarhiḥ*. Bedeutet dieses Wort: Brennholz mit Opfergrase?

I 2. 4. [S. 35. Z. 15] *dhāyyā*? Es musz hier der Name eines Kleidungsstücks sein.

I 2. 4. [S. 36. Z. 9] *hā (jihīte)* mit den praep. *prati* + *sam* ist es nicht im P. W. belegt.

I 2. 5. [S. 36. Z. 15] *sthā (tiṣṭhati)* mit den praep. *upa* + *ava* nicht im P. W. belegt.

I 2. 5. [S. 37. Z. 2] *upārāma* ist nicht belegt. Im P. W. findet man nur *upārāma(m)*: das Ausruhen.

I 2. 8. [S. 40. Z. 7] *divyatri* N. eines Ṛṣi.

I 2. 8. [S. 40. Z. 8] *ulavṛkarkṣu*?

I 2. 8. [S. 40. Z. 9] *sarpadaṃṣṭranaḥ* nicht belegt; wohl *sarpadaṃstra*.

I 2. 14. [S. 47. Z. 3] *yam(yacchati)* mit den praep. *upa* + *vyā* nicht im P. W. belegt, wohl *vyā* + *yam* und *upa* + *yam*.

I 2. 14. [S. 47. Z. 11] *ūrma*, auch Vait. XI 5. Die Bedeutung ist unbekannt.

I 2. 15. [S. 48. Z. 6] *avakūti*? vgl. *anākūti*. I 4. 14 [S. 105. Z. 2] 15 [S. 105. Z. 15].

I 2. 18. [S. 52. Z. 7] *romaśamara* vgl. P. W.; *śamara* bedeutet hier vielleicht *vivara*: Öffnung.

I 2. 18. [S. 52. Z. 11] *śravaṇa*. Der Name eines Tieres?

I 2. 21. [S. 58. Z. 13 u.s.w.] *āglā*?
[S. 59. Z. 4] *kāruvidā*?
[S. 59. Z. 4] *āglāgṛdha*?

I 2. 24. [S. 63. Z. 12] alle Hss. haben *udātti*; vielleicht nach Analogie von *vyāpti*, *paryāpti* auch *udāpti* zu lesen; nicht im P. W. belegt.

I 3. 2. [S. 65. Z. 10] *mahāvādyam* nicht im P. W., wohl *mahāvada* (Ait. Br. V 33. 1).

I 3. 3. [S. 66. Z. 13] *vācoyamyam*. Bedeutet es: die Stimme an sich haltend s.v.a. *vācaṃyama* (Ait. Br. V 33. 4)?

I 3. 5. [S. 69. Z. 9] *lup (lumpati)* mit der praep. *prati* nicht im P. W. belegt.

I 3. 7. [S. 72. Z. 3] und I 3. 9. [S. 75. Z. 6], *uccaśas* ist ein korruptes Wort, muss aus dem P. W. entfernt werden.

I 3. 12. Einige Wörter, die nur in den Atharvanischen Texten vorkommen:

gavīḍa [S. 78. Z. 10].

samudvānta [S. 79. Z. 1].

adbhiḥ praty-ā-nī [S. 79. Z. 2].

pitry-upavīta [S. 79. Z. 10].

vgl. Kauś. Sūtra 87. 26. Vait. Sūtra VII 15.

I 3. 18. [S. 87. Z. 7] *apāna?* Der Name eines Körperteiles?

I 3. 19. [S. 89. Z. 5] *annastha.*

[S. 89. Z. 5] *nāmastha.*

I 3. 22. [S. 92. Z. 12] *i (eti)* mit den praep. *apa + aty* nicht im P. W.

I 5. 3. [S. 116. Z. 6] *pṛṣṭīkuṇḍīlāni?*

I 5. 5. [S. 120. Z. 4] *peśaśamara* (?), vgl. I 2. 18. [S. 52. Z. 7] *romaśamara.*

II 1. 12. [S. 152. Z. 5] *sahārambha:* gemeinsam beginnend; keine andere Belegstelle im P. W.

II 1. 15. [S. 153. Z. 6] *ārtija:* durch Weh erzeugt; keine andere Belegstelle im P. W.

II 2. 13. [S. 179. Z. 9] *nābhuḥ?* Die Bedeutung ist mir unbekannt.

II 2. 14. [S. 180. Z. 12] *gā (gāyate)* mit der praep. *apa* nur im Gop. Br. und Vait. XVII 4.

II 3. 6. [S. 193. Z. 1] *manarihan?* Ait. Br. *anarhan.*

II 3. 7. [S. 193. Z. 10] *guṇitas* nicht im P. W. belegt.

II 3. 22. [S. 208. Z. 6] *prativīta* nur im Gop. Br. und Vait. XXII 32.

II 3. 23. [S. 210. Z. 8] *namaga?* nicht im P. W.

II 4. 12. [S. 211. Z. 2] *saṃdhyukṣa*?

II 4. 15. [S. 222. Z. 5] *ekapādinī*? nicht im P. W.; wohl *ekapātinī* = ein Vers, der für sich zu nehmen ist.

II 5. 8. [S. 234. Z. 14] *jap (japati)* mit der praep. *ud*, nicht belegt im P. W.

II 5. 11. [S. 237. Z. 12] *anaikāhika* ist nicht belegt im P.W.

II 6. 11. [S. 260. Z. 6] *antarhasta* nicht im P. W.; wohl *antarhastīna*.

II 6. 12. [S. 262. Z. 3 u.s.w.] *kuya*?

II 6. 13. [S. 266. Z. 2] *virebham* absol. von *rebh + vi*; aber *virebhaih* [S. 270. Z. 3] als Subst. nicht im P. W. belegt.

Einige Bemerkungen über die im Gopatha Brāhmaṇa vorkommenden Mantra.

I 1. 9. [S. 8. Z. 4] *śreṣṭho ha vedas tapaso 'dhi jāto brahmajyānāṃ kṣitaye saṃbhabhūva*. Sāyaṇa liest (Ath. V. ed. Shankar Pandit, Vol. I S. 5 *hṛdaye* statt *kṣitaye*.

I 1. 9. [S. 9. Z. 2] und I 1. 21. [S. 14. Z. 14] *vṛdhat karad ruhan mahat tat*. Bibl. Ind. und Ved. Conc. [S. 899] lesen *guhan* statt *ruhan*.

I 1. 15. [S. 12. Z. 7] *devo vijānan* fehlt im Ved. Conc.

I 1. 20. [S. 14. Z. 10] *janat*. Diese Stelle fehlt im Ved. Conc.

I 1. 22. [S. 15. Z. 11] *yā purastād yujyata 'ṛco akṣare parame vyoman*; diese *ṛk* besteht aus zwei Pratīka A. V. X 8. 10ª und A. V. IX 10. 18ª.

I 1. 39. [S. 30. Z. 6] *āpo garbhaṃ janayantīḥ*. Gop. Br. zitiert A. V. IV 2. 8 in der Paippalāda Rezension; die Śāunaka Rezension hat *āpo vatsaṃ janayantīḥ*.

I 2. 1. [S. 32. Z. 13] *dīkṣito dīrghaśmaśruḥ* ist ein Fragment des Mantra: *kārṣṇaṃ vasāno dīkṣito dīrghaśmaśruḥ* A.V. XI 5. 6ᵇ.

I 2. 9. [S. 41. Z. 13] *antarikṣe pathibhir hrīyamāṇaḥ* (alle

Hss.) oder *hīyamāṇaḥ* (ed. B. Ind.) sic.! Paip. S. I 107. 3: *antarikṣe pathibhir īyamāṇaḥ*.

Gop. Br. liest *apāṃ yoniḥ prathamajā ṛtasya*.

Ṛ. V. liest *āpāṃ sakhā prathamajā ṛtāvā*.

I 2. 9. [S. 42. Z. 3] *candramā apsv antaḥ*; alle Hss. lesen: *candramā apsantaḥ*.

I 2. 17. [S. 50. Z. 14] Die ṛk *srutād yam atrir divam unnināya' divi tvātrir adhārayat*, besteht aus zwei Halbversen A. V. XIII 2. 4[c] und A. V. XIII 2. 12[b]. Vedic Concordance hat fehlerhaft *stutāt* statt *srutāt*; auch A. V. liest *srutāt*.

I 2. 21. [S. 57. Z. 7] Der Mantra (Paip. S. I 95. 3) *agniṃ tvāhur vaiśvānaraṃ' sadanān pradahann agāt* lautet Vait. VI 7 *agniṃ tvāhur vaiśvānaraṃ' sa dahan pradahan nv agāḥ*. Auffallend ist es, dass auch eine Handschrift des Vaitāna Sūtra „*sadanān*" hat.

I 3. 1. [S. 64. Z. 7] Zwei Hss. lesen statt: *devā brahmāṇa āgacchata āgacchata* (vgl. Ved. Conc. S. 499): *devā brahmāṇa āgacchatāgacchata*.

I 3. 22. [S. 92. Z. 7] *retaś ca mānnaṃ ceta ūrdhvam ubhau*. Ved. Conc. S. 830 muss statt „*ūrddhvañcam*" „*ūrdhvam*" gelesen werden.

I 5. 5. [S. 120. Z. 14] *śramād anyatra parivartamānaḥ*; fehlerhaft hat Ved. Conc. S. 938 °*vartamānāḥ*.

I 5. 10. [S. 125. Z. 9] I 5. 21. [S. 133. Z. 18] lesen die Hss. *o śrāvaya* und nicht *oṃ śrāvaya* (wie in der ed. B. Ind.) vgl. Ved. Conc. p. 310.

I 5. 24. [S. 138. Z. 1] *prāyaścittair bheṣajaiḥ saṃstuvantaḥ* nicht wie ed. B. Ind. (Ved. Conc. S. 639) *prāyaścittair bhaiṣajaiḥ saṃstavantaḥ*.

I. 5. 24. [S. 139. Z. 3] *sāmnodgātā chādayann apramattaḥ*, nicht wie ed. B. Ind. (Ved. Conc. S. 1009) *chādayanta pramatta*.

I 5. 24. [S. 139. Z. 6] *sāmnā divy ekaṃ nihitaṃ stuvantaḥ*; nicht wie ed. Bibl. Ind. (Ved. Conc. S. 1009) *nistuvantaḥ*.

I 5. 25. [S. 140. Z. 13] die Hss. *viṣkandham enaṃ visṛtaṃ prajāsu* nicht wie ed. B. Ind. (vgl. Ved. Conc. S. 895) *viskandham enaṃ vidhṛtaṃ prajāsu.*

II 1. 3. [S. 146. Z. 3] *ātmāsy ātmann ātmānam*, vgl. Bemerkung 2 zu Vait. Sūtra III 11 (Caland).

Gop. Br. liest *ātmann* und nicht *ātman*; vgl. Ved. Conc. S. 160.

II 1. 3. [S. 146. Z. 12] *vāṅ ma āsyan.* Ved. Conc. S. 853 hat *vāṅ ma āsan.*

II 1. 4. [S. 147. Z. 13] *pratiṣṭha.* Diese Stelle ist im Ved. Conc. nicht belegt.

II 2. 3. [S. 167. Z. 5] *śakmana ojiṣṭhāya* Gop. Br. und Vait. **13.** 16.

T. S. VI 2. 2. 3 *śakmann ojiṣṭhāya.*

Die Mantra des Gop. Br. II 2. 3 und Vait. **13.** 16 stimmen überein; nur hat Gop. Br. [S. 167. Z. 9] *anabhiśastenyam* und Vait. *anabhiśastiḥ.*

II 2. 3. [S. 167. Z. 7] *devānām ojaḥ* ist im Ved. Conc. nicht belegt.

II 2. 3.]S. 167. Z. 8] *abhiśastipā* fehlt im Ved. Conc.

II 2. 4. [S. 168. Z. 5] Gop. Br. und Vait. haben dieselbe Lesung: *āpyāyayāsmānt sakhīnt sanyā medhayā prajayā dhanena.* Ved. Conc. S. 175.

II 2. 9. [S. 174. Z. 7] Gop. Br. und Vait. haben: *dhenā bṛhaspateḥ patnī* statt *dhenā bṛhaspateḥ.*

II 2. 12. [S. 177. Z. 13] *yas te drapsa skandati* wird in II 4. 7 als *drapsavatyaḥ* angedeutet.

II 2. 13. [S. 178. Z. 15] *prāvo 'sy ahnāṃsi* ist korrupt, T. S. III 5. 2. 3 hat *pravāsi anuvāsi.*

II 2. 13. [S. 179. Z. 1] Gop. Br. Vait. XII 17, Kauś. S. XVII 7 lesen *suditir asi.* Hs. B. aber liest wie T. S. IV 4. 1. 2 und P. Br. I 9. 11. *sudītir asi.*

II 2. 3. [S. 179. Z. 7] *abhijid asi.* Diese Stelle fehlt im V. C.

II 2. 14. [S. 180. Z. 5] *ṛgbhir evobhayato 'tharvāṅgirobhir guptābhir guptai stuta.*

II 2. 14. [S. 180. Z. 6] *yajurbhir evobhayato 'tharvāṅgirobhir guptābhir guptai stuta.*

II 2. 14. [S. 180. Z. 8] *sāmabhir evobhayato 'tharvāṅgirobhir guptābhir guptai stuta.*

Diese drei Mantra findet man nur im Gop. Br.

II 2. 17. [S. 182. Z. 14] *juṣṭo vāce bhūyāsam.* Gop. Br. Āśv. Ś. Vait. Kauś. S. haben *vāce*, die anderen Texte *vāco.*

II 2. 22. [S. 187. Z. 5] *yuvo rathe adhvaro devavītaye*; so auch A. V. VII 58. 1[c] (nicht wie Ved. Conc. S. 793 *adhvaraṃ*) Ait. Br. VI. 12. 7 und R. V. VI 68. 10[c] lesen *adhvaram.*

II 3. 5. [S. 192. Z. 4] *pratiṣṭhāmi pratiṣṭhāṃ gacchan pratiṣṭhāṃ mā gamayet*; mit Ait. Br. III 8. 3 muss man lesen *pratiṣṭhāsi pratiṣṭhāṃ gaccha pratiṣṭhāṃ mā gamaya.*

II 3. 6. [S. 192. Z. 13] *śaṃ no bhava hṛda ā pīta indro.* Man muss mit Vaitana XIX 18[a] und R. V. VIII 48. 4[a] *indo* lesen.

II 3. 8. [S. 194. Z. 4] *sapta hotāra ṛtuthā yajanti* nicht im Ved. Conc. belegt, wohl *sapta hotāra ṛtuśo yajanti* S. 973.

II 3. 13. [S. 200. Z. 11] die Hss. A. D und F lesen wie Ṛ. V. I 137. 2[d] *uta vām uṣaso budhi.* Nur Hs. E. liest *budhiḥ* (vgl. Ved. Conc. p. 252).

II 4. 8. [S. 215. Z. 14] *(yame) yat kusīdam apamityam apratīttam;* vielleicht zwei Mantra (*yame*) *yat kusīdam* und *apamityam apratīttam.*

Vielleicht gehört *yame* zu *yat kusīdam.*

II 4. 9. [S. 217. Z. 2] *yā te agne yajñiyā tanūs tayā me hy āroha tayā me hy āviśa.* Der Mantra findet man in dieser Form nur im Gop. Br. und Vait. XXIV 14.

II 4. 15. [S. 222. Z. 7] Im Ved. Conc. ist nicht notiert, dass *ā vāṃ rājānāv adhvare vavṛtyān* im Gop. Br. II 4. 15 gefunden wird.

II 4. 16. [S. 223. Z. 11] *sakhā sakhibhyo varivaḥ kṛṇotu.* Hs. A. liest mit A. S. VII 51. 1[d] *varīyaḥ*; die Hss. D, E und F lesen mit der Paipp. Rezension *varivaḥ.*

II 4. 17. [S. 224. Z. 6] *ṛtur janitrī tasyā apas pari,* die Hss. A pr. m., D und F lesen *apas* wie Ṛ. V. II 13. 1[a] nicht *apasas* (vgl. Ved. Conc. S. 291].

II 5. 8. [S. 234. Z. 12] *eṣa me 'muṣmiṃlloke prakāśo 'sat*; nicht notiert im Ved. Conc. S. 306.

II 5. 13. [S. 239. Z. 7] die Hss. lesen: *made somasya rocanendro yad abhinad valam*; besser wäre doch mit A. V. XX 28. 1[b] zu lesen *made somasya rocanā indro yad abhinad valam.*

II 6. 2. [S. 245. Z. 4] *ariṣṭair naḥ pathibhiḥ pārayantā.* A. sec. m. hat *pārayantā* wie Ṛ. V. VI 69. 1[d]; die anderen Hss. *pārayantu* (vgl. Ved. Conc. S. 112).

Einige Mantra des Gop. Br. II 6. 14 und 15 sind in Ved. Conc. fehlerhaft notiert worden. A. V. (ed. Shankar Pandit) hat dieselbe Lesart wie Gop. Br.; andere Texte haben eine andere Lesart.

II 6. 14. [S. 268. Z. 5] *yajñā netarasaṃn apurogavāsaḥ* ebenso A. V. XX 135. 7[d] nicht wie im Ved. Conc. *jajñā neta sann apurovāsaḥ*; vgl. jetzt Z. D. M. G. 72, S. 24.

II 6. 14. [S. 267. Z. 12] A. V. XX 135. 6 und 7[a und b] und Gop. Br. stimmen wörtlich überein in: *ādityā ha jaritar aṅgirobhyo dakṣiṇām anayaṃs tāṃ ha jaritaḥ pratyāyaṃs tām u ha jaritaḥ pratyāyan || tāṃ ha jaritar naḥ pratyagṛbhṇaṃs tām u ha jaritar naḥ pratyagṛbhṇan.*

Ved. Conc. hat eine andere Lesart.

ādityā ha jaritar aṅgirobhyo dakṣiṇām anayaṃs tāṃ ha jaritar na pratyāyaṃs tām u ha jaritaḥ pratyāyan || tāṃ ha jaritar na pratyagṛbhṇaṃs tām u ha jaritar pratyagṛbhṇan.

II 6. 14. [S. 268. Z. 3] *ahānetarasaṃn avicetanāni* ebenso A. V. XX 135. 7[c]; Ved. Conc. *ahā neta sann avicetanāni.*

II 6. 14. [S. 268. Z. 8] *uta padyābhir yaviṣṭhaḥ* ebenso

A. V. XX 135. 8[b]. Ved. Conc. *uto padyābhir javiṣṭhah* (Gop. Br. liest *uta*, A. V. *uto*).

II 6. 14 [S. 268. Z. 10] *ādityā rudrā vasavas 'tenute* (so alle Hss.). A. V. XX 135. 9[a] hat *tvenute*; Ved. Conc. *ādityā rudrā vasavas tvelate.*

II 6. 14. [S. 268. Z. 12] *devā dadatv āsuraṃ*, ebenso A. V. XX 135. 10[a]; Ved. Conc. *devā dadatv ā varaṃ* und *yuṣmāṃ astu dive dive*, ebenso A. V. XX 135. 10[c]. Ved. Conc. *yuṣme astu dive dive.*

II 6. 16 [S. 272. Z. 6] *viśo adevīr abhyācarantīḥ*. Diese Stelle ist nicht im Ved. Conc. belegt.

ओं नमो ऽथर्ववेदाय नमः ॥

ओं ब्रह्म ह वा इदमग्र आसीत्स्वयंभ्वेकमेव' [1] तदै-क्षत' [2] महद्वै यक्षं यदेकमेवास्मि' [3] हन्ताहं मदेव मन्मात्रं द्वितीयं देवं निर्मिमा [4] इति' तदभ्यश्राम्यदभ्यतपत्समतप-त्तस्य श्रान्तस्य तप्तस्य संतप्तस्य ललाटे स्नेहो यदार्द्रमा-जायत [5]' तेनानन्दत्तदब्रवीन्महद्वै यक्षं सुवेदमविदमह-मिति' [6] तद्यदब्रवीन्महद्वै यक्षं सुवेदमविदमहमिति' [7] तस्मात्सुवेदोऽभवत्तं [8] वा एतं सुवेदं सन्तं स्वेद इत्या-चक्षते परोक्षेण' परोक्षप्रिया [9] इव हि देवा [10] भवन्ति प्रत्यक्षद्विषः' ॥ १ ॥

स [11] भूयोऽश्राम्यद्भूयोऽतप्यद्भूय आत्मानं समतपत्तस्य श्रान्तस्य तप्तस्य संतप्तस्य सर्वेभ्यो रोमगर्तेभ्यः पृथक्स्वेद-

---

1) So corr.; °यंत्वेकमेव A und C; °यंग्वेकमेव B; °यंभ्वोवमेव E; 2) तदैक्षोत B, तदीक्षत C und E; 3) so corr.; die hss. lesen तदेकमे°. 4) so corr.; die hss. lesen निर्मन; 5) so lese ich mit Böhtlingk; die hss. haben यदार्द्र्यमा°; यदार्द्र्यमाजायन्त B; 6) und 7) wie Böhtlingk; A hat °महा इति, die übrigen hss. °मह इति; 8) ऽभवत्त्वं C; 9) परोक्षिप्रिया E; 10) देवता B; 11) Brahma ist hier masc., später wieder neutrum.

धाराः प्रास्यन्दन्त ।[1] ताभिरनन्दत्तदब्रवीदाभिर्वा अहमिदं सर्वं धारयिष्यामि[2] यदिदं किं चाभिर्वा अहमिदं सर्वं जनयिष्यामि[3] यदिदं किं चाभिर्वा अहमिदं सर्वमाप्स्यामि यदिदं किं चेति । तद्यदब्रवीदाभिर्वा अहमिदं सर्वं धारयिष्यामि[4] यदिदं किं चेति । तस्माद्धारा[5] अभवंस्तद्धाराणां[6] धारात्वं यच्चासु ध्रियते ।[7] तद्यदब्रवीदाभिर्वा अहमिदं सर्वं जनयिष्यामि यदिदं किं चेति । तस्माज्जाया[8] अभवंस्तज्जायानां[9] जायात्वं याच्चासु पुरुषो जायते यच्च पुत्रः । पुन्नाम नरकमनेकशततारं ।[10] तस्मात्त्रातीति पुत्रस्तत्पुत्रस्य पुत्रत्वं । तद्यदब्रवीदाभिर्वा अहमिदं[11] सर्वमाप्स्यामि यदिदं किं चेति । तस्मादापो ऽभवंस्तदपामप्त्वमाप्नोति[12] वै स सर्वान्कामान्यान्कामयते[13] ॥ २ ॥

ता अपः सृष्ट्वान्वैक्षत । तासु स्वां छायामपश्यत्तामभ्यैक्षमाणस्य[14] स्वयं रेतो ऽस्कन्दत्तदप्सु प्रत्यतिष्ठत्ता-

---

1) प्रकस्यन्दन्त A; प्राकस्यन्दन्त B; प्राकसंदन्त E; 2) धारायिष्यामि E; 3) Von जनयिष्यामि bis धारयिष्यामि fehlt in B; 4) धारायिष्यामि E; 5) धारा hat hier keinen Sinn; vielleicht ist धरा (Erde) gemeint (Böhtlingk); 6) °वंस्तन्धारा° B; 7) ध्रीयते A und B; 8) Die hss. haben plur.; ich möchte (wie Böhtlingk) sing. lesen, um so mehr als puruṣaḥ und putraḥ auch im sing. stehen. 9) °याता E; 10) °कशतातार C; 11) आहमिदं E; 12) °पत्वमाप्नोति A und E; 13) Am Schlusz is doch wohl य एवं वेद ausgefallen; 14) छयाम° A und E; °क्षमाणः स्व E;

स्तत्रैवाभ्यश्राम्यदभ्यतपत्समतपत्ताः श्रान्तास्तप्ताः संतप्ताः
सार्धमेव रेतसा द्वैधमभवंस्तासामन्यतरा[1] अतिलवणा[2]
अपेया अस्वाद्यास्ता[3] अशान्ता रेतः समुद्रं वृत्वातिष्ठन्नथे-
तराः पेयाः स्वाद्यः शान्तास्तांस्तत्रैवाभ्यश्राम्यदभ्यतपत्सम-
तपत्ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः संतप्ताभ्यो यद्रेत आसीत्तदभृ-
ज्ज्यत[4] 'यदभृज्ज्यत[5] तस्माद्भृगुः समभवत्तद्भृगोर्भृगुत्वं '[6]
भृगुरिव वै स सर्वेषु लोकेषु भाति य एवं वेद ' ॥ ३ ॥

स भृगुं सृष्ट्वान्तरधीयत ' स भृगुः सृष्टः प्राङैजत '[7] तं
वागन्ववदद्वायो वाय[8] इति ' स[9] न्यवर्तत स दक्षिणां
दिशमैजत[10] ' तं वागन्ववदन्मातरिश्वन्मातरिश्वन्निति ' स[11]
न्यवर्तत ' स[12] प्रतीचीं दिशमैजत[13] ' तं वागन्ववदत्पव-
मान[14] पवमानेति ' स[15] न्यवर्तत ' स उदीचीं दिशमैजत[16] '
तं वागन्ववद्वात वातेति ' तमब्रवीन्न न्वविदमहमिति '[17]

---

1) द्वैतनभ° A; द्वैधतमनभ° B; द्विधनभ° E; alle hss. lesen °नव्या अन्यतरा; 2) B fügt ein: अतिप्रजापतेरावृतो ब्रह्मणा वर्मनाहं कस्य यस्य ज्योतिषा वचसा च तरदृष्टिः अतब्रोर्यो विलायां स एतायुः सुकृतः दश्रेयं लवणा; 3) अस्वाद्यस्ता B, C und E; 4) und 5) Die hss. lesen °भृद्यत; 6) °गत्वं B; 7) प्राङेजत B, C und E; 8) So corr. die hss. haben वायो; 9) तं B und E; 10) So corr. die hss. haben दिशमेजत; 11) तं B; 12) तं E; 13) So corr. die hss. haben दिशमेजत; 14) पवमान: B und E; 15) तं B; 16) So corr. die hss. lesen °नेजत; 17) So corr. (wie Böhtlingk); A hat विदामहा इति; B, C und E lesen विदामह इति;

न ह्वीत्यंथार्वाङेनमेतास्वेवाप्स्वन्विच्छेति' तद्यदब्रवीद-थार्वाङेनमेतास्वेवाप्स्वन्विच्छेति तदथर्वाभवत्तदथर्वणो[1] ऽथर्वत्वं[1] 'तस्य ह वा एतस्य भगवतो ऽथर्वण ऋषेर्यथैव ब्रह्मणो[2] लोमानि यथाङ्गानि यथा प्राण एवमेवास्य सर्व आत्मा समभवत्तमथर्वाणं ब्रह्माब्रवीत्प्रजापतेः प्रजाः सृष्ट्वा पालयस्वेति' तद्यदब्रवीत्प्रजापतेः प्रजाः सृष्ट्वा पालयस्वेति तस्मात्प्रजापतिरभवत्तत्प्रजापतेः प्रजापतित्व-मथर्वा वै प्रजापतिः 'प्रजापतिरिव वै स सर्वेषु लोकेषु भाति य एवं वेद' ॥ ४ ॥

तमथर्वाणमृषिमभ्यश्राम्यदभ्यतपत्समतपत्तस्माच्छ्रान्ता-त्तप्तात्संतप्ताद्दशतयानथर्वण[3] ऋषीन्निरमिमतैकर्चान्द्वृचां-स्तृचांश्चतुरृचान्पञ्चर्चान्षडर्चान्त्सप्तर्चानष्टर्चान्नवर्चान्दशर्चा-निति[4] 'तानथर्वण ऋषीनभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यो दशतयानाथर्वणानार्षेयान्निरमि-मतैकादशान्द्वादशांस्त्रयोदशांश्चतुर्दशान्पञ्चदशान्षोडशांत्स-प्तदशानष्टादशान्नवदशान्विंशानिति' तानथर्वण ऋषीना-थर्वणांश्चार्षेयानभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्त-प्तेभ्यः संतप्तेभ्यो यान्मन्त्रानपश्यत्स आथर्वणो वेदो ऽभव-

---

1) °थर्वणाथर्वत्वं B; 2) ब्रह्मणो C; 3) °थर्वाणा B; 4) दशर्चान् fehlt in E;

त्तमाथर्वणं वेदमभ्यश्राम्यदभ्यतपत्समतपत्तस्माच्छ्रान्तात्तप्तात्संतप्तादोमिति मन एवोर्ध्वमक्षरमुदक्रामत्स[1] य इच्छेत्सर्वैरेतैरथर्वभिश्चाथर्वणैश्च कुर्वीयेत्येतयैव तन्महाव्याहृत्या[2] कुर्वीत ' सर्वैर्ह वा अस्यैतैरथर्वभिश्चाथर्वणैश्च कृतं भवति य एवं वेद यश्चैवं विद्वानेवमेतया महाव्याहृत्या[3] कुरुते ' ॥ ५ ॥

स भूयो[4] ऽश्राम्यद्भूयो ऽतप्यद्भूय आत्मानं समतपत्स आत्मत एव त्रींल्लोकान्निरमिमीत[5] पृथिवीमन्तरिक्षं[6] दिवमिति ' स खलु पादाभ्यामेव पृथिवीं निरमिमीतोदरादन्तरिक्षं[7] मूर्ध्नो दिवं ' स तांस्त्रींल्लोकानभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यस्त्रीन्देवान्निरमिमीताग्निं[8] वायुमादित्यमिति ' स खलु पृथिव्या एवाग्निं निरमिमीतान्तरिक्षाद्वायुं[8] दिव आदित्यं ' स तांस्त्रीन्देवानभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यस्त्रीन्वेदान्निरमिमीत[8] ऋग्वेदं यजुर्वेदं सामवेदमित्यग्नेरृग्वेदं वायोर्यजुर्वेदमादित्यात्सामवेदं ' स तांस्त्रीन्वेदानभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यस्तिस्रो महा-

---

1) °दक्रामयत्स E; 2) Die hss. lesen तं नज°; 3) °हृत्यां E; 4) भुयो B; 5) So corr.; die Hss. °मिमत; 6) पृथिवीमान्त° E; 7) So corr., die Hss. °मिमतो°; 8) So corr.

व्याहृतीर्निरमिमीत[1] भूर्भुवः स्वरिति । भूरित्यृग्वेदाद्भुव इति यजुर्वेदात्स्वरिति सामवेदात्स य इच्छेत्सर्वैरेतैस्त्रिभिर्वेदैः कुर्वीयेत्येताभिरेव तन्महाव्याहृतिभिः कुर्वीत । सर्वैर्ह वा अस्यैतैस्त्रिभिर्वेदैः कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेताभिर्महाव्याहृतिभिः[2] कुरुते । ॥ ६ ॥

ता या अमू रेतः समुद्रं वृत्वातिष्ठंस्ताः[3] प्राच्यो दक्षिणाच्यः प्रतीच्य[4] उदीच्यः समद्रवन्त । तद्यत्समद्रवन्त तस्मात्समुद्र उच्यते । ता भीता अब्रुवन्भगवन्तमेव[5] वयं राजानं वृणीमह इति । यच्च वृत्वातिष्ठंस्तद्वरणो[6] ऽभवत्तं वा एतं[7] वरणं[8] सन्तं वरुण इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः । स समुद्रादमुच्यत[9] । स मुच्युरभवत्तं वा एतं मुच्युं[10] सन्तं मृत्युरित्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषस्तं वरुणं मृत्युमभ्यश्राम्यदभ्यतपत्समतपत्तस्य श्रान्तस्य तप्तस्य संतप्तस्य सर्वेभ्यो[11] ऽङ्गेभ्यो[11] रसो ऽक्षरत्सो ऽङ्गरसो ऽभवत्तं वा एतमङ्गरसं सन्तमङ्गिरा

1) So corr.; 2) Die hss. महा°; 3) वृत्वातिष्ठंस्ता: B; 4) प्रतिच्य E; 5) °गन्तामव B; 6) So corr. A °द्वरुणो; B, C und E °वरुणो; 7) Von एतं bis मुच्यु° fehlt in B; 8) So corr. die Hss. वरुणं; 9) °च्युत A und B; °च्यता E; 10) मुच्यं E; 11) Fehlt in B;

इत्याचक्षते परोक्षेण 'परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः' ॥ ७ ॥

तमङ्गिरसमृषिमभ्यश्राम्यदभ्यतपत्समतपत्तस्माच्छ्रान्तात्तप्तात्संतप्ताद्विंशिनो ऽङ्गिरस ऋषीन्निरमिमीत[1] 'तान्विंशिनो ऽङ्गिरस ऋषीनभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यो दशतयानाङ्गिरसानार्षेयान्निरमिमीत[2] षोडशिनो ऽष्टादशिनो[3] द्वादशिन एकर्चान्द्व्यृचांस्तृचांश्चतुरृचान्पञ्चर्चान्षडर्चान्सप्तर्चानिति[4] 'तानङ्गिरस[5] ऋषीनाङ्गिरसांश्चार्षेयानभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यो[6] यान्मन्त्रानपश्यत्स आङ्गिरसो[7] वेदो ऽभवत्तमाङ्गिरसं[8] वेदमभ्यश्राम्यदभ्यतपत्समतपत्तस्माच्छ्रान्तात्तप्तात्संतप्ताज्जनदिति द्वैतमक्षरं व्यभवत्स य इच्छेत्सर्वैरेतैरङ्गिरोभिश्चाङ्गिरसैश्च[9] कुर्वीयेत्येतयैव[10] तन्महाव्याहृत्या[11] कुर्वीत' सर्वैर्ह वा अस्यैतैरङ्गिरोभिश्चाङ्गिरसैश्च कृतं भवति य एवं वेद यश्चैवं विद्वानेवमेतया महाव्याहृत्या कुरुते' ॥ ८ ॥

---

1) So corr. A, B und C °मिमत, E °मिमता; 2) °ङ्गिरसानामार्षे° E; alle hss. °मिमत; 3) द्वाशिनो B; 4) द्व्यृचान् fehlt in E; und steht in den andern Hss. hinter षडर्चान्; 5) तनङ्गि° C; 6) संतप्ते C; 7) अङ्गिरसो A; 8) °ङ्गिरसां B; 9) प्रेच्छेत्स° B; 10) Von कुर्वीये° bis कृतं fehlt in B; °तयैवत् E; 11) So corr.; die Hss. तं महा°.

स ऊर्ध्वो ऽतिष्ठत्स इमांल्लोकान्व्यष्टभ्नात्तस्मादङ्गिरसो ऽधीयान ऊर्ध्वस्तिष्ठति ' तद्व्रतं[1] ' स मनसा ध्यायेद्यद्वा अहं किं च मनसा ध्यास्यामि तथैव तद्भविष्यति[2] ' तद्ध स्म तथैव भवति ' तदप्येतदृचोक्तं ' श्रेष्ठो ह वेदस्तपसो ऽधि जातो ब्रह्मज्यानां[3] क्षितये संबभूव[4] । ऋच्यृग्भूतं[5] यदसृज्यतेदं निवेशनमनृणं[6] दूरमस्येति ' ता वा[7] एता अङ्गिरसां जामयो[8] यन्मेनयः ' करोति मेनिभिर्वीर्यं[9] य एवं वेद ' ॥ ९ ॥

स दिशो ऽन्वैक्षत प्राचीं दक्षिणां प्रतीचीमुदीचीं ध्रुवामूर्ध्वामिति[10] ' तास्तत्रैवाभ्यश्राम्यदभ्यतपत्समतपत्ताभ्यः[11] श्रान्ताभ्यस्तप्ताभ्यः संतप्ताभ्यः पञ्च वेदान्निरमिमीत[12] ' सर्पवेदं पिशाचवेदमसुरवेदमितिहासवेदं[13] पुराणवेदमिति ' स खलु प्राच्या[14] एव[15] दिशः सर्पवेदं निरमिमीत[16] ' दक्षिणस्याः पिशाचवेदं ' प्रतीच्या असुरवेदमुदीच्या इतिहासवेदं ' ध्रुवायाश्चोर्ध्वायाश्च पुराणवेदं ' स

1) तव्रतं B; त व्रतं A; 2) So die hss. man erwartet भविष्यतीति; 3) ब्रह्मज्ञानं A; ब्रह्मज्ञानां B; 4) नबभूव B; 5) (So meine Konjektur) ऋच्यग्भूतं A und B; ऋच्यदृग्भूतं C; ऋग्वृग्भूतं E; 6) °मनृणां C; 7) व C; 8) So alle hss.; B. I. hat यामयो; 9) मेभिवीर्यं C; मेनिभि वीर्यं E; 10) दृवा° B; 11) तास्तत्रैवाभिश्रा° E; 12) So corr.; die Hss. °न्निरमिमत; 13) पिशाचावद° B; 14) प्राच्यां A; 15) एवा A; 16) So corr. die Hss. °मत.

तान्पञ्च वेदानभ्यश्राम्यदभ्यतपत्समतपत्तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः संतप्तेभ्यः पञ्च महाव्याहृतीर्निरमिमीत[1] ' वृधत्करद्गुहन्महत्तदिति[2] ' वृधदिति सर्पवेदात्करदिति पिशाचवेदाद्गुहदित्यसुरवेदान्महदितीतिहासवेदात्तदिति पुराणवेदात्स य[3] इच्छेत्सर्वैरेतैः पञ्चभिर्वेदैः कुर्वीयेत्येताभिरेव तन्महाव्याहृतिभिः[4] कुर्वीत ' सर्वैर्ह वा अस्यैतैः पञ्चभिर्वेदैः कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेताभिर्महाव्याहृतिभिः कुरुते ' ॥ १० ॥

स आवतश्च परावतश्चान्वैक्षत ' तास्तत्रैवाभ्यश्राम्यदभ्यतपत्समतपत्ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः संतप्ताभ्यः शमित्यूर्ध्वमक्षरमुदक्रामत्स य इच्छेत्सर्वाभिरेताभिरावद्भिश्च परावद्भिश्च कुर्वीयेत्येतयैव तन्महाव्याहृत्या[4] कुर्वीत ' सर्वाभिर्ह[5] वा अस्यैताभिरावद्भिश्च परावद्भिश्च कृतं भवति य एवं वेद यश्चैवंविद्वानेवमेतया महाव्याहृत्या कुरुते ' ॥ ११ ॥

स भूयो ऽश्राम्यद्भूयो ऽतप्यद्भूय आत्मानं समतपत्स मनस एव चन्द्रमसं निरमिमीत[6] ' नखेभ्यो नक्षत्राणि '

---

1) So corr. die Hss. °मत; 2) महत् fehlt in E; 3) Fehlt in B; 4) So corr. die Hss. तं मह°; 5) ह fehlt in E; 6) So corr. die Hss. °मत.

लोमभ्य ओषधिवनस्पतीङ्गेभ्यः प्राणेभ्यो[1] ऽन्यान्बहून्देवांत्स भूयो ऽश्राम्यद्भूयो ऽतप्यद्भूय[2] आत्मानं समतपत्स एतं त्रिवृतं सप्ततन्तुमेकविंशतिसंस्थं[3] यज्ञमपश्यत्तंदप्येतदृचोक्तमग्निर्यज्ञं त्रिवृतं[4] सप्ततन्तुमित्यंथाप्येष[5] प्राक्रीडितः श्लोकः प्रत्यभिवदति ' सप्त सुत्याः सप्त च पाकयज्ञा इति ' ॥ १२ ॥

तमाहरत्तेनायजत ' तस्याग्निर्होतासीद्वायुरध्वर्युः ' सूर्य उद्गाता ' चन्द्रमा ब्रह्मा ' पर्जन्यः सदस्य ' ओषधिवनस्पतयश्चमसाध्वर्यवो[6] विश्वे देवा होत्रका अथर्वाङ्गिरसो गोप्तारस्तं[7] ह[7] स्मैतमेवं[7] विद्वांसः[7] पूर्वे[7] श्रोत्रिया[7] यज्ञं[7] ततं[7] सावसाय[7] ह[7] स्माहेत्यभिव्रजन्ति[7] ' मा नो ऽयं घर्म उद्यतः प्रमत्तानाममृताः प्रजाः प्रधाक्षीदिति[8] ' तान्वा एतान्परिरक्षकान्त्सदःप्रसर्पकानित्याचक्षते[9] दक्षिणासमृद्धांस्तांउ ह स्माह प्रजापतिर्यद्धि यज्ञे[10] ऽकुशला ऋत्विजो भवन्त्यचरितिनो[11] ब्रह्मचर्यमपराग्या[12] वा ' तद्धि यज्ञस्य विरिष्टमित्याचक्षते ' यज्ञस्य विरिष्टमनु यजमानो

---

1) प्राणाभ्यो B; 2) ऽत्यत भूय B und E; 3) सप्ततन्तुमेक° B; 4) त्रितं E; 5) ततप्ततन्तुमि° B; सप्ततुमि° E; 6) °धुर्यवा E; 7) Verdorben; vgl. Bem. z. d. S.; 8) So mit Böhtlingk; die hss. haben प्रजाक्षोदिति; 9) एतान्परिरचा° C; 10) यज्ञा B; 11) °रितनो C; 12) So die hss.; Böhtlingk schlägt vor ब्रह्मचर्यं ऽपराध्या.

विरिष्यते ' यजमानस्य विरिष्टमन्वृत्विजो विरिष्यन्त ' ऋत्विजां विरिष्टमनु[1] दक्षिणा विरिष्यन्ते ' दक्षिणानां विरिष्टमनु यजमानः पुत्रपशुभिर्विरिष्यते ' पुत्रपशूनां[2] विरिष्टमनु यजमानः स्वर्गेण लोकेन विरिष्यते[3] ' स्वर्गस्य लोकस्य विरिष्टमनु तस्यार्धस्य योगक्षेमो विरिष्यते यस्मिन्नर्धे यजन्त इति ब्राह्मणम् ' ॥ १३ ॥

तं ह स्मैतमेवंविद्वांसं ब्रह्माणं यज्ञविरिष्टी वा यज्ञविरिष्टिनो वेत्युपाधावेरन्नमस्ते अस्तु भगवन्यज्ञस्य[4] नो विरिष्टं[5] संधेहीति ' तद्यत्रैव विरिष्टं[6] स्यात्तत्राग्नीनुपसमाधाय शान्त्युदकं कृत्वा पृथिव्यै श्रोत्रायेति त्रिरेवाग्नीन्संप्रोक्षति[7] त्रिः पर्युक्षति[8] ' त्रिः कारयमानमाचामयति च संप्रोक्षति च ' यज्ञवास्तु[9] च संप्रोक्षत्यथापि[10] वेदानां रसेन यज्ञस्य विरिष्टं संधीयते ' तद्यथा लवणेन सुवर्णं[11] संदध्यात्सुवर्णेन[12] रजतं रजतेन लोहं[13] लोहेन सीसं[14] सीसेन त्रप्वेवमेवास्य[15] यज्ञस्य विरिष्टं संधीयते ' यज्ञस्य संधितिमनु[16] यजमानः संधीयते ' यजमानस्य संधितिमन्वृ-

1) त्रिरिष्य° B; 2) °सुनां B; 3) °ष्यन्ते E; 4) °यज्ञसा E; 5) विरष्टं A und E; 6) वरिष्टं B; 7) त्रिरेवाग्नीत्सं° C; त्रीरेवाग्नीत्सं° E; 8) पर्युक्षयति E; 9) यज्ञं वास्तु E; 10) संप्रोक्षयत्य° E; 11) सुवर्ण E; 12) संदध्यात्सु° A und B; 13) Fehlt in C; 14) Fehlt in A; 15) त्रपृवेव° B; त्रप्येव° C; तृपेव° E; 16) संधी° A.

विजः[1] संधीयन्त[2] 'ऋत्विजां संधितिमनु[1] दक्षिणाः संधीयन्ते[3] 'दक्षिणानां संधितिमनु[1] यजमानः पुत्रपशुभिः[4] संधीयते[5] 'पुत्रपशूनां संधितिमनु[6] यजमानः स्वर्गेण लोकेन संधीयते[7] 'स्वर्गस्य लोकस्य संधितिमनु[6] तस्यार्धस्य योगक्षेमः संधीयते[8] यस्मिन्नर्धे यजन्त इति ब्राह्मणम्' ॥ १४ ॥

तद्ध स्माहाथर्वा देवो विज्ञानन्यज्ञविरिष्टानन्दानीत्युपशमयेरन्यज्ञे[9] प्रायश्चित्तिः क्रियते ऽपि च यद् बह्विव[10] यज्ञे विलोमं[11] क्रियते न चैवास्य काचनार्तिर्भवति न च यज्ञविष्कन्धमुपयात्यपहन्ति पुनर्मृत्युमपात्येति पुनराजातिं[12] कामचारो ऽस्य सर्वेषु लोकेषु भाति य एवं वेद यश्चैवंविद्वान्ब्रह्मा भवति यस्य चैवंविद्वान्ब्रह्मा दक्षिणतः सदो ऽध्यास्ते यस्य चैवंविद्वान्ब्रह्मा दक्षिणत उदङ्मुख आसीनो यज्ञ आज्याहुतीर्जुहोतीति ब्राह्मणम्' ॥ १५ ॥

ब्रह्म ह वै ब्रह्माणं पुष्करे ससृजे[13] 'स खलु ब्रह्मा सृष्टश्चिन्तामापेदे 'केनाहमेकेनाक्षरेण सर्वांश्च कामान्स-

---

1) संधी° A; 2) संधियंते A und C; 3) °यते A und C; 4) पुत्रः पशुभिः B; 5) °यन्ते E; 6) संधी° A und C; 7) °यन्ते B; 8) °धीयन्ते B; 9) ? ? B : विज्ञानान्य°; 10) वद्वीव A; 11) विलोमः A, B und E; 12) पुनराजाति C; 13) ससृजे A, B und C.

र्वांश्च लोकान्सर्वांश्च देवान्सर्वांश्च वेदान्सर्वांश्च यज्ञान्सर्वांश्च शब्दान्सर्वांश्च[1] व्युष्टीः[2] सर्वाणि च भूतानि स्थावरजङ्गमान्यनुभवेयमिति । स ब्रह्मचर्यमचरत्स[3] ओमित्येतदक्षरमपश्यद्द्विवर्णं[3] चतुर्मात्रं सर्वव्यापि सर्वविभ्वयातयामब्रह्म[4] ब्राह्मीं व्याहृतिं ब्रह्मदैवतां[5] । तया सर्वांश्च कामान्सर्वांश्च लोकान्सर्वांश्च देवान्सर्वांश्च वेदान्सर्वांश्च यज्ञान्सर्वांश्च शब्दान्सर्वाश्च[6] व्युष्टीः[7] सर्वाणि च भूतानि स्थावरजङ्गमान्यन्वभवत्तस्य[8] प्रथमेन वर्णेनापः[9] स्नेहं[9] चान्वभवत्तस्य[9] द्वितीयेन वर्णेन तेजो ज्योतींष्यन्वभवत् ॥ १६ ॥

तस्य प्रथमया स्वरमात्रया[10] पृथिवीमग्निमोषधिवनस्पतीनृग्वेदं भूरिति व्याहृतिं गायत्रं छन्दस्त्रिवृतं स्तोमं प्राचीं दिशं[11] वसन्तमृतुं[12] वाचमध्यात्मं जिह्वां रसमितीन्द्रियाण्यन्वभवत्[13] । ॥ १७ ॥

---

1) So corr. die Hss. °र्वांश्च; 2) So alle hss.; vielleicht zu lesen: व्यष्टीः; 3) °चरत्सर्तुमित्ये° A; °चरत्सर्व ओमित्ये° C; 4) °ब्रह्मा A und B; 5) So mit Böhtlingk; die Hss. °दैवतं; 6) So corr.; die Hss. °र्वांश्च; 7) So die hss.; vielleicht व्यष्टी: 8) स्थावरात्त° B; 9) So mit Böhtlingk; die Hss. वर्णेनापस्नेहश्च°; 8) und 9) तस्य befremdet; man hätte hier wegen व्याहृति das Fem. erwartet. Der Autor hat wohl an ओंकार gedacht [Böhtlingk]. 10) स्वरमात्रा B; 11) दीशं E; 12) °नृतं E; 13) रसमितीन्द्रि° E; °यान्यन्वभवत् C.

तस्य द्वितीयया स्वरमात्रयान्तरिक्षं[1] वायुं यजुर्वेदं भुव इति व्याहृतिं[2] त्रैष्टुभं छन्दः पञ्चदशं स्तोमं प्रतीचीं[3] दिशं ग्रीष्ममृतुं[4] प्राणमध्यात्मं नासिके गन्धघ्राणमितीन्द्रियाण्यन्वभवत्' ॥ १८ ॥

तस्य तृतीयया स्वरमात्रया दिवमादित्यं सामवेदं[5] स्वरिति व्याहृतिं[6] जागतं छन्दः सप्तदशं स्तोममुदीचीं[7] दिशं वर्षा ऋतुं ज्योतिरध्यात्मं चक्षुषी दर्शनमितीन्द्रियाण्यन्वभवत्' ॥ १९ ॥

तस्य वकारमात्रयापश्चन्द्रमसमथर्ववेदं[8] नक्षत्राण्योमिति स्वमात्मानं जनदित्यङ्गिरसामानुष्टुभं छन्द एकविंशं स्तोमं दक्षिणां दिशं शरदमृतुं मनोऽध्यात्मं ज्ञानं[9] ज्ञेयमितीन्द्रियाण्यन्वभवत्' ॥ २० ॥

तस्य मकारश्रुत्येतिहासपुराणं[10] वाकोवाक्यं[11] गाथा[11] नाराशंसीरुपनिषदोऽनुशासनानीति[12] वृधत्करद्गुहन्महत्तच्छमोमिति व्याहृतीः स्वरशम्यनानातन्त्रीः[13] स्वरनृत्यगीतवादित्राण्यन्वभवच्चैत्ररथं दैवतं वैद्युतं ज्योति-

1) °रिक्ष B; 2) व्याहृत E; 3) प्रतीची E; 4) °मृत्युं C; 5) साम° E; 6) व्याहृतिर् C und E; 7) °दीची E; 8) °श्रयश्चन्द्रम-सवर्व° B; 9) ज्ञान्यं B; ज्ञानां C; 10) °हासपुर्ण B; 11) So corr.; die hss. °वाक्यगा°; 12) So corr. die hss. ऽनुशासनानामिति; 13) स्वरशंम्य° B; स्वरशंम्यनानाना° C; स्वरशम्यनाना° E.

र्वार्हतं छन्दस्त्रिणवत्रयस्त्रिंशौ[1] स्तोमौ ध्रुवामूर्ध्वां दिशं[2] हेमन्तशिशिरावृतू श्रोत्रमध्यात्मं शब्दश्रवणमितीन्द्रियाण्यन्वभवत् ॥ २१ ॥

सैषैकाक्षरर्ग्ब्रह्मणस्तपसो ऽग्रे प्रादुर्बभूव[3] ब्रह्मवेदस्याथर्वणं शुक्रमत एव मन्त्राः प्रादुर्बभूवुः स तु खलु मन्त्राणामतपसाशुश्रूषानध्यायाध्ययनेन यदूनं च विरिष्टं च यातयामं[4] च करोति तदथर्वणां तेजसा प्रत्याप्याययेन्मन्त्राश्च[5] मामभिमुखीभवेयुर्गर्भा इव मातरमभिजिघांसुः[6] पुरस्तादोंकारं प्रयुङ्क्त एतयैव तदृचा प्रत्याप्याययेदेषैव यज्ञस्य[7] पुरस्ताद्युज्यत एषा[8] पश्चात्सर्वत एतया यज्ञस्तायते तदप्येतदृचोक्तं या पुरस्ताद्युज्यत[9] ऋचो अक्षरे परमे व्योमन्निति तदेतदक्षरं ब्राह्मणो यं काममिच्छेत्त्रिरात्रोपोषितः[10] प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य सहस्रकृत्व[11] आवर्तयेत्सिध्यन्त्यस्यार्थाः सर्वकर्माणि चेति ब्राह्मणम् ॥ २२ ॥

वसोर्धाराणामिन्द्रं[12] नगरं तदसुराः पर्यवारयन्त ते

---

1) छन्दः त्रिणवत्रियत्रिंशौ E; 2) दिश C; देश E; 3) प्रादुर्व° B; 4) यातयातनामं B; 5) प्रत्याप्याय° C und E; 6) So die hss.; vielleicht °जिघांसेयुः 7) C fügt पुरुषा ein; 8) एनाम A und C; 9) °ज्यन्त C; 10) कामनिच्छेत्त्रोरा° E; 11) Wie Böhtlingk; die Hss. कृत्वा; 12) °मेन्द्र A und E.

देवा भीता आसन्क इमानसुरानपहनिष्यतीति ' त ओंकारं ब्रह्मणः पुत्रं ज्येष्ठं ददृशुस्ते तमब्रुवन्भवता मुखेनेमानसुराञ्जयेमेति ' स होवाच ' किं मे प्रतीवाहो भविष्यतीति ' वरं वृणीष्वेति ' वृणा इति ' स वरमवृणीत ' न मामनीरयित्वा ब्राह्मणा ब्रह्म वदेयुर्यदि वदेयुरब्रह्म तत्स्यादिति ' तथेति ' ते देवा देवयजनस्योत्तरार्धे ऽसुरैः संयत्ता आसंस्तानोंकारेणाग्नीध्रीयाद्देवा असुरान्पराभावयन्त ' तद्यत्पराभावयन्त तस्मादोंकारः पूर्वमुच्यते ' यो ह वा एतमोंकारं न वेदावशी[1] स्यादित्यथ य एवं वेद ब्रह्मवशी[2] स्यादिति ' तस्मादोंकार ऋच्यृग्भवति[3] ' यजुषि यजुः ' साम्नि साम ' सूत्रे सूत्रं ' ब्राह्मणे[4] ब्राह्मणं ' श्लोके श्लोकः ' प्रणवे प्रणव इति ब्राह्मणम् ' ॥ २३ ॥

ओंकारं पृच्छामः ' को धातुः ' किं प्रातिपदिकं ' किं नामाख्यातं ' किं लिङ्गं ' किं वचनं ' का विभक्तिः ' कः प्रत्ययः ' कः[5] स्वर उपसर्गो[6] निपातः ' किं वै व्याकरणं ' को विकारः ' को विकारी ' कतिमात्रः ' कतिवर्णः ' कत्यक्षरः ' कतिपदः ' कः संयोगः ' किं स्थानानुप्रदानकरणं

---

1) und 2) So mit Böhtlingk; die Hss. °वन; 3) So corr.; ऋग्भवति A und E; ऋगृग्भवति B; ऋग्यग्भवति C; 4) ब्राह्मणो A; 5) Fehlt in E; 6) उपसर्गा C.

शिक्षुकाः किमुच्चारयन्ति ' किं छन्दः ' को वर्ण इति पूर्वे प्रश्ना ' अथोत्तरे ' मन्त्रः कल्पो ब्राह्मणमृग्यजुः साम ' कस्माद्ब्रह्मवादिन[1] ओंकारमादितः कुर्वन्ति ' किं दैवतं '[2] किं ज्योतिषं ' किं निरुक्तं ' किं स्थानं ' का प्रकृतिः ' किमध्यात्ममिति ' षट्त्रिंशत्प्रश्नाः ' पूर्वोत्तराणां त्रयो वर्गा द्वादशका ' एतैरोंकारं व्याख्यास्यामः ॥ २४ ॥

इन्द्रः प्रजापतिमपृच्छद्भगवन्नभिष्टूय[3] पृच्छामीति ' पृच्छ वत्सेत्यब्रवीत्किमयमोंकारः ' कस्य पुत्रः ' किं चैतच्छन्दः ' किं चैतद्वर्णः ' किं चैतद्ब्रह्मा[4] ब्रह्म संपद्यते ' तस्माद्वै तद्भद्रमोंकारं पूर्वमालेभे[5] ' स्वरितोदात्त एकाक्षर[6] ओंकार ऋग्वेदे ' त्रैस्वर्योदात्त एकाक्षर ओंकारो यजुर्वेदे ' दीर्घप्लुतोदात्त एकाक्षर ओंकारः सामवेदे[7] ' ह्रस्वोदात्त एकाक्षर ओंकारोऽथर्ववेद ' उदात्तोदात्त द्विपद अ[8] उ इत्यर्धचतस्रो मात्रा[9] मकारे व्यञ्जनमित्याहुर्या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता वर्णेन ' यस्तां ध्यायते नित्यं स गच्छेद्ब्राह्मं[10] पदं[11] ' या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा[12] वर्णेन ' यस्तां ध्यायते नित्यं स गच्छेद्वैष्णवं पदं '

---

1) कस्माद्ब्रा° C; 2) देवतं A und B; 3) °ल्लनुभ्य : सूय B; 4) °द्ब्रह्माद् B; 5) °नालभे B und E; 6) एकात्त B; 7) सामवेदे C; 8) अन् B; 9) त्रा B; 10) °ह्मतं B; 11) पद् B; 12) So corr. alle Hss. कृष्णा.

या सा तृतीया मात्रैशानदेवत्या[1] कपिला वर्णेन[2] । यस्तां ध्यायते नित्यं स गच्छेदैशानं पदं । या सार्धचतुर्थी मात्रा सर्वदेवत्या[3] व्यक्तीभूता खं विचरति शुद्धस्फटिकसन्निभा वर्णेन । यस्तां ध्यायते नित्यं स गच्छेत्पदमनामकमोंकारस्य[4] चोत्पत्तिर्विप्रो[5] यो न जानाति तत्पुनरुपनयनं । तस्माद्ब्राह्मणवचनमादर्तव्यं[6] यथा लातव्यो गोत्रो ब्राह्मणः पुत्रो । गायत्रं छन्दः । शुक्लो वर्णः । पुंसो वत्सो[7] । रुद्रो देवता । ओंकारो वेदानाम् । ॥ २५ ॥

को धातुरित्यापृधातुरवतिमप्येके । रूपसामान्यादर्थसामान्यं[8] नेदीयस्तस्मादापेरोंकारः[9] सर्वमाप्नोतीत्यर्थः कृदन्तमर्थवत्प्रातिपदिकमदर्शनं । प्रत्ययस्य नाम संपद्यते निपातेषु चैनं वैयाकरणा उदात्तं समामनन्ति[10] तदव्ययीभूतमन्वर्थवाची शब्दो न व्येति[11] कदाचनेति । सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययं । को विकारी च्यवते । प्रसारणमाप्नोतिराकारपकारौ[12] विकार्यावादित ओंकारो विक्रियते[13] । द्वितीयो

1) So alle hss.; man erwartet मात्रेशान°; 2) वर्णो B; 3) सदेवत्या B; 4) गच्छेत्पदनाम° E; 5) चोत्पतिर्विप्रो A und B; zu l. °त्पत्तोर्वि°? 6) तस्माद्ब्रह्म° E; 7) वसो E; पुंसो वत्सो ? ? 8) रूपसा° B und C; °सामान्तं B; सामान्यान् C; 9) नेदीय° B; वेदीय° E; 10) समामनं A; सामा° B; 11) व्येति E; 12) प्रसारणमाप्नोतिरा° A, B und E; °कारो E; 13) विक्रीयते C.

मकार ' एवं द्विवर्ण[1] एकाक्षर ओमित्योंकारो निर्वृत्तः[2] ' ॥ २६ ॥

कतिमात्र इत्यादेस्तिस्रो[3] मात्रा ' अभ्यादाने हि प्लवते ' मकारश्चतुर्थी[4] ' किं स्थानमित्युभावोष्ठौ स्थानं ' नादानप्रदानकरणौ[5] च द्विस्थानं[6] ' संध्यक्षरमवर्णलेशः कण्ठ्यो[7] यथोक्तशेषः[8] ' पूर्वो °विवृतकरणस्थितश्च[9] ' द्वितीयस्पृष्टकरणस्थितश्च ' न संयोगो विद्यत[10] ' आख्यातोपसर्गानुदात्तस्वरितलिङ्गविभक्तिवचनानि[11] च संस्थानाध्यायिन[12] आचार्याः पूर्वे बभूवुः ' श्रवणादेव प्रतिपद्यन्ते न कारणं पृच्छन्त्यथापरपक्षीयाणां[13] कविः पञ्चालचण्डः परिपृच्छको बभूवांबु[14] पृथगुद्गीथदोषान्भवन्तो ब्रुवन्त्विति ' तद्वाच्युपलक्षयेद्वर्णाक्षरपदाङ्कशो ' विभक्त्यामृषिनिषेवितामिति वाचं[15] स्तुवन्ति[16] ' तस्मात्कारणं ब्रूमो ' वर्णानामयमिदं भविष्यतीति ' षडङ्गविदस्तत्तथाधीमहे ' किं छन्द इति ' गायत्रं हि छन्दो ' गायत्री वै देवानामेकाक्षरा

---

1) द्विवर्णा B; 2) निर्वृतः A und B; 3) °देस्तिस्रा B; 4) °तुर्या C und E; 5) ? ? नदानेप्र° E; प्रदान fehlt in C; 6) द्व्यस्तानं A und E; वायस्थानं B; द्वियस्थानं C; 7) कपद्यो B; कन्यो E; 8) प्रेयः A; 9) विवृत्त° B und C; 10) विद्युत A, B und C; विद्युता E; 11) °विचनानि A und C; 12) संइं नाध्या° A und C; संहिं ना° B; सस्यं नध्या° E; 13) Hinter पृच्छन्ति erwartet man इति; °पक्षियाणां A pr. man. und E; 14) ?; °वान्वु B; 15) वार्च B; 16) सुवन्ति B.

श्वेतवर्णा च व्याख्याता । द्वौ द्वादशकौ वर्गावितद्वै व्याकरणं[1] धात्वर्थवचनं शैक्ष्यं[2] छन्दोवचनं चायोत्तरौ द्वौ द्वादशकौ[3] वर्गौ वेदरहस्यिकी व्याख्याता । मन्त्रः कल्पो ब्राह्मणमृग्यजुःसामाथर्वाणेषा[4] व्याहृतिश्चतुर्णां वेदानामानुपूर्वेणोभूर्भुवः[5] स्वरिति व्याहृतयः ॥ २७ ॥

असमीक्ष्यप्रवल्हितानि[6] श्रूयन्ते । द्वापरादावृषीणामेकदेशो[7] दोषपतिरिह[8] चिन्तामापेदे त्रिभिः सोमः पातव्यः समाप्तमिव भवति । तस्मादृग्यजुःसामान्यपक्रान्तेजांस्यासंस्तत्र महर्षयः परिदेवयां चक्रिरे । महच्छोकभयं प्राप्ताः स्मो । न चैतत्सर्वैः समभिहितं ।[9] ते वयं भगवन्तमेवोपधावाम[10] । सर्वेषामेव शर्म भवानीति[11] । ते तथेत्युक्त्वा तूष्णीमतिष्ठन्नानुपसन्नेभ्य[12] इत्युपोपसीदामीति[13] नीचैर्बभूवुः[14] । स एभ्य उपनीय प्रोवाच । मामिकामेव व्याहृतिमादित[15] आदितः कृणुध्वमित्येवं[16] मामका आधीयन्ते नर्ते भृग्वङ्गिरोविद्भ्यः[17] सोमः पातव्य । ऋत्विजः पराभ-

---

1) व्याकर्णं B; 2) शैत्तं C und E; 3) द्वाशकौ A; द्वदशकौ C; 4) सामाथर्वा त्वेषां E; 5) वेदानामनुरपू° A, B und C; 6) असंमीक्ष्य° A, प्रवल्हि° alle hss.; 7) द्वापदादृणावृषी° C; 8) दोषपतौ° E; 9) समहितं C; 10) °धवाम B; 11) भवानति B; भवानिति A; 12) तूष्णामति° B; 13) ? man erwartet 1 P. Plur.; 14) °भूव: E; 15) व्याहृतिर्मादित B; व्याहृतिरादित E; 16) कृणुध्व° A, C und E; 17) °वद्धः C und E.

वन्ति ' यजमानो रजसापध्वस्यति ' श्रुतिश्चापध्वस्ता तिष्ठतीत्येवमेवोत्तरोत्तराद्योगात्तोकं तोकं प्रशाध्वमित्येवं प्रतापो[1] न पराभविष्यतीति ' तथा ह तथा ह भगवन्निति प्रतिपेदिर आप्याययंस्ते तथा वीतशोकभया बभूवुस्तस्माद्ब्रह्मवादिन ओंकारमादितः कुर्वन्ति ' ॥ २८ ॥

किं देवतमित्यृचामग्निर्दैवतं ' तदेव ज्योतिर्गायत्रं छन्दः ' पृथिवी स्थानमग्निमीळे[2] पुरोहितं[3] यज्ञस्य देवमृत्विजं होतारं रत्नधातममित्येवमादिं कृत्वा ऋग्वेदमधीयते ' यजुषां वायुर्दैवतं[4] ' तदेव ज्योतिस्त्रैष्टुभं छन्दो ' ऽन्तरिक्षं[5] स्थानमिषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण इत्येवमादिं[6] कृत्वा यजुर्वेदमधीयते ' साम्नामादित्यो देवतं ' तदेव ज्योतिर्जागतं[7] छन्दो ' द्यौः स्थानमग्न आयाहि वीतये गृणानो हव्यदातये नि होता सत्सि[8] बर्हिषीत्येवमादिं[9] कृत्वा सामवेदमधीयते ' ऽथर्वणां चन्द्रमा देवतं[10] ' तदेव ज्योतिः ' सर्वाणि छन्दांस्यापः स्थानं ' शं नो देवीरभिष्टय इत्येवमादिं कृत्वाथर्ववेदमधीयते ' ऽद्भ्यः स्थावरजङ्गमो भूतग्रामः[11] संभवति ' तस्मात्स-

1) गतापो C; 2) °ग्निमिळे E; 3) पुरोहितं E; 4) °वतं E; 5) ऽन्तरीक्षं E; 6) °मादि E; 7) ज्योतिज्ञीतिं B; 8) त्सि B; सत्सिता E; 9) °मादि E; 10) देवतां B und E; 11) °ग्रामं A.

र्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयमंतरैते[1] त्रयो वेदा भृगूनङ्गिरसः श्रिता इत्यबिति[2] प्रकृतिरपामोंकारेण[3] चैतस्माद्व्यासः पुरोवाच भृग्वङ्गिरोविदा[4] संस्कृतो[5] ऽन्यान्वेदानधीयीत नान्यत्र संस्कृतो[6] भृग्वङ्गिरसो ऽधीयीत सामवेदे ऽथ खिलश्रुतिर्ब्रह्मचर्येण[7] चैतस्मादथर्वाङ्गिरसो ह यो वेद स[8] वेद[8] सर्वमिति ब्राह्मणम् ॥ २९ ॥

अध्यात्ममात्मभैषज्यमात्मकैवल्यमोंकार[9] आत्मानं निरुध्य सङ्गममात्रीं भूतार्थचिन्तां[10] चिन्तयेदतिक्रम्य[11] वेदेभ्यः सर्वपरमध्यात्मफलं प्राप्नोतीत्यर्थः सवितर्कं ज्ञानमयमित्येतैः प्रश्नैः प्रतिवचनैश्च यथार्थं पदमनुविचिन्त्य प्रकरणज्ञो हि प्रबलो विषयी स्यात्सर्वस्मिंन्वाकोवाक्य इति ब्राह्मणम् ॥ ३० ॥

एतद्ध स्मैतद्विद्वांसमेकादशाक्षं[12] मौद्गल्यं ग्लावो[13] मैत्रेयो ऽभ्याजगाम स तस्मिन्ब्रह्मचर्यं[14] वसतो[15] विज्ञायोवाच[16] किं स्विन्मर्या[17] अयं तन्मौद्गल्यो[18] ऽध्येति

---

1) °न्तारते E; 2) So Ed. B. Ind. इत्यति A und C; इत्यविति B; इत्यपिति E; 3) प्रकृतिस्यामोंकारेणा B; 4) °विदां B; 5) स्तुतो B; 6) संस्तुतो B; 7) खिलंश्रुतिब्रह्म° A und B; 8) Fehlt in B; 9) °कारं C; 10) °चितां A; 11) °क्राम्य A; °क्रन C; 12) ?, vielleicht °दशाक्तरं; 13) ग्लावौ B; ग्लावा E; 14) ? vielleicht °चर्ये; 15) ? C वसन्तो; vielleicht वसद्; 16) विज्ञावाचो B; 17) स्विनार्या A; 18) °द्गल्यौ C.

यदस्मिन्ब्रह्मचर्यं[1] वसतीति[2] । तद्धि मौद्गल्यस्यान्तेवासी शुश्राव । स आचार्यायावव्र्याचचष्टे[3] । दुरधीयानं[4] वा अयं भवन्तमवोचद्यो ऽयमद्यातिथिर्भवति[5] । किं[6] सौम्य[7] विद्वानिति । त्रीन्वेदान्ब्रूते भो इति । तस्य सौम्य[7] यो विपष्टो[8] विजिगीषो ऽन्तेवासी तं मे ह्वयेति । तमाजुहाव[9] । तमभ्युवाचासाविति[10] । भो इति । किं सौम्य[7] त आचार्यो ऽध्येतीति । त्रीन्वेदान्ब्रूते भो इति । यन्नु खलु सौम्यास्माभिः[11] सर्वे वेदा[12] मुखतो गृहीताः कथं त एवमाचार्यो भाषते । कथं नु शिष्टाः शिष्टेभ्य एवं भाषेरन्यं ह्येनमहं[13] प्रश्नं[14] पृच्छामि न[15] तं विवक्ष्यति[16] न ह्येनमध्येतीति । स ह मौद्गल्यः[17] स्वमन्तेवासिनमुवाच[18] परेहि सौम्य[19] ग्लावं मैत्रेयमुपसीदाधीहि भोः सावित्रीं गायत्रीं चतुर्विंशतियोनिं द्वादशमिथुनां । यस्या भृग्वङ्गिरसश्चक्षुर्यस्यां सर्वमिदं श्रितं तां भवान्प्रब्रवीत्विति । स चेत्सौम्य[20] दुरधीयानो भविष्यत्याचार्योवाच[21] ब्रह्मचारी ब्रह्मचारिणो[22]

---

1) So alle Hss., ed. B. Ind. hat °चर्ये; 2) वसती B; 3) Man erwartet °चचक्षे; 4) °यानां C; 5) °वतिर्व B; 6) कं B; 7) सोम्य A; 8) त्रिपृष्ट C; 9) तस्माजुहाव A und E; 10) °साविति B; °साविवि C; 11) सोम्या° A und E; 12) देवा C; 13) ह्येतमहं A; 14) Fehlt in B; 15) Fehlt in E; 16) व्यवक्ष्यति E; विवक्षति C; 17) मौद्गल्या B; 18) °वासिन उवाच E; 19) सोम्य A und B; 20) चेत्सोम्य A; 21) °त्याचर्योवाच B; hinter भविष्यति scheint इति ausgefallen zu sein; 22) °चारिणो A, C und E.

सावित्रीं प्राहेति वक्ष्यति तत्त्वं ब्रूयाद्दुरधीयानं तं वै भवान्मौद्गल्यमवोचत्स त्वा यं प्रश्नमप्राक्षीन्न[1] तं व्यवोचः' पुरा संवत्सरादार्तिमारिष्यसीति[2]' ॥ ३१ ॥

स तत्राजगाम यत्रेतरो बभूव' तं ह पप्रच्छ' स ह न[3] प्रतिपेदे' तं होवाच दुरधीयानं तं वै भवान्मौद्गल्यमवोचत्स त्वा यं प्रश्नमप्राक्षीन्न[4] तं व्यवोचः' पुरा संवत्सरादार्तिमारिष्यसीति[5]' स ह मैत्रेयः[6] स्वानन्तेवासिन उवाच यथार्थं भवन्तो[7] यथागृहं यथामनो विप्रसृज्यन्तां' दुरधीयानं वा अहं मौद्गल्यमवोचं' स मा यं[8] प्रश्नमप्राक्षीन्न[9] तं व्यवोचं' तमुपैष्यामि[10]' शान्तिं करिष्यामीति' स ह मैत्रेयः[11] प्रातः समित्पाणिर्मौद्गल्यमुपससादासौ[12] वा[12] अहं भो मैत्रेयः[13]' किमर्थमिति' दुरधीयानं वा अहं[14] भवन्तमवोचं[15]' त्वं[16] मा यं प्रश्नमप्राक्षीर्न[17] तं व्यवोचं' त्वामुपैष्यामि[18]' शान्तिं करिष्यामीति'

---

1) °पराक्षीन E; 2) °मार्ष्यसीति A, C und E; 3) न: E; 4) °मपराक्षीन्न E; 5) °तीति C; 6) मैत्रे B; मौद्गल्य: C und E; 7) भवन्तो B; 8) य B; 9) °मपराक्षीन्न E; °मप्रक्षीन्न C; °मप्राक्षीन्तं B; 10) So ed. B. Ind.; alle hss. तमुपेक्षामि; 11) मैत्रेयं B; 12) So corr.; °दासौत्रो A pr. m.; °दासा वा A sec. man. B, C und E; 13) Man erwartet hinter „मैत्रेय:" इति; 14) अ B; अहं E; 15) °मभवोचं B; °मावाचं E; 16) त्वां B; 17) So corr.; A, B und C °प्रक्षीन्न; E °पराक्षीन्न; 18) So B Ind.; A, C und E °पेक्षामि; B °पश्यामि.

स होवाचात्र वा ऽपेतं च सर्वं च कृतं पापकेन त्वा यानेन [1] चरन्तमाहुर्यो ऽयं [2] मम कल्याणस्तं ते ददामि [3]' तेन याहीति स होवाचैतदेवात्रात्विषं [4] चानृशंस्यं च यथा भवानाहोपायामि [5] त्वेव [6] भवन्तमिति' तं होपेयाय' तं होपेत्य पप्रच्छ किं स्विदाहुर्भोः सवितुर्वरेण्यं भर्गो देवस्य कवयः किमाहुर्धियो विचक्ष्व यदि ताः प्रवेत्थ [7]' प्रचोदयात्सविता [8] याभिरेतीति' तस्मा एतत्प्रोवाच वेदांश्छन्दांसि [9] सवितुर्वरेण्यं' भर्गो देवस्य कवयो ऽन्नमाहुः कर्माणि धियस्तदु ते [10] प्रब्रवीमि प्रचोदयात्सविता [11] याभिरेतीति' तमुपसंगृह्य पप्रच्छाधीहि भोः कः सविता का सावित्री' ॥ ३२ ॥

मन एव सविता वाक्सावित्री' यत्र ह्येव मनस्तद्वाग्यत्र [12] वै वाक्तन्मन इत्येते द्वे योनी एकं मिथुनमग्निरेव सविता पृथिवी सावित्री' यत्र ह्येवाग्निस्तत्पृथिवी यत्र वै पृथिवी तदग्निरित्येते द्वे योनी एकं मिथुनं' वायुरेव सवितान्तरिक्षं सावित्री' यत्र ह्येव वायुस्तदन्तरिक्षं यत्र

---

1) ? ? 2) य C; 3) दधामि E; 4) °त्रार्त्विषं A; °त्रात्रिषं B; °वान्त्रात्विषं C; 5) °होयामि B; 6) So corr.; alle hss. त्येव; 7) प्रवेकु B; प्रवेह C; 8) °यन्तसविता A, B und E; 9) So corr.; die hss. वेदाच्छ°; 10) वे E; 11) So B. Ind.; die hss. प्रचोदयन्त्स°; 12) °मनस्तद्वाकयत्र B.

वा[1] अन्तरिक्षं[1] तद्वायुरित्येते द्वे योनी एकं मिथुनमादित्य एव सविता द्यौः सावित्री[2] ' यत्र ह्येवादित्यस्तद्द्यौर्यत्र[3] वै द्यौस्तदादित्य इत्येते द्वे योनी एकं मिथुनं ' चन्द्रमा एव सविता नक्षत्राणि सावित्री ' यत्र ह्येव चन्द्रमास्तन्नक्षत्राणि यत्र वै नक्षत्राणि तच्चन्द्रमा इत्येते द्वे योनी एकं[4] मिथुनमहरेव सविता रात्रिः सावित्री ' यत्र ह्येवाहस्तद्रात्रिर्यत्र[5] वै रात्रिस्तदहरित्येते द्वे योनी एकं मिथुनमुष्णमेव सविता शीतं सावित्री[6] ' यत्र ह्येवोष्णं तच्छीतं यत्र वै शीतं तदुष्णमित्येते[7] द्वे योनी एकं मिथुनमभ्रमेव[8] सविता वर्षं सावित्री ' यत्र ह्येवाभ्रं तद्वर्षं यत्र वै वर्षं तदभ्रमित्येते द्वे योनी एकं[9] मिथुनं ' विद्युदेव सविता स्तनयित्नुः सावित्री ' यत्र ह्येव विद्युत्तत्स्तनयित्नुर्यत्र[10] वै स्तनयित्नुस्तद्विद्युदित्येते द्वे योनी एकं मिथुनं ' प्राण[11] एव सवितान्नं सावित्री ' यत्र ह्येव प्राणस्तदन्नं यत्र वा[5] अन्नं[12] तत्प्राण इत्येते द्वे योनी एकं मिथुनं ' वेदा एव सविता छन्दांसि सावित्री यत्र ह्येव वेदास्तच्छन्दांसि यत्र वै छन्दांसि तद्वेदा इत्येते द्वे

---

1) वान्तरिक्षं A, C und E; 2) सावित्रा B; 3) ह्येवादित्यस्तत्र द्यौ A; 4) एक E; 5) ह्येवावह° C; 6) सवित्रीं C; 7) °ष्णमिते B; 8) Von अभ्रमेव bis विद्युदेव fehlt in E; 9) एक C; 10) तत् fehlt in C; 11) प्राणा B; 12) वान्नं C; वा अन्नं E.

योनी एकं मिथुनं ' यज्ञ एव सविता दक्षिणाः सावित्री [1] ' यत्र ह्येव यज्ञस्तद्दक्षिणा यत्र वै दक्षिणास्तद्यज्ञ इत्येते द्वे योनी एकं मिथुनमेतद्ध स्मैतद्विद्वांसमोपाकारिमासस्तुर्ब्रह्मचारी [2] ते संस्थित इत्यथैत आसस्तुराचित [2] इव चितो [3] बभूवाथोत्थाय प्राव्राजीदित्येतद्वा [4] अहं वेद नैतासु योनिष्वित [5] एतेभ्यो वा मिथुनेभ्यः संभूतो ब्रह्मचारी मम पुरायुषः [6] प्रेयादिति ' ॥ ३३ ॥

ब्रह्म हेदं श्रियं प्रतिष्ठामायतनमैक्षत [7] ' तत्तपस्व ' यदि तद्व्रते ध्रियेत तत्सत्ये प्रत्यतिष्ठत्स [8] सविता सावित्र्या ब्राह्मणं सृष्ट्वा तत्सावित्रीं पर्यदधात्तत्सवितुर्वरेण्यमिति [9] सवित्र्याः प्रथमः पादः ' पृथिव्यर्चं [10] समदधादृचाग्निमग्निना [11] श्रियं ' श्रिया स्त्रियं ' स्त्रिया मिथुनं ' मिथुनेन प्रजां ' प्रजया कर्म [12] ' कर्मणा तपस्तपसा [13] सत्यं ' सत्येन ब्रह्म ' ब्रह्मणा [14] ब्राह्मणं ' ब्राह्मणेन व्रतं ' व्रतेन वै ब्राह्मणः संशितो [15] भवत्यशून्यो भवत्यविच्छिन्नो भवत्यविच्छिन्नो ऽस्य तन्तुरविच्छिन्नं [16] जीवनं [17] भवति य एवं

---

1) सवित्री A; 2) ? ? 3) चिन्तो B; 4) प्रव्राजीदि° A, C und E; प्राव्राजीद्दि° E; 5) योनिष्वित C und E; 6) पूरायुषः E; 7) प्रतिष्ठा° E; 8) स fehlt in B; 9) पर्यदध्यात्तत्सा° B; 10) पृथिव्यर्चं E; 11) °चाग्निमग्निना E; 12) Fehlt in E; 13) तपस् fehlt in B; 14) ब्राह्मणा C; 15) शंसितो C; 16) तन्तुमवि° B; 17) जीवन E; C hat hinter „जीवन" „भवनं" eingefügt.

वेद यश्चैवं विद्वानेवमेतं सावित्र्याः[1] प्रथमं पादं व्याचष्टे' ॥ ३४ ॥

भर्गो देवस्य धीमहीति[2] सावित्र्या द्वितीयः पादो' ऽन्तरिक्षेण यजुः समदधाद्यजुषा वायुं' वायुनाभ्रमभ्रेण वर्षं वर्षेणौषधिवनस्पतीनोषधिवनस्पतिभिः[3] पशून्पशुभिः कर्म[4]' कर्मणा तपस्तपसा सत्यं' सत्येन ब्रह्म' ब्रह्मणा ब्राह्मणं' ब्राह्मणेन व्रतं' व्रतेन वै ब्राह्मणः संशितो भवत्यशून्यो भवत्यविछिन्नो भवत्यविछिन्नो ऽस्य तन्तुरविछिन्नं जीवनं भवति य एवं वेद यश्चैवं विद्वानेवमेतं[5] सावित्र्या[6] द्वितीयं पादं व्याचष्टे' ॥ ३५ ॥

धियो यो नः प्रचोदयादिति सावित्र्यास्तृतीयः पादो' दिवा साम समदधात्साम्नादित्यमादित्येन[7] रश्मींरश्मिभिर्वर्षं' वर्षेणौषधिवनस्पतीनोषधिवनस्पतिभिः पशून्पशुभिः कर्म' कर्मणा तपस्तपसा सत्यं' सत्येन ब्रह्म' ब्रह्मणा ब्राह्मणं' ब्राह्मणेन व्रतं' व्रतेन वै ब्राह्मणः संशितो[8] भवत्यशून्यो भवत्यविछिन्नो भवत्यविछिन्नो ऽस्य तन्तुरविछिन्नं जीवनं भवति य एवं वेद यश्चैवं विद्वानेवमेतं सावित्र्यास्तृतीयं पादं व्याचष्टे' ॥ ३६ ॥

---

1) सवित्र्याः A und E; 2) धिमहिति E; धीमहिति B; 3) वर्षेणौषधि° A; 4) Fehlt in B und E; 5) विद्वानेवमत्र तं A; 6) सावित्र्यां B; 7) °दध्यत्सा° B; °दधात्साम्नादित्य° A; 8) शंशितो C.

तेन ह वा एवंविदुषा ब्राह्मणेन ब्रह्माभिपन्नं ग्रसितं परामृष्टं । ब्रह्मणाकाशमभिपन्नं ग्रसितं परामृष्टमाकाशेन वायुरभिपन्नो ग्रसितः[1] परामृष्टो । वायुना ज्योतिरभिपन्नं ग्रसितं परामृष्टं । ज्योतिषापो ऽभिपन्ना ग्रसिताः परामृष्टा । अद्भिर्भूमिरभिपन्ना ग्रसिता परामृष्टा । भूम्यान्नमभिपन्नं ग्रसितं परामृष्टमन्नेन प्राणो ऽभिपन्नो ग्रसितः परामृष्टः । प्राणेन मनो ऽभिपन्नं ग्रसितं परामृष्टं । मनसा वागभिपन्ना ग्रसिता परामृष्टा । वाचा वेदा अभिपन्ना ग्रसिताः परामृष्टा । वेदैर्यज्ञो ऽभिपन्नो ग्रसितः परिमृष्टस्तानि ह वा एतानि द्वादशमहाभूतान्येवंविदि[2] प्रतिष्ठितानि । तेषां यज्ञ[3] एव परार्ध्यः[4] । ॥ ३७ ॥

तं ह स्मैतमेवंविद्वांसो मन्यन्ते विद्मैनमिति याथातथ्यमविद्वांसो[5] । ऽयं यज्ञो वेदेषु प्रतिष्ठितो । वेदा वाचि[6] प्रतिष्ठिता । वाङ्मनसि[7] प्रतिष्ठिता । मनः प्राणे[8] प्रतिष्ठितं[8] । प्राणो[8] ऽन्ने[8] प्रतिष्ठितो । ऽन्नं भूमौ प्रतिष्ठितं । भूमिरप्सु प्रतिष्ठितापो ज्योतिषि[9] प्रतिष्ठिता । ज्योतिर्वायौ[10] प्रतिष्ठितं । वायुराकाशे[11] प्रतिष्ठित[12] । आकाशं

1) ग्रसितं A und B; 2) °वंविधि A pr. man. und C; 3) यज्ञं C; 4) परार्ध्य: C; 5) यथा° A und B; याता° E; 6) वाचि E; 7) वङ्मनसि A; 8) Fehlt in E; 9) ज्योतींषि B; 10) °र्वायो B; 11) °काशो C; 12) प्रतिष्ठितम् A, B und E.

ब्रह्मणि प्रतिष्ठितं ब्रह्म ब्राह्मणे ब्रह्मविदि[1] प्रतिष्ठितं यो ह वा एवंवित्स[2] ब्रह्मवित्पुण्यां च कीर्तिं[3] लभते सुरभींश्च[4] गन्धान्त्सो ऽपहतपाप्मानन्तां[5] श्रियमश्नुते य एवं वेद यश्चैवंविद्वानेवमेतां[6] वेदानां मातरं सावित्रीं संपदमुपनिषदमुपास्त इति ब्राह्मणम् ॥ ३८ ॥

आपो गर्भं जनयन्तीरित्यपां[7] गर्भः पुरुषः स यज्ञो[8] ऽद्भिर्यज्ञः[9] प्रणीयमानः[10] प्राङ्गायते[11] तस्मादाचमनीयं पूर्वमाहारयति स यदाचामति त्रिराचामति द्विः परिशुम्भत्यायुरवरुध्य[12] पाप्मानं निर्णुदत्युपसाद्य यजुषोद्धृत्य[13] मन्त्रान्प्रयुज्यावसाय प्राचीः शाखाः संधाय[14] निरङ्गुष्ठे पाणावमृतमस्यमृतोपस्तरणमस्यमृताय त्वोपस्तृणामीति पाणावुदकमानीय[15] जीवा स्थेति सूक्तेन त्रिराचामति स यत्पूर्वमाचामति सप्त प्राणांस्तानेतेनास्मिन्नाप्याययति[16] या ह्येमा बाह्याः शरीरान्मात्रास्तद्यथैतदग्निं[17] वायुमादित्यं चन्द्रमसमपः पशूनन्यांश्च प्रजास्तानेतेनास्मिन्नाप्याययत्या-

---

1) °विधि C; 2) एवंविद्वत्मा C; 3) कीर्त्तिं C und E; कीर्त्ति B; 4) सुरभीश्च A und E; 5) So corr.; °नन्त्यां A; °नां श्च B; °नन्त C; °नन्त्यं E; 6) So B. Ind.; die hss. °तं; 7) जनयन्ति° A pr. man. und B; 8) यज्ञे B; 9) निर्यज्ञः B; 10) प्रयणीमानः B; प्रणायमानः E; 11) प्राङ्गयते B; 12) परिशुंभन्त्या° B; 13) °षोद्धत्य B; °षोद्धृत्य C; 14) संधाया A, C und E; संधयो B; 15) नपु प्राणावुदकमानीया B; 16) °प्यायति E; 17) °त्रास्तथेष्येतदग्नि B;

पो[1] ऽमृतं । स यद्द्वितीयमाचामति सप्तापानांस्तानेतेनास्मिन्नाप्याययति[2] । या इमा बाह्याः[3] शरीरान्मात्रास्तद्यथैतत्पौर्णमासीमष्टकाममावास्यां श्रद्धां दीक्षां[4] यज्ञं दक्षिणास्तानेतेनास्मिन्नाप्याययत्यापो[5] ऽमृतं । स यत्तृतीयमाचामति सप्त व्यानांस्तानेतेनास्मिन्नाप्याययति या इमा बाह्याः शरीरान्मात्रास्तद्यथैतत्पृथिवीमन्तरिक्षं दिवं[6] नक्षत्राण्यृतूनार्तवान्संवत्सरांस्तानेतेनास्मिन्नाप्याययत्यापो ऽमृतं । पुरुषो ब्रह्मायाप्रीङ्गिगमो[7] भवति तस्माद्धि विद्वान्पुरुषमिदं पुण्डरीकमिति । प्राण एष स पुरि[8] शेते संपुरि[9] शेत[10] इति । पुरिशयं[11] सन्तं प्राणं पुरुष इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः[12] । स यत्पूर्वमाचामति पुरस्ताद्धोमांस्तेनास्मिन्नवरुन्द्धे[13] । स[14] यद्द्वितीयमाचामत्याज्यभागौ तेनास्मिन्नवरुन्द्धे[13] । स यत्तृतीयमाचामति संस्थितहोमांस्तेनास्मिन्नवरुन्द्धे[13] । स यद्द्विः परिशुम्भति[15] तत्संमित्संबर्हिः[16] । स यत्सर्वाणि खानि सर्वं देहमाप्याययति यच्चान्यदातारं[17] मन्त्रकार्यं यज्ञे स्क-

---

1) प्रज्ञांस्ता° B; 2) °प्यायवत्याति B; 3) बह्यो: B; 4) दीक्ष्यां B; 5) °नेतेस्मानास्मिन्न्° A; 6) द्दि C; 7) ? ? so A und C; °प्रियं निगमो B; °प्रियं निगमो E; 8) पूरि E; 9) संपुरि B und E; 10) शन्त C; 11) पुरीयवं E; 12) प्रत्तद्विष: A; 13) °वरुन्धे A; 14) Von स bis स यद्द्विः परि° fehlt in E; 15) °म्भवति B; 16) ? ?; 17) ?

न्दति सर्वं तेनास्मिन्नवरुन्द्धे' स यदोंपूर्वान्मन्त्रान्प्रयुङ्क्त आ सर्वमेधादेते ऋतव एत एवास्य सर्वेषु लोकेषु सर्वेषु देवेषु सर्वेषु वेदेषु सर्वेषु भूतेषु सर्वेषु सत्त्वेषु कामचारः कामविमोचनं भवत्यर्धे[1] च न प्रमीयते य एवं वेद तदप्येतदृचोक्तमापो भृग्वङ्गिरो रूपमापो भृग्वङ्गिरोमयं सर्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयमन्तरैते त्रयो वेदा भृगूनङ्गिरसो ऽनुगाः ॥ अपां पुष्पं मूर्तिराकाशं पवित्रमुत्तममित्याचम्याभ्युक्ष्यात्मानमनुमन्त्रयत इन्द्र जीवेति ब्राह्मणं' ॥ ३९ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे प्रथमः प्रपाठकः ॥

ओं ब्रह्मचारीष्णंश्चरति[2] रोदसी[3] उभे इत्याचार्यमाह[4] 'तस्मिन्देवाः संमनसो[5] भवन्तीति वायुमाह' स सद्य एति पूर्वस्मादुत्तरं समुद्रमित्यादित्यमाह' दीक्षितो दीर्घश्मश्रुरेव[6] दीक्षित एष दीर्घश्मश्रुरेष[7] एवाचार्यस्थाने तिष्ठन्नाचार्य इति स्तूयते' वैद्युतस्थाने तिष्ठन्वायुरिति

---

1) अर्धे ??; 2) ब्रह्माचा° A pr. m.; ब्रह्मचारीष्ठं° B; 3) रोदसि A pr. man.; 4) °चार्यमाह E; 5) मनसो E; 6) °श्मश्रुरेव C; °श्मश्रुरेव E; °श्रूरेव B; 7) °श्रूरेव B; °श्रुरेव E.

स्तूयते[1] द्यौस्थाने[2] तिष्ठन्नादित्य इति स्तूयते' तदप्येतदृचोक्तं ब्रह्मचारीष्णन्निति[3] ब्राह्मणम्' ॥ १ ॥

जायमानो ह वै ब्राह्मणः सप्तेन्द्रियाण्यभिजायते[4] ब्रह्मवर्चसं च यशश्च स्वप्नं च क्रोधं च श्लाघां च रूपं च पुण्यमेव गन्धं सप्तमं' तानि ह वा अस्यैतानि ब्रह्मचर्यमुपेत्यापक्रामन्ति[5]' मृगानस्य ब्रह्मवर्चसं गच्छत्याचार्यं[6] यशो' ऽजगरं स्वप्नो' वराहं क्रोधो' ऽपः[7] श्लाघा[8]' कुमारीं[9] रूपमोषधिवनस्पतीन्पुण्यो[10] गन्धः' स यन्मृगाजिनानि[11] वस्ते तेन तद्ब्रह्मवर्चसमवरुन्द्धे यदस्य मृगेषु भवति' स ह स्नातो ब्रह्मवर्चसी भवति' स यदहरहराचार्याय[12] कर्म करोति तेन तद्यशो ऽवरुन्द्धे यदस्याचार्ये भवति' स ह स्नातो यशस्वी[13] भवति' स यत्सुषुप्सुर्निद्रां निनयति तेन तं स्वप्नमवरुन्द्धे यो ऽस्याजगरे भवति' तं ह स्नातं स्वपन्तमाहुः[14] स्वपितु मैनं बोबुधयेति[15]' स यत्क्रुद्धो वाचा न कंचन हिनस्ति पुरुषात्पुरुषात्पा-

---

1) Fehlt in A; 2) Fehlt in E; 3) °चारीन्द्यमिति B; 4) So corr.; alle hss. °जायन्ते; 5) So corr.; alle hss. °मुपेतोप°; C °मुपेतोपक्रामति'; 6) °चार्य C und E; 7) So corr.; alle hss. ऽप; 8) स्नाघं B; 9) कुमारि E; 10) रूपमोषधीत्र° B; °न्पुण्ये E; 11) °गानिनानि E; 12) यदहराचा° E; 13) यशस्व B; 14) स्वपतमाहुः E; 15) बोबुधेयेति B.

पीयानिव मन्यमानस्तेन तं क्रोधमवरुन्द्धे यो ऽस्य वराहे भवति । तस्य ह[1] स्नातस्य[1] क्रोधाः[2] श्लाघीयसं विशन्ति । ऽप्यह्निः श्लाघमानो न स्नायात्तेन तां[3] श्लाघामवरुन्द्धे यास्याप्सु भवति । स ह स्नातः[4] श्लाघीयो ऽन्येभ्यः श्लाघ्यते । ऽथैतद्ब्रह्मचारिणो रूपं यत्कुमार्यास्तां[5] नग्नां[6] नोदीक्षेतेति[7] वेति वा मुखं विपरिधापयेत्तेन[8] तद्रूपमवरुन्द्धे यदस्य कुमार्यां[9] भवति । तं ह स्नातं कुमारीमिव निरीक्षन्ते[10] । ऽथैतद्ब्रह्मचारिणः पुण्यो गन्धो य ओषधिवनस्पतीनां तासां पुण्यं गन्धं प्रच्छिद्य नोपजिघ्रेत्तेन तं पुण्यं गन्धमवरुन्द्धे यो ऽस्यौषधिवनस्पतिषु[11] भवति । स ह स्नातः पुण्यगन्धिर्भवति । ॥ २ ॥

स वा एष उपयंश्चतुर्धा पैत्यग्निं[12] पादेनाचार्यं पादेन[13] ग्रामं पादेन मृत्युं[14] पादेन । स यदहरहः समिध[15] आहृत्य[15] सायंप्रातरग्निं[16] परिचरेत्तेन तं पादमवरुन्द्धे यो[17]

---

1) Fehlt in B; 2) क्रोधात् C; क्रोधान् E; Der Plural ist nicht deutlich; vielleicht क्रोधः श्लाघीयसं विशति zu lesen; 3) So corr.; die hss. तं; B त; 4) स्नातं E; 5) यत् fehlt in C; 6) नग्नान् B; 7) So corr.; A, B und C haben: नोदीक्षेदेति; E नोदीक्ष्येदेति; 8) वि fehlt in E; 9) कुमर्यां B; 10) °क्षते E; 11) °तीषु B; 12) उपयांश्च° A, B und C; 13) पादे पादेन B; 14) मृत्यु E; 15) समिधाहृत्य B; समिधा आहृत्य C; 16) प्रातरग्नि E; 17) Von यो bis यो ऽस्याचार्ये fehlt in C.

ऽस्याग्नौ भवति ' स यदहरहराचार्याय कर्म करोति तेन तं पादमवरुन्द्धे यो ऽस्याचार्ये भवति ' स यदहरहर्ग्रामं प्रविश्य[1] भिक्षामेव[2] परीप्सति न मैथुनं तेन तं पादमवरुन्द्धे यो ऽस्य[3] ग्रामे[4] भवति[5] ' स यत्क्रुद्धो वाचा न कंचन हिनस्ति पुरुषात्पुरुषात्पापीयानिव[6] मन्यमानस्तेन तं पादमवरुन्द्धे यो ऽस्य मृत्यौ भवति ' ॥ ३ ॥

पञ्च ह वा एते ब्रह्मचारिण्यग्नयो धीयन्ते ' द्वौ पृथग्घस्तयोर्मुखे हृदय उपस्थ एव पञ्चमः ' स यद्दक्षिणेन पाणिना स्त्रियं न स्पृशति तेनाहरहर्यजिनां लोकमवरुन्द्धे ' यत्सव्येन तेन प्रव्राजिनां ' यन्मुखेन तेनाग्निप्रस्कन्दिनां ' यद्धृदयेन[7] तेन शूराणां ' यदुपस्थेन तेन गृहमेधिनां ' तैश्चेत्स्त्रियं पराहरत्यनग्निरिव[8] शिष्यते ' स यदहरहराचार्याय कुले ऽनुतिष्ठते सो ऽनुष्ठाय ब्रूयाद्धर्म गुप्तो[9] मा गोपायेति ' धर्मो हैनं गुप्तो गोपायति[10] ' तस्य ह प्रजा[11] श्वः श्वः श्रेयसी श्रेयसीह भवति ' धाय्यैव[12] प्रतिधीयते ' स्वर्गे लोके पितॄन्निदधाति[13] ' तान्तवं न वसीत '

---

1) प्रविश्यति C; 2) भिक्षामिव A pr. man. und B; 3) स्यं B; 4) यामे B; 5) भवन्ति E; 6) पुरुषात् steht nur einmal in C; 7) यद्धृदयेन B und C; 8) पराहरति ??: man erwartet doch ein Verbum mit der Bedeutung „berühren"; 9) °र्मगुप्तगुप्तो A, C und E; 10) Diese Stelle ist nicht richtig überliefert; 11) प्रज्ञां A pr. m. प्रज्ञा: B und E; 12) ?, धाय्येव B, C und E; 13) °दध्यति B.

यस्तात्तवं वस्ते क्षत्रं वर्धते न ब्रह्म[1] ' तस्मात्तात्तवं न वसीत[2] ब्रह्म वर्धतां मा[3] क्षत्रमिति ' नोपर्यासीत ' यदुपर्यास्ते प्राणमेव तदात्मनो ऽधरं कुरुते यद्वातो वह-त्यध[4] एवासीताधः शयीताधस्तिष्ठेदधो व्रजेदेवं ह स्म वै तत्पूर्वे ब्राह्मणा ब्रह्मचर्यं चरन्ति ' तं ह स्म तत्पुत्रं भ्रातरं वोपतापिनमाहुरुपनयेतैनमित्यां समिद्धारास्त्वरिष्यन्तो ऽन्नमद्यादथाह जघनमाहुः स्नापयेतैनमित्या समिद्धारान्नं ह्येतानि व्रतानि भवन्ति ' तं चेच्छयानमाचार्यो ऽभिवदेत्स प्रतिसंहाय[5] प्रतिशृणुयात्तं चेच्छयानमुत्थाय तं चेदुत्थितमभिप्रक्रम्य तं चेदभिप्रक्रान्तमभिपलायमानमेवं ह स्म वै तत्पूर्वे ब्राह्मणा[6] ब्रह्मचर्यं चरन्ति ' तेषां ह स्म वैषा पुण्या कीर्तिर्गच्छत्या ह वा अयं सो ऽद्य[7] गमिष्यतीति '
॥ ४ ॥

जनमेजयो ह वै पारीक्षितो मृगयां चरिष्यन्हंसाभ्यामसिष्यन्नुपावतस्थ[8] इति ' तावूचतुर्जनमेजयं पारीक्षितमभ्याजगाम[9] ' स होवाच ' नमो वां भगवन्तौ को नु

1) ब्रह्मं B; 2) वसीद् E; 3) म B; 4) वहत्यध E; 5) प्रतिसद्धाय A; प्रतिह्वाय E; 6) ब्राह्मणां E; 7) ऽध्य E; सो ऽद्य ist nicht deutlich; 8) °न्हंसाभ्यामसिष्यनु° A pr. man. und B; °न्हंसाभ्यामशिष्यनु° E; 9) Man erwartet einen Dual.; इति fehlt; diese ganze Stelle ist sehr verdorben.

भगवन्ताविति ' तावूचतुर्दक्षिणाग्निश्चाहवनीयश्चेति ' स होवाच नमो वां भगवन्तौ तदाकीयतामितीहोपाराममि-ष्यंपि[1] किल देवा न रमन्ते न[2] हि[2] देवा[2] न[2] रमन्त[2]' ऽपि चैकोपारामाद्देवा[3] आराममुपसंक्रामन्तीति[4]' स होवाच नमो वां भगवन्तौ किं पुण्यमिति' ब्रह्मचर्यमिति' किं लौक्यमिति' ब्रह्मचर्यमेवेति' तत्को वेद इति' दन्तावलो धौम्रो[5]' ऽथ खलु दन्तावलो धौम्रो[6] यावति तावति काले पारीक्षितं जनमेजयमभ्याजगाम' तस्मा उत्थाय[7] स्वयमेव विष्टरं निदधौ[8]' तमुपसंगृह्य पप्रच्छाधीहि भो किं पुण्यमिति' ब्रह्मचर्यमिति' किं लौक्यमिति' ब्रह्मचर्यमेवेति' तस्मा एतत्प्रोवाचाष्टाचत्वारिंशद्वर्षं सर्ववेदब्रह्मचर्यं' तच्चतुर्धा वेदेषु व्युह्य द्वादशवर्षं[9] ब्रह्मचर्यं द्वादशवर्षाण्यवरार्धमपि स्नायंश्चरेद्यथाशक्त्यपरं[10]' तस्मा उहस्यृषभौ[11] सहस्रं ददावप्यपकीर्तितमाचार्यो ब्रह्मचारीत्येक आङ्गराकाशमधिदैवतमथाध्यात्मं ब्राह्मणो व्रतवांश्चरणवान्ब्रह्मचारी' ॥ ५ ॥

---

1) आकीयताम् ? ; °तामितिहोपा° A pr. m.; 2) Fehlt in E; 3) चैकोपराद्रदेवा A; 4) °क्रामतीति E; 5) धैम्रो C und E; hinter धौम्रो erwartet man इति; 6) धौम्रो E; 7) उच्छ्राय B; 8) निदाधौ B; 9) °वर्ष E; 10) °शक्त्यापरं C; 11) Corrupt; vielleicht तस्मा उ ह स ऋषभौ.

ब्रह्म ह वै प्रजा मृत्यवे संप्रायच्छद्ब्रह्मचारिणमेव[1] न संप्रददौ' स होवाचास्यामस्मिन्निति[2] ' किमिति ' यां रात्रीं समिधमनाहृत्य[3] वसेत्तामायुषो[4] ऽवरुन्धीयेति' तस्माद्ब्रह्मचार्यहरहः समिध आहृत्य[5] सायंप्रातरग्निं परिचरेन्नोपर्युपसादयेदथ प्रतिष्ठापयेद्यद्युपर्युपसादयेज्जीमूतवर्षी तदहः पर्जन्यो भवति ' ते[6] देवा अब्रुवन्ब्राह्मणो वा अयं ब्रह्मचर्यं चरिष्यति ' ब्रूतास्मै[7] भिक्षा इति गृहपतिर्ब्रूत बहुचारी गृहपत्न्या इति ' किमस्या[8] वृञ्जीतादत्या[9] इतीष्टापूर्तसुकृतद्रविणमवरुन्ध्यादिति[10] ' तस्माद्ब्रह्मचारिणे[11] ऽहरहर्भिक्षां[12] दद्याद्गृहिणी[13] मा मायमिष्टापूर्तसुकृतद्रविणमवरुन्ध्यादिति[14] ' सप्तमीं[15] नातिनयेत्सप्तमीमतिनयन्न[16] ब्रह्मचारी भवति ' समिद्भैक्षे सप्तरात्रमचरितवान्ब्रह्मचारी पुनरुपनेयो भवति ' ॥ ६ ॥

नोपरिशायी स्यान्न गायनो न नर्तनो[17] न सरणो न निष्ठीवेद्यद्युपरिशायी भवत्यभीक्ष्णं[18] निवासा जायन्ते[19] '

---

1) So corr.; die hss. संप्रयच्छ°; °रिणामेव E; °रिणमेवं A; 2) So corr.; die hss. होवाचास्या°; 3) °मानाहृत्य C; 4) °युषा E; 5) आहृत्य E; 6) Fehlt in E; 7) ब्रूतासौ C; 8) किं मस्या C; 9) °नाददात्य E; 10) इतीष्टापूर्ते° B; 11) °चारिणो E; 12) °क्षीं E; 13) So ed. B. Ind. die hss. °हरणी; 14) So corr.; die hss. मेयमि° ed. B. Ind. var. l. मोयमि°; 15) नप्तमी C; 16) °तिनयन A; °तिनयं नं B; °तिनयनं E; 17) नर्तनौ E; 18) भवत्याभीक्ष्णं B; 19) ज्ञायते E.

यद्गायनो भवत्यभीक्ष्णश[1] आक्रन्दान्धावन्ते' यन्नर्तनो भव-
त्यभीक्ष्णशः[2] प्रेतान्निर्हरन्ते' यत्सरणो भवत्यभीक्ष्णशः[3]
प्रजाः संविशन्ते' यन्निष्ठीवति मध्य[4] एव तदात्मनो[5] नि-
ष्ठीवति' स चेन्निष्ठीविद्दिवो नु मां यदत्रापि मधोरहं[6]
यदत्रापि रसस्य म इत्यात्मानमनुमन्त्रयते' यदत्रापि मधो-
रहं निरष्ठविषमस्मृतमग्निश्च[7] तत्सविता च पुनर्मे जठरे[8]
धत्तां[9] ॥ यदत्रापि रसस्य मे परापपातास्मृतं तदिह्वोपह्वया-
मह्वे तन्म आप्यायतां पुनरिति' न श्मशानमातिष्ठेत्स चेद-
भितिष्ठेदुदकं हस्ते कृत्वा यदीदमृतुकाम्येत्यभिमन्त्र्य[10] जप-
त्संप्रोक्ष्य परिक्रामेत्समयायोपरिव्रजेय्यदीदमृतुकाम्याघं[11]
रिप्रमुपेयिम[12] । अन्धः[12] श्लोणा इव हीयतां मा नो
ऽन्वागादघं यत इत्यथ हैतद्देवानां परिषूतं यद्ब्रह्मचारी'
तदप्येतदृचोक्तं देवानामेतत्परिषूतमनभ्यारूढं[13] चरति
रोचमानं तस्मिन्सर्वे पशवस्तत्र[14] यज्ञास्तस्मिन्नन्नं सह
देवताभिरिति ब्राह्मणम्' ॥ ७ ॥

प्राणापानौ जनयन्निति शङ्कस्य मुखे[15] मह्र्षेर्वसि-

---

1) °भीक्ष्णश B und E; 2) भवति भीक्ष्णशः B; °भीक्ष्णशः E; 3) °भीक्ष्णः शः B; °भीक्ष्णश E; 4) मध्ये C und E; 5) तदात्मानो E; 6) मधोरहं E; 7) °ग्निश्च B; 8) जरे E; 9) धात्तां E; 10) यदीदं मृ° A; यदीदमृत्यु° C; 11) °त्समयायोपरि° A sec. m.; समयाय ??; °मृत्युकाम्याघं C; 12) °यिमान्धः A, B und E; 13) °भ्यारूढं B; 14) उपयात्र° B; 15) So corr.; alle hss. मूले.

ष्ठस्य[1] पुत्र एतां वाचं ससृजे शीतोष्णाविहोत्सौ प्रादुर्भवेयातामिति[2] । तथा तच्छश्वदनुवर्तते । ऽथ[3] खलु त्रिपाणमध्ये वसिष्ठशिला[4] नाम प्रथम आश्रमो । द्वितीयः कृष्णशिलास्तस्मिन्वसिष्ठः समतपद्विश्वामित्रजमदग्नी[5] जामदग्ने तपतो[6] । गौतमभरद्वाजौ[7] सिंहौ[8] प्रभवे[9] तपतो । गुंगुर्गुगुवासे[10] तपत्यृषिर्ऋषिद्रोणे[11] ऽभ्यतपदगस्त्यो ऽगस्त्यतीर्थे तपति । दिव्यत्रिर्द्दे[12] तपति[13] । स्वयंभूः कश्यपः कश्यपतुङ्गे[14] ऽभ्यतपत्तुलवृकर्जुतरजुः[15] श्वा वराहचिल्वढिबभ्रुकाः सर्पदंष्ट्रनः[16] संहनुकृणवानाः[17] कश्यपतुङ्गदर्शनात्स्मरणावाढात्सिद्धिर्भवति । ब्राह्म्यं वर्षसहस्रमृषिवने[18] ब्रह्मचार्येकपादेनातिष्ठति[19] । द्वितीयं वर्षसहस्रं मूर्धन्येवामृतस्य[20] धारामाधारयद्ब्राह्मणयष्टाचत्वारिंशद्वर्षसहस्राणि[21] सलिलस्य पृष्ठे शिवो ऽभ्यतपत्तस्मात्तत्तपसो भूय एवाभ्यतपत्तदप्येता ऋचो ऽभिवदन्ति प्राणापानौ जनयन्निति ब्राह्मणम् । ॥ ८ ॥

1) गर्लर्षिव्र° A und B; गर्लेर्वशि° E; 2) °र्भिवेया° B; °भवेत्यायातामिति E; 3) व B; 4) वशि° C; 5) °जज्ञामदग्नी B; 6) तापतो B; 7) गोतम° B, C und E; 8) सिंहो A, C und E; 9) So ed. B. Ind.; die hss. प्रभे; 10) गुर्गुनुवासे B; गुर्गुगुर्वासे E; 11) °षिद्रोणे A, C und E; 12) दिव्यत्रिरद A, B und E; 13) भवति C; 14) कशप° C; 15) Sic.! 16) ? ?; 17) कृवानाः B; 18) वार्ष° A; 19) °तिष्ठ B, C und E; 20) °वमृतस्य C; 21) धीरामाधारया व्राह्मा° E; धारामाराधयन्त्रा° C; धारामधारयद्ब्रह्मण्य° A.

एकपाद्द्विपद[1] इति ' वायुरेकपात्तस्याकाशं पादश्चन्द्रमा
द्विपात्तस्य[2] पूर्वपक्षापरपक्षौ पादावादित्यस्त्रिपात्तस्येमे लो-
काः पादा ' अग्निः षट्पादस्तस्य पृथिव्यन्तरिक्षं[3] द्यौराप
ओषधिवनस्पतय इमानि भूतानि पादास्तेषां सर्वेषां वेदा[4]
गतिरात्मा प्रतिष्ठिताश्चतस्रो ब्रह्मणः शाखा ' अथो अङ्कः
षडिति मूर्तिराकाशश्चेत्यृचा मूर्तिर्याजुषी गतिः ' साममयं[5]
तेजो ' भृग्वङ्गिरसा मायैतद्ब्रह्मैव यज्ञश्चतुष्पाद्द्विःसंस्थित
इति ' तस्य भृग्वङ्गिरसः[6] संस्थे[7] ' अथो आङ्करेकसंस्थित
इति ' यद्धोतर्चा मण्डलैः करोति पृथिवीं[8] तेनाप्याययत्ये-
तस्यां[9] ह्यग्निश्चरति ' तदप्येतदृचोक्तमग्निवासाः पृथिव्यसि-
तज्ञूरिति '[10] यदध्वर्युर्यजुषा करोत्यन्तरिक्षं तेनाप्याययति '
तस्मिन्वायुर्न निविशते[11] कतमच्च[12] नाहरिति ' तदप्येत-
दृचोक्तमन्तरिक्षे पथिभिर्ह्रीयमाणो[13] न नि विशते[14]
कतमच्च[15] नाहः । अपां योनिः प्रथमजा ऋतस्य क्व[16]
स्विज्जातः[17] कुत आ बभूवेति ' यदुद्गाता साम्ना करोति
दिवं तेनाप्याययति ' तत्र ह्यादित्यः शुक्रश्चरति ' तदप्येत-

---

1) एकापा° A; 2) द्विपा° B; 3) °रिक्ष C; 4) वेद C; 5) °मय E; 6) भृग्वङ्गिर A; 7) स्थे B; 8) पृथिवी B; 9) तेनास्याय° E; 10) °तनूरिति E; °सिनुतरिति C; 11) निविशान्ते B; 12) कतमचा B; 13) Sic.! B. Ind. var. l. °र्हीयमाणो; 14) विशोते B; 15) कतमचा B; 16) कु B; 17) सिज्ञातः C.

दृचोक्तमुच्चा[1] पतन्तमरुणं सुपर्णमिति[2] 'यद्ब्रह्मचर्यां काण्डैः करोत्यपस्तेनाप्याययति 'चन्द्रमा ह्यप्सु चरति 'तदप्येतदृचोक्तं चन्द्रमा अप्स्वन्तरिति[3] 'तासामोषधिवनस्पतयः काण्डानि 'ततो मूलकाण्डपर्णपुष्पफलप्ररोहरसगन्धैर्यज्ञो[4] वर्तते 'ऽद्भिः कर्माणि प्रवर्तन्ते 'ऽद्भिः[5] सोमो ऽभिषूयते[6] 'तद्यद्ब्रह्माणां[7] कर्माणि कर्मण्यामन्त्रयत्यपस्तेनानुज्ञानात्यैषो[8] ह्यस्य भागस्तद्यथा भोक्ष्यमाणो[9] ऽप एव प्रथममाचामयेदप उपरिष्टादेवं यज्ञो ऽद्भिरेव प्रवर्तते 'ऽप्सु संस्थाप्यते[10] 'तस्माद्ब्रह्मा[11] पुरस्ताद्धोमसंस्थितहोमैर्यज्ञो[11] वर्तते 'ऽन्तरा हि पुरस्ताद्धोमसंस्थितहोमैर्यज्ञं[12] परिगृह्णात्यन्तरा हि भृग्वङ्गिरसो वेदानाडुह्य[13] भृग्वङ्गिरसः सोमपानं मन्यन्ते 'सोमात्मको ह्ययं वेद 'तदप्येतदृचोक्तं सोमं मन्यते पपिवानिति 'तद्यथेमां[14] पृथिवीमुदीर्णां ज्योतिषा धूमायमानां[15] वर्षं शमयत्येवं ब्रह्मा भृग्वङ्गिरोभिर्व्याहृतिभिर्यज्ञस्य विरिष्टं[16] शमयत्यग्निरादित्याय[17]

---

1) °मुच्च A pr. m. 2) संपर्णमिति E; 3) So corr.; die hss. अप्सान्तरिति; 4) °हरसं गन्धैर्यज्ञो E; 5) Fehlt in C; 6) विपूयते B; विपुयते C; 7) °ह्मणं E; 8) °त्रयन्त्य° B und E; 9) भोत्तमाणो A, B und C; 10) °प्याते B; 11) ब्रह्मो oder यज्ञो ist Interpolation; 12) पुरस्ताढोमं सं°.B; °यंज्ञे A und E; 13) वेदानोद्गृह्य A, B und E; 14) धतद्यथेमां B; तदप्येमां E; 15) °यमनां C; 16) विटरं C; विटेरिस्यं E; 17) °ग्निरादित्या C und E.

शमयन्त्येते[1] ऽङ्गिरस ' एत इदं सर्वं समाप्नुवन्ति ' वायुरापश्चन्द्रमा इत्येते भृगव ' एत इदं सर्वं समाप्याययन्त्येकमेव[2] संस्थं भवतीति ब्राह्मणम् ' ॥ १ ॥

विचारी ह वै काबन्धिः कबन्धस्याथर्वणस्य[3] पुत्रो मेधावी[4] मीमांसको[5] ऽनूचान आस[6] ' स ह स्वेनातिमानेन मानुषं वित्तं नेयाय ' तं मातोवाच ' त एवैतदन्नमवोचंस्त[7] इम[8] एषु कुरुपञ्चालेष्वङ्गमगधेषु[9] काशिकौशलेषु[10] शाल्वमत्स्येषु[11] सवशोशीनरेषूदीच्येष्वन्नमदन्तीत्यथ[12] वयं तवैवातिमानेनानाद्याः[13] स्मो ' वत्स वाहनमन्विच्छेति ' स[14] मान्धातुर्यौवनाश्वस्य[14] सार्वभौमस्य राज्ञः सोमं प्रसूतमाजगाम ' स सदो ऽनुप्रविश्यर्त्विजश्च यजमानं चामन्त्रयामास[15] ' तयाः प्राच्यो नद्यो वहन्ति[16] याश्च दक्षिणाच्यो[17] याश्च[18] प्रतीच्यो[19] याश्चोदीच्यस्ताः सर्वाः पृथङ्नामधेया[20] इत्याचक्षते[21] तासां समुद्रमभिपद्यमा-

1) Von ग्रन° bis इदं fehlt in B; B fügt इत्येव ein; 2) समास्याप्या° E; 3) कवन्धः स्या° A; 4) मेध्यवो B; 5) मिमांसको E; 6) आ A; 7) °वोचस्त A und B; 8) इमम् B und E; 9) कुरुपाञ्चा° E; 10) काशकौ° A; काशको° C und E; 11) शाल्वमत्सेषु C; शात्वमत्सेषु E; 12) So corr.; शवस उशीत° A; शवस उशीन° B; सवस्त्र उशीन C; सुवस उशीन° E; 13) So corr.; °नेनाध्यास्मो A und E; नेनानाद्यास्मो B und C; 14) संतांध्यतुर्यौवनाश्च B; 15) °मन्त C; 16) वहति B; 17) °पाच्यो B; °पाश्र्यो C; 18) याचा B; 19) पतीच्यो B; प्रतीश्र्यो C; 20) °धेयोर A und C; °धेयार B; °धेरी E; 21) धीतिगचक्षते E.

नानां छिद्यते नामधेयं समुद्र इत्याचक्षते । एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्यानाः[1] सपुराणाः सस्वराः ससंस्काराः[2] सनिरुक्ताः सानुशासनाः[3] सानुमार्जनाः[4] सवाकोवाक्यांस्तेषां[5] यज्ञमभिपद्यमानानां[6] छिद्यते नामधेयं[7] यज्ञ इत्येवाचक्षते । ॥ १० ॥

भूमेर्ह वा एतद्विच्छिन्नं[8] देवयजनं[9] यदप्राकप्रवणं[10] यदनुदक्प्रवणं यत्कृत्रिमं[11] यत्समविषममिदं[12] ह त्वेव देवयजनं यत्समं[13] समूलमविदग्धं[13] प्रतिष्ठितं[13] प्रागुदक्प्रवणं[13] समं समास्तीर्णमिव[14] भवति यत्र ब्राह्मणस्य ब्राह्मणतां विद्याद्ब्रह्मा ब्रह्मत्वं करोतीति । वोचे[15] छन्दस्तन्न[15] विन्दामो[16] येनोत्तरमेमहीति । तान्ह पप्रच्छ[17] किं विद्वान्होता हौत्रं[18] करोति किं विद्वानध्वर्युराध्वर्यवं करोति किं विद्वानुद्गातौद्गात्रं करोति किं विद्वान्ब्रह्मा[19] ब्रह्मत्वं करोतीति । वोचे[20] छन्दस्तन्न[20] विन्दामो येनो-

1) सान्वाख्याना : A; सन्वाख्यानाः C; 2) संसंस्काराः B; संस्काराः C und E; 3) सानुशशासनः E; 4) सानुमार्जेताः E; 5) सवाकोवाक्यस्तेषां E; 6) यज्ञमति° C; 7) माम° E; 8) °छिन्न E; 9) °यजन E; 10) यत्प्रा° A und B; 11) यत्कार्तृमं E; 12) यत्समं त्रि° B; 13) E hat यदप्राकप्रवणं यदनुदक्य; 14) °णामिव A; 15) ? ?; वोचेः छदस्तन्न B; वोचेः छन्दस्तं न C; वोधे छन्दस्तन्न E; 16) विदामो A; 17) प्रपच्छ E; 18) होत्रं B und E; 19) ब्रह्म A; fehlt in B; 20) Vid. 15.

त्तरमेमहीति ' ते ब्रूमो वागेव होता हौत्रं करोति ' वाचो हि स्तोमाश्च वषट्काराश्चाभिसंपद्यन्ते ' ते ब्रूमो[1] वागेव होता वाग्ब्रह्म[2] वाग्देव[3] इति ' प्राणापानाभ्यामेवाध्वर्युराध्वर्यवं करोति ' प्राणप्रणीतानि[4] ह भूतानि प्राणप्रणीताः[5] प्रणीतास्ते[5] ब्रूमः प्राणापानावेवाध्वर्युः[6] प्राणापानौ[7] ब्रह्म प्राणापानौ देव इति ' चक्षुषैवोद्गातौद्गात्रं[8] करोति ' चक्षुषा हीमानि भूतानि पश्यन्त्यथो चक्षुरेवोद्गाता चक्षुर्ब्रह्म[9] चक्षुर्देव[10] इति[11] ' मनसैव ब्रह्मा[12] ब्रह्मत्वं करोति[13] ' मनसा हि तिर्यञ्च[14] दिश[15] ऊर्ध्वं च यच्च किं[16] च मनसैव करोति[17] तद्ब्रह्म[18] ' ते ब्रूमो[19] मन एव ब्रह्मा मनो ब्रह्म मनो देव इति ' ॥ ११ ॥

तद्यथा ह वा इदं यजमानश्च याजयितारश्च दिवं ब्रूयुः पृथिवीति पृथिवीं[20] वा[21] द्यौरिति ब्रूयुस्तदन्यो[22] नानुजानात्येतामेवं[23] नानुजानाति यदेतद्ब्रूयादथ नु कथ-

---

1) ब्रुनो B; 2) वागब्रह्म E; 3) वागदेव E; 4) प्राणाप्र° E; 5) Corrupt; प्रणीतस्तो A pr. m.; 6) प्राणापा° E; 7) प्राणापानौ E; 8) चक्षुषोवो° B; चक्षुषैवौ° C; 9) चक्षु ब्रह्म C; 10) चक्षु देव B und C; 11) होत B; 12) ब्राह्मा E; 13) करोतीति A; 14) तियञ्च C; तिर्यक E; 15) दिशा E; 16) कि E; 17) करो E; 18) तद्ब्राह्म-E; 19) ब्रुमो E; 20) पृथिवो A pr. m; 21) So corr.; die hss. haben वाग्; 22) ब्रुयु° B und E; 23) स्यानुज्ञाताह्येत्येतामेव E.

मिति' होतेत्येव होतारं ब्रूयाद्वागिति वाचं ब्रह्मेति ब्रह्म देव इति देवमध्वर्युरित्येवाध्वर्युं[1] ब्रूयात्प्राणापानाविति[2] प्राणापानौ ब्रह्मेति ब्रह्म देव इति देवमुद्गातेत्येवोद्गातारं[3] ब्रूयाच्चक्षुरिति चक्षुर्ब्रह्मेति ब्रह्म देव इति देवं ब्रह्मेत्येव ब्रह्माणं ब्रूयान्मन इति मनो ब्रह्मेति ब्रह्म देव इति देवम्' ॥ १२ ॥

नानाप्रवचनानि ह वा एतानि भूतानि भवन्ति' ये चैवासोमपं याजयन्ति ये च सुरापं[4] ये[5] च ब्राह्मणं विच्छिन्नं[6] सोमयाजिनं तं प्रातः समित्पाणय उपोदेयुरुपायामो[7] भवन्तमिति' किमर्थमिति' यानेव[8] नो[9] भवांस्तान्ध्य:[10] प्रश्नानपृच्छत्तानेव[11] नो भवान्व्याचक्षीतेति[12]' तथेति[13]' तेभ्य एतान्प्रश्नान्व्याचचष्टे[14]' तच्चेन[15] ह वा इदं विद्यमानं चाविद्यमानं[16] चाभिनिदधाति[17] तद्ब्रह्म' तद्यो वेद स ब्राह्मणो ऽधीयानो ऽधीत्याचक्षत[18] इति ब्राह्मणम्' ॥ १३ ॥

---

1) इत्येवाध्वर्युम् fehlt in B; 2) ब्रुया° B; 3) देवा उद्गातारं B; 4) सुरापां B; 5) चे ये C; 6) व्युछिन्नं B; व्यछिन्नं C und E; 7) उपोदेयुरुपायामो C; 8) यानेवम E; 9) B fügt व ein; 10) भवांस्ता ध्य: B und C; भवंस्तान्ध्य: E; 11) So corr.; die hss. °पृच्छयानेव; 12) So corr.; A, C und E °येति; B °यति; 13) तेथैति B; 14) एतान्प्रश्ना व्याच° B; व्याचचाष्टे ! ! (sic.) vid. p. २३ z. 2; 15) तचे न C; 16) Zweimal in B; 17) °निदधाति B; 18) ऽधीत्य corrupt.

अथातो देवयजनान्यात्मा देवयजनं । श्रद्धा देवयजनमृत्विजो देवयजनं । भौमं[1] देवयजनं । तद्वा एतदात्मा देवयजनं यदुपव्यायच्छमानो वानुपव्यायच्छमानो वा[2] शरीरमधिवसत्येष[3] यज्ञ । एष[4] यजत[4] । एतं[4] यजन्त[4] । एतद्देवयजनमथैतच्छ्रद्धा[5] देवयजनं । यदैव कदाचिदादध्याच्छ्रद्धा त्वेवैनं नातीयात्तद्देवयजनमथैतदृत्विजो[6] देवयजनं । यत्र[7] क्वचिद्ब्राह्मणो विद्यावान्मन्त्रेण[8] करोति तद्देवयजनमथैतद्भौमं देवयजनं । यत्रापस्तिष्ठन्ति यत्र स्यन्दन्ति प्र तद्दहत्युद्दहन्ति[9] तद्देवयजनं । यत्समं[10] समूलमविदग्धं[11] प्रतिष्ठितं प्रागुदक्प्रवणं समं समास्तीर्णमिव भवति यस्य[12] श्वभ्र ऊर्मो[13] वृक्षः पर्वतो नदी पन्था वा पुरस्तात्स्यान्न देवयजनमात्रं पुरस्तात्पर्यवशिष्येन्नोत्तरतो[14] ऽग्नेः पर्युपसीदेरन्निति[15] ब्राह्मणम् । ॥ १४ ॥

अदितिर्वै प्रजाकामौदनमपचत्तत उच्छिष्टमाश्नात्सा[16] गर्भमधत्त[17] । तत आदित्या अजायन्त[18] । य एष ओदनः

---

1) भौम C; 2) Fehlt in B; 3) °वसतो य B; 4) Fehlt in E; 5) °च्छ्रद्धो E; 6) मालीयात्तद्दे° E; 7) Von यत्र bis यत्रापस्ति° fehlt in B; 8) So B. Ind.; die hss. विद्याविन्म°; 9) तद्दहत्यु° A sec. man.; °दहति B; 10) तद्यत्समं A; 11) °विदाधं E; 12) यस्यन्दं B; 13) कुर्मो B; ऊर्मो C und E; 14) °त्तरता B und E; 15) पर्यपसी° B; 16) So corr.; die hss. °मम्रात्सा; 17) °धत्तं E; 18) अजायन्त A pr. m.; अजायन्तं E.

पच्यत आरम्भणमेवैतत्क्रियत आक्रमणमेव 'प्रादेशमात्रीः समिधो भवन्त्येतावान्ह्यात्मा प्रजापतिना संमितो 'ऽग्नेर्वै या यज्ञिया तनूरश्वत्थे तया समगच्छतैषास्य[1] घृत्या[2], तनूर्यद्घृतं[3] 'यद्घृतेन[4] समिधोऽनक्ति ताभ्यामेवैनं तत्तनूभ्यां समर्धयति[5] 'यन्निर्मार्गस्यादधात्यवगूर्त्या[6] वै वीर्यं क्रियते' यन्निर्मार्गस्यादधात्यवगूर्त्या[6] एव 'संवत्सरो[7] वै प्रजननमग्निः[8] प्रजननमेतत्प्रजननं 'यत्संवत्सर ऋचाग्नौ समिधमादधाति प्रजननादेवैनं तत्प्रजनयिता[9] प्रजनयत्यभक्तर्तु-[10]र्वै पुरुषो 'न हि तद्वेद यमृतुमभिजायते[11]' यन्नक्षत्रं[12] तदाप्नोति 'य एष ओदनः पच्यते योनिरेवैषा क्रियते' यत्समिध आधीयन्ते रेतस्तद्धीयते[13]' संवत्सरे[14] वै रेतो हितं प्रजायते 'यः[15] संवत्सरे पर्येति[16] ऽग्निमाधत्ते प्रजातमेवैनमाधत्ते[17]' द्वादशसु रात्रीषु पुरा संवत्सरस्याधेयास्ता[18] हि संवत्सरस्य प्रतिमायो[19] तिसृष्वयो[20] द्वयोरथो

1) So corr.; die hss. °षास्त्र; 2) So corr.; धृया A und C; धृत्या B; धत्या E; 3) °दृयत E; 4) यदधृन B; यद्घृतेन C; 5) °यतिं E; 6) So corr.; die hss. °वकूर्त्या; 7) संवत्सरा E; 8) प्रजानमग्निः E; 9) °नयिनेत B; 10) So corr.; °त्यवन्नर्तु B und C; °त्यवन्तुन A; °त्यावर्न्तु E; 11) So corr.; यदतु° A, B und E; यदृतु° C; 12) यं नस्तं नत्रं B; 13) So corr.; die hss. °स्ताद्रीयते; 14) So corr.; die hss. संवत्सरो; 15) So corr.; die hss. ये; 16) पर्येति E; 17) So corr.; प्रजापतिरेवे° A pr. m. C und E; प्रजातिरेवे° A sec. m. und B; 18) So corr.; die hss. °धेयास्ता; 19) So corr.; die hss. प्रतिमा श्रयो; 20) तिसृष्य B; तिसृयो E.

पूर्वेद्युराधेयास्त[1] एवाग्निमादधानेनादित्या वा इत उत्तमा[2] अमुं[2] लोकमायंस्ते[2] पथिरक्षयस्त[3] इयक्षमाणं प्रतिनुदन्त[4] ' उच्छेषणभाजा वा आदित्या ' [यदुच्छिष्टं] ' यदुच्छिष्टेन समिधो ऽनक्ति तेभ्य एव प्रावोचत्तेभ्य[5] एव प्रोच्य स्वर्गं लोकं याति[6] ' ॥ १५ ॥

प्रजापतिरथर्वा देवः स तपस्तप्त्वैतं[7] चातुःप्राश्यं[8] ब्रह्मौदनं निरमिमीत[9] चतुर्लोकं[10] चतुर्देवं चतुर्वेदं चतुर्होत्रमिति ' चत्वारो वा इमे लोकाः पृथिव्यन्तरिक्षं द्यौराप इति ' चत्वारो वा इमे देवा अग्निर्वायुरादित्यश्चन्द्रमाश्चत्वारो वा इमे वेदा ऋग्वेदो[11] यजुर्वेदः सामवेदो ब्रह्मवेद इति ' चतस्रो वा इमा[12] होत्रा होत्रमाध्वर्यवमौद्गात्रं ब्रह्मत्वमिति ' तदप्येतदृचोक्तं चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त[13] हस्तासो अस्य[14] । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां[15] आविवेशेति ' चत्वारि शृङ्गेति वेदा वा एत उक्तास्त्रयो अस्य[16] पादा

---

1) So corr.; die hss. °धेयात्ते; B पुंपूर्वेद्यु°; 2) So corr.; die hss. उत्तरमेव मे ऽमुष्मिं लोक; 3) So corr.; die hss. °रक्षन्त इयन्त; 4) प्रतिनुदन् E; 5) So corr.; A, B und C प्रोवाच°, प्रोवाचं° E; 6) So corr.; die hss. यन्ति; 7) तपस्तप्तैतं E; 8) चतुः° E; 9) So corr.; die hss. निरमिमत; 10) Fehlt in E; 11) ऋग्वेदा E; 12) इमे A, C und E; 13) सप्ता E; 14) Fehlt in B; 15) मर्त्या E; 16) स्य A.

इति सवनान्येव ' द्वे शीर्षे इति ब्रह्मौदनप्रवर्ग्यावेव ' सप्त हस्तासो अस्येति छन्दांस्येव ' त्रिधा बद्ध इति मन्त्रः कल्पो ब्राह्मणं ' वृषभो रोरवीत्येष ह वै[1] वृषभ एष तद्रोरवीति यद्यज्ञेषु शस्त्राणि शंसत्यृग्भिर्यजुर्भिः[2] सामभिर्ब्रह्मभिरिति ' महो देवो मर्त्यां आविवेशेत्येष[3] ह वै महान्देवो यद्यज्ञ ' एष मर्त्यां आविवेश ' यो विद्यात्सप्त प्रवत इति प्राणानाह ' सप्त विद्यात्परावत इत्यपानानाह ' शिरो यज्ञस्य यो विद्यादित्येतद्वै यज्ञस्य शिरो यन्मन्त्रवान्ब्रह्मौदनो ' यो ह वा एतममन्त्रवन्तं[4] ब्रह्मौदनमुपेयादपशिरसा[5] ह[5] वा[5] अस्य[5] यज्ञमुपेतो[5] भवति[5] ' तस्मान्मन्त्रवन्तमेव ब्रह्मौदनमुपेयान्नामन्त्रवन्तमिति ब्राह्मणम् ' ॥ १६ ॥

किमुपज्ञ[6] आत्रेयो[7] भवतीत्यादित्यं हि तमो जग्राह ' तदत्रिरपनुनोद ' तदत्रिरन्वपश्यत्तदप्येतदृचोक्तं सुताद्यमत्रिर्दिवमुन्निनाय[8] ' दिवि त्वात्रिरधारयत्सूर्या[9] मासाय कर्तव इति ' तं[10] होवाच वरं वृणीष्वेति ' स होवाच

---

1) वा E; 2) शंसन्त्यृ° A, C und E; 3) °शेत्येव E; 4) एतमन्त्र A pr. man.; 5) So die hss.; vielleicht zu lesen: °दपशिरा ह वा अस्य यज्ञ उपेतो भवति; 6) So corr.; die hss. किमुपयज्ञ; 7) अत्रेयो A; आत्रयो B; 8) स्नुताद्य° A, C und E; 9) त्वात्रिरधाय° E; 10) त E.

दक्षिणीया मे प्रजा[1] स्यादिति । तस्मादात्रेयाय प्रथमं दक्षिणा[2] यज्ञे दीयन्त[3] इति ब्राह्मणम् ॥ १७ ॥

प्रजापतिर्वेदानुवाचाग्नीनादधीयेति । तान्वागभ्युवाचाश्वो[4] वै संभाराणामिति । तं[5] घोरात्क्रूरात्सलिलात्सरस[6] उदानिन्युस्तान्वागभ्युवाचाश्वः[7] शम्येतेति[8] । तथेति । तमृग्वेद एत्योवाचाहमश्वं शमयमिति । तस्मा अभिसृताय[9] महद्भयं[10] ससृजे । स एतां प्राचीं दिशं भेजे । स होवाचाशान्तो न्वयमश्व इति । तं यजुर्वेद एत्योवाचाहमश्वं शमयमिति । तस्मा अभिसृताय[11] महद्भयं ससृजे । स एतां प्रतीचीं दिशं भेजे । स होवाचाशान्तो न्वयमश्व[12] इति । तं सामवेद एत्योवाचाहमश्वं शमयमिति । केन नु त्वं शमयिष्यसीति । रथंतरं नाम मे सामाघोरं चाक्रूरं च । तेनाश्व[13] अभिद्रूयेतेति[13] । तस्मा अप्यभिसृताय[14] तदेव महद्भयं ससृजे । स एतामुदीचीं दिशं भेजे । स होवाचाशान्तो न्वयमश्व[15] इति । तान्वागभ्युवाच शंयुमाथर्वणं[16] गच्छतेति[17] ।

---

1) प्राज्ञा E; 2) So corr.; प्रथमद° A, C und E; प्रयद° B; 3) दियन्त A; 4) °वाचाश्वौ B; 5) त A pr. man.; तो E; 6) °घोराक्रू° B und C; 7) °भ्युवाचा E; 8) संमेतिते B; शंमेते C; 9) So corr.; die hss. अवि°; 10) महाद्भयं C; महद्भूयं E; 11) Vid. 9; 12) न्वायमश्व E; 13) So corr.; A तेनाश्वनभिद्रूयति; तेनामभिद्रूयते B; तेनाश्वमभिद्रूयेति C; तेनाश्वमभिद्रयते E; 14) So corr.; die hss. अप्यविसृ°; अयविसृ° C; 15) °मश्वन् E; 16) शंयूमाथर्वणो E; 17) So corr.; die hss. °येति.

ते शंयुमाथर्वणमासीनं प्राप्योचुर्नमस्ते अस्तु भगवन्नश्वः [1] शम्येतेति [2] ' तथेति [3] ' स खलु कबन्धस्याथर्वणस्य पुत्रमामन्त्रयामास विचारिन्निति [4] 'भगो इति हास्मै [5] प्रतिश्रुतं प्रतिशुश्रावांश्वः [6] शम्येतेति [7] ' तथेति [8] ' स खलु शान्त्युदकं चकाराथर्वणीभिश्चाङ्गिरसीभिश्च [9] चातनैर्मातृनामभिर्वास्तोष्पत्यैरिति [10] शमयति [11] ' तस्य [12] ह [13] स्नातस्याश्वस्याभ्युक्षितस्य सर्वेभ्यो रोमसमरेभ्यो ऽङ्गारा [14] आशीर्यन्त ' सो ऽश्वस्तुष्टो नमस्कारं चकार ' नमः शंयुमाथर्वणाय [15] यो मा यज्ञियमचीकॢपदिति [16] ' भविष्यन्ति ह वा अतो ऽन्ये ब्राह्मणा लघुसंभारतमास्तं [17] आदित्यस्य पद [18] आधास्यन्त्यनडुह्नो [19] वत्सस्याजस्य अबणस्य [20] ब्रह्मचारिणो वैतद्वा [21] आदित्यस्य पदं यद्भूमिस्तंस्यैव [22] पद आहितं भविष्यतीति [23] ' सो ऽग्नौ प्रणीयमाणे ऽश्वे ऽन्वारब्धं [24]

---

1) °श्वं A und E; 2) नांमेतेति B; शांमेतेति C; 3) तयैतेति E; 4) विचारं निति A und E; 5) ह स्मै A pr. man.; 6) °वाश्वं A; 7) शांमेतेति B; शांमेतेति C; 8) तयैति E; 9) च fehlt in A; 10) चतनै° C; 11) corrupt; vielleicht शमयतेति; 12) तस्यै E; 13) Fehlt in E; 14) गारा B und E; 15) शांयुम आथर्वणाय C; man erwartet शम्यव आथर्वणाय; 16) यज्ञियमन्विकॢ° B; यज्ञमवीहॢपद्दिति E; 17) लघुसंचार° C; 18) पदम् A, B und C; 19) अधास्यत्य° E; 20) ? Man erwartet den Namen eines Tieres; 21) So B. Ind.; die hss. वा एतद्वा; 22) So B. Ind.; A und B °स्तयैव, C und E °स्तयैव; 23) °ष्यसीति E; 24) So B. Ind.; °रब्धे A und E; °रब्ध C; °रब्धं B.

ब्रह्मा यजमानं वाचयति यदक्रन्दः प्रथमं जायमान[1] इति पञ्च ' तं[2] ब्राह्मणा[3] उपवदन्ति तं ब्रह्मोपाकुरुत ' एष ह वै विद्वान्सर्वविद्ब्रह्मा यद्भृग्वङ्गिरोविदिति ब्राह्मणम् ' ॥ १८ ॥

देवाश्च ह वा असुराश्चास्पर्धन्त[4] ' ते[5] देवा इन्द्रमब्रुवन्निमं नस्तावद्यज्ञं[6] गोपाय यावदसुरैः संयतामहा इति ' स वै नस्तेन[7] रूपेण गोपाय येन नो रूपेण भूयिष्ठं छादयसि येन शक्ष्यसि[8] गोप्तुमिति ' स ऋग्वेदो भूत्वा पुरस्तात्परीत्योपातिष्ठत्तं देवा अब्रुवन्नन्यत्तद्रूपं कुरुष्व[9] नैतेन[2] नो[2] रूपेण[2] भूयिष्ठं[2] छादयसि[2] नैतेन शक्ष्यसि[10] गोप्तुमिति ' स यजुर्वेदो भूत्वा पश्चात्परीत्योपातिष्ठत्तं[11] देवा अब्रुवन्नन्यत्तद्रूपं कुरुष्व नैतेन नो रूपेण भूयिष्ठं छादयसि नैतेन शक्ष्यसि[12] गोप्तुमिति ' स सामवेदो भूत्वोत्तरतः परीत्योपातिष्ठत्तं देवा अब्रुवन्नन्यदेव[13] तद्रूपं कुरुष्व[14] नैतेन[14] नो रूपेण भूयिष्ठं छादयसि[15] नैतेन[15] शक्ष्यसि[12] गोप्तुमिति ' स इन्द्र उष्णीषी[16] ब्रह्म-

---

1) जायमाना C; 2) Fehlt in E; 3) So ed. B. Ind.; ब्रह्मण A, C und E; ब्रह्मणा B; 4) °र्धते E; 5) त E; 6) नस्साव° B; 7) मह्मेन B; 8) So B. Ind.; A, B und C शिक्षसि, E शिक्षिसि; 9) कुरुस्वी E; 10) So ed. B. Ind.; A, B; E शिक्षसि, C शक्षसि; 11) पश्चात्परीत्यापा° B; 12) Vid. 8; 13) अब्रुवन् देव A; अब्रुनेतं B; अब्रुवन्न्यतदेव E; 14) कुरुष्वैतेन E; 15) छादयस्यैतेन B; 16) उष्णी E.

वेदो भूत्वा दक्षिणतः परीत्योपातिष्ठत्तं देवा अब्रुवन्ने-
तत्तद्रूपं[1] कुरुष्वैतेन नो रूपेण भूयिष्ठं छादयस्यैतेन[2]
शक्ष्यसि[3] गोप्तुमिति । तद्यदिन्द्र[4] उष्णीषी ब्रह्मवेदो भूत्वा
दक्षिणतः परीत्योपातिष्ठत्तद्ब्रह्माभवत्तद्ब्रह्मणो ब्रह्मत्वं ।
तद्वा एतदथर्वणो रूपं यदुष्णीषी ब्रह्मा । तं दक्षिणतो
विश्वे देवा उपासीदंस्तं[5] यद्दक्षिणतो विश्वे देवा उपा-
सीदंस्तत्सदस्यो[6]ऽभवत्तत्सदस्यस्य[7] सदस्यत्वं । बलेर्ह वा
एतद्बलमुपजायते[8] यत्सदस्य । आमयतो[9] वै[9] व्रजस्य[9]
बहुलतरं[9] व्रजं[9] विदन्ति[9] । घोरा वा एषा दिग्दक्षिणा
शान्ता इतरास्तद्यानि स्तुतानि ब्रह्मानुमन्त्रयते मनसैव
तानि सदस्यो जनदित्येतां व्याहृतिं[10] जपत्यात्मानं[11]
जनयति[12] नजित्यात्मानमपित्वे[13] दधाति । तं देवा अब्रु-
वन्वरं वृणीष्वेति । वृणा इति । स वरमवृणीतांस्यामेव[14]
मां होत्रायामिन्द्रभूतं पुनन्त स्तुवन्तः[15] शंसन्तस्तिस्थेयु-

---

1) अब्रुंन्° B; 2) छादयदस्यैतेन°; छादाय° C; 3) Vid. p. ५३ Note 8. 4) स इन्द्र B; 5) उपासीरंस्तं A; उपासीरस्तं E; 6) उपासीरंस्त° A; उपासीरस्त° E; °दस्ये B; 7) °दस्य A, C und E; 8) °मुपाजायते E; 9) ? ? corrupt; व्रजं fehlt in E; statt विदन्ति hat C विन्दन्ति; E विदन्वन्ति; 10) व्याहृति C; 11) So corr. जपं चेत्या° A und C; जपं वेत्या° B und E; Caland zu Vait. 18, 17 schlägt vor hier zu lesen व्याहृतिमनुजपति; 12) जयति A; 13) Sic; vielleicht zu lesen: जनयित्वात्मान°; 14) वरम fehlt in E; 15) स्तुवत: B.

रिति' तं तस्यामेव होत्रायामिन्द्रभूतं पुनन्त स्तुवन्तः[1] शंसन्तो ऽतिष्ठंस्तं यत्तस्यामेव होत्रायामिन्द्रभूतं पुनन्त स्तुवन्तः शंसन्तो ऽतिष्ठंस्तद्ब्राह्मणाच्छंस्यभवत्तद्ब्राह्मणाच्छंसिनो ब्राह्मणाच्छंसित्वं[2] 'सैषैन्द्री[3] होत्रा यद्ब्राह्मणाच्छंसीया 'द्वितीयं वरं[4] वृणीष्वेति 'वृणा इति 'स वरमवृणीतास्यामेव मां होत्रायां वायुभूतं पुनन्त[5] स्तुवन्तः शंसन्तस्तिष्ठेयुरिति[6] ' तं तस्यामेव होत्रायां वायुभूतं पुनन्त स्तुवन्तः शंसन्तो[7] ऽतिष्ठंस्तं यत्तस्यामेव[8] होत्रायां[9] वायुभूतं[10] पुनन्त[11] स्तुवन्तः शंसन्तो[12] ऽतिष्ठंस्तत्पोताभवत्तत्पोतुः पोतृत्वं[13] 'सैषा[14] वायव्या होत्रा[15] यत्पोत्रीया ' तृतीयं वरं[16] वृणीष्वेति ' वृणा इति ' स वरमवृणीतास्यामेव मां होत्रायामग्निभूतमिन्धानाः[17] पुनन्त स्तुवन्तः शंसन्तस्तिष्ठेयुरिति ' तं तस्यामेव होत्रायामग्निभूतमिन्धानाः[17] पुनन्त स्तुवन्तः शंसन्तो[18] ऽतिस्थंस्तं यत्तस्यामेव होत्रायामग्निभूतमिन्धानाः पुनन्त स्तुवन्तः शंसन्तो ऽतिस्थंस्तदाग्नीध्रो[19] ऽभवत्तदाग्नीध्रस्याग्नीध्रत्वं[20] '

---

1) स्तुवतः B; 2) सित्व E; 3) सैषौद्री E; 4) Fehlt in C; 5) पुनत, E; 6) शंसतस्ति° B; 7) शंसतो B; शंसंता E; 8) यतस्यमित्र E; 9) होत्राय E; 10) वायुंभूतं A; 11) पुनत E; 12) शंसन्तस् A, B und E; 13) पोतृत्वं E; 14) सेषा B; 15) होत्राय, E; 16) Fehlt in B und C; 17) °मिधानाः E; 18) शंसतो B und E; 19) °ग्नीधो B; 20) °धस्याग्नीध्र E.

सैषाग्नेयी होत्रा यदाग्नीध्रीयेति[1] ब्राह्मणम् ' ॥ १९ ॥

ब्राह्मणो ह वा इममग्निं वैश्वानरं बभार[2] 'सो[3] ऽयमग्निर्वैश्वानरो[4] ब्राह्मणेन ध्रियमाण[5] इमांल्लोकाञ्जनयते 'ऽयमीक्षते ऽग्निर्जातवेदा[6] ब्राह्मणाद्वितीयो ह वा अयमिदमग्निर्वैश्वानरो ज्वलति[7] ' हन्ताहं[8] यन्मयि तेज[9] इन्द्रियं वीर्यं[10] तद्दर्शयाम्युत[11] वै मा[12] बिभृयादिति[13] ' स आत्मानमाप्याय्यैतं[14] पयो ऽधोक्तामिमं[15] ब्राह्मणं दर्शयित्वात्मन्यजुहोत्स द्वितीयमात्मानमाप्याय्यैतं[16] घृतमधोक्तामिमं[15] ब्राह्मणं[17] दर्शयित्वात्मन्यजुहोत्स तृतीयमात्मानमाप्याय्यैतदिदं[16] विश्वं[18] विकृतमन्नाद्यमधोक्तामिमं[19] ब्राह्मणं दर्शयित्वात्मन्यजुहोत्स[20] चतुर्थमात्मानमाप्याय्यैतेन[16] ब्राह्मणस्य जायां विराजमपश्यत्तामस्मै[21] प्रायच्छत्सात्मा[22] अपित्वमभवत्तंत[23] इममग्निं[24] वैश्वानरं[25]

---

1) यदाग्नीयेति A; यदग्नीध्रीयोति E; 2) बभरर C; 3) सो E; 4) ऽयमग्निवै° E; 5) ध्रीयमाणा C; ध्रियमाणां E; 6) ऽग्निनां त वेदा E; 7) वलति E; 8) ह्ताहं B; 9) तेजं E; 10) वीर्य E; 11) तदर्श-याम्युत्र E; तद्दर्शयां स्युत B; 12) मां E; 13) विभ्रयादिति B; 14) So corr.; °माप्याययेन्नं A und E; °माप्याययेत B; °माप्याययेतं C; 15) ? vielleicht verdorben! 16) Vid. 14; 17) ब्रह्मणं E; 18) विस्व B; 19) विकृतमन्वनाद्यमन° B; अधोक्ताम् corrupt; 20) °त्मान्यजुहोत्स B; जुहोत्स fehlt in E; 21) विराजमपश्य° A; 22) und 23) verdorben; 22) °त्स आत्मा A und B; 23) °मभवकृत C; 24) इममग्नि E; 25) विश्वानरं B.

परास्युर्ब्राह्मणो[1] ऽग्निं जातवेदसमधत्त ' सो ऽयमब्रवीदग्ने जातवेदो ऽभिनिधेहि[2] मेहीति ' तस्य हैतं नामाधत्ता-घोरं[3] चाक्रूरं च ' सो ऽश्वो[4] भवत्तस्मादश्वो[5] वहेन रथं[6] न भवति[7] पृष्ठेन सादिनं[8] ' स देवानागच्छत्स देवेभ्यो ऽन्वातिष्ठत्तस्माद्देवा अबिभयुस्तं ब्रह्मणे प्रायच्छ-त्तमेतयर्चाशमयत्[9] ॥ २० ॥

अग्निं[10] त्वाङ्कवैश्वानरं सदनान्प्रदहन्वगाः[11] । स नो देवत्राधिब्रूहि[12] मा रिषामा वयं तवेति ' तमेताभिः पञ्च-भिर्ऋग्भिरुपाकुरुते[13] यदक्रन्दः प्रथमं जायमान[14] इति ' सो ऽशाम्यत्तस्मादश्वः[15] पशूनां जिघत्सुतमो[16] भवति ' वैश्वानरो[17] ह्येष ' तस्मादग्निपदमश्वं[18] ब्रह्मणे[19] ददाति[20] ' ब्रह्मणे[21] हि प्रत्तं[22] ' तस्य रसमपीडयत्स रसो ऽभवद्रसो ह वा एष ' तं वा एतं रसं सन्तं[23] रथ[24] इत्याचक्षते परोक्षेण[25] ' परोक्षप्रिया इव हि देवा भवन्ति[26] प्रत्य-

---

1) परास्युर् corrupt!; 2) विनिधेहि B; ऽभिनिधेहि E; 3) °नघोरं A und E; 4) स्वो A; 5) °दस्वो A; 6) रथे A, C und E; 7) भवन्ति B; zu erwarten ist वहति; 8) सादिन B; 9) °तयच्च सिमयित् E; 10) अग्नि B; 11) सयदनान्प्र° B; सतदनान्प्र° C; सदनानप्रवह° E; 12) दवप्राधि° E; 13) पञ्चभि ऋग्भि° B; पञ्चभिर्ऋग्भि° C; 14) Von जायमान bis अश्वं fehlt in E; 15) °दस्वं B; 16) So corr.; die hss. जिघत्सुरतमो; 17) वैश्वानरो B; 18) °ग्निः पदमश्वं B; 19) ब्राह्मणो B; 20) ददामि E; 21) ब्रह्मं C; 22) प्रवृं A pr. m.; प्रतन् B; प्रत्तंस् C; प्रपा E; 23) सतं A; 24) रस E; 25) परोक्षणो E; 26) भवती E.

ह्मद्विषः । स देवानागच्छत्स देवेभ्यो ऽन्वातिष्ठत्तस्माद्दे-
वा[1] अबिभयुस्तं ब्रह्मणे प्रायच्छंस्तमेतयर्चाऽभ्याहुत्याभ्यजु-
होदिन्द्रस्यौजो[2] मरुतामनीकमिति रथमभिहुत्य[3] तमे-
तयर्चातिष्ठद्वनस्पते वीड्वङ्गो हि भूया इति । तस्मादाग्न्या-
धेयिकं[4] रथं ब्रह्मणे ददाति । ब्रह्मणे हि प्रत्तं[5] । तस्य
तन्नाणस्तनूं[6] ज्येष्ठां[7] दक्षिणां निरमिमत[8] । तां पञ्च-
स्वपश्यदृचि यजुषि साम्नि शान्ते[9] ऽथ घोरे । तासां[10] द्वे
ब्रह्मणे[11] प्रायच्छद्वाचं च ज्योतिश्च । वाग्वै धेनुर्ज्योति-
र्हिरण्यं[12] । तस्मादाग्न्याधेयिकां[13] चातुःप्राश्यां धेनुं[14] ब्र-
ह्मणे ददाति । ब्रह्मणे हि प्रत्ता[15] । पशुषु शाम्यमानेषु
चक्षुर्ह्वापयन्ति । चक्षुरेव तदात्मनि धत्ते[16] । यद्वै[17] चक्षुस्त-
द्धिरण्यं । तस्मादाग्न्याधेयिकं हिरण्यं ब्रह्मणे ददाति । ब्रह्मणे
हि प्रत्तं । तस्यात्मन्नधत्त[18] । तेन प्राज्वलयद्यन्नाधत्त तदा-
ग्लाभवत्तदाग्ला[19] भूत्वा सा समुद्रं प्राविशत्सा[20] समुद्र-

1) °त्तस्मादेवा E; 2) °र्चान्नाहुत्याभ्यः जुहो° E; 3) So corr.; die hss. °हुत्या; B रथ प्रक्रित्वा; 4) °योकं A sec. m.; B und C; °हिकं E; 5) Vid. p. ५७ Note 22; 6) तन्नाणासूनू B; °णास्तनू C und E; 7) ज्येष्ट C; 8) निरमिमतं E; 9) शान्ये A; 10) तासो E; 11) ब्राह्मणे A pr. m. und E; 12) °र्हिरण्यां E; 13) °धेहिकां C; 14) धेनु C und E; 15) So B. Ind.; A, B und C प्रत्ताय, E प्रता; 16) धत्तं E; 17) Von यद्वै bis तेन प्राज्वल fehlt in E; 18) So corr.; A und E तस्यात्मनि धत्त B und C तस्यात्मन्नं धत्त; 19) तदालाभव° B; 20) प्रविशत्सा E.

मदहत्तस्मात्समुद्रो दुर्गिरवपि[1] 'वैश्वानरेण हि[2] दग्धः' सा पृथिवीमुदैत्सा[3] पृथिवीं व्यदहत्सा[4] देवानागच्छत्सा देवानहेडत्तं[5] देवा ब्रह्माणमुपाधावंस्त नैवागायन्नानृत्यंस्तैषाग्लैषा[6] कारुविदा नम 'तं वा एतमाग्लाहन्तं सन्तमाग्लागृध इत्याचक्षते परोक्षेण 'परोक्षप्रिया[7] इव हि देवा भवन्ति प्रत्यक्षद्विषो 'य एष ब्राह्मणो गायनो नर्तनो वा भवति तमाग्लागृध इत्याचक्षते 'तस्माद्ब्राह्मणो नैव[8] गायेन्न नृत्येन्माग्लागृधः स्यात्तस्माद्ब्राह्म्यं[9] पूर्वं हविरपरं प्राजापत्यं 'प्राजापत्याद्ब्राह्म्यमेवोत्तरमिति[10] ब्राह्मणम् ' ॥ २१ ॥

अथर्वाणश्च ह वा अङ्गिरसश्च[11] भृगुचक्षुषी तद्ब्रह्माभिव्यपश्यंस्तदजानन्वयं[12] वा इदं सर्वं यद्भृग्वङ्गिरस इति ' ते देवा ब्राह्म्यं[13] हविर्यत्सांतपने ऽग्नावजुहवुरेतद्वै ब्राह्म्यं हविर्यत्सांतपने ऽग्नौ हूयत ' एष ह वै सांतपनो[14] ऽग्निर्यद्ब्राह्मणस्तस्योर्जयोर्जा[15] देवा अभजन्त सुमनस एव

---

1) Sic.! दुषिरवधिर् C; दूर्गिरतपि E; 2) Fehlt in E; 3) So B. Ind.; °मुदैयोत्सा A und C; °मुहैत्सा B; °मुदैसा E; 4) व्यहहत्सा B; व्यहदत्सा E; 5) देवानहिडत्ते A, B und E; 6) °षाग्लौवा B und C; 7) परोक्तिप्रिया E; 8) नैवं B; 9) °द्ब्राह्मं A pr. m.; 10) So corr.; die hss. haben °वोत्तममिति; 11) आङ्गिर° A pr. m. B und E; 12) तद्ब्राह्मा° A pr. m.; 13) ब्राह्मं A pr. m.; 14) संतपनो E; 15) °स्योर्जयोर्जा A; °स्योर्जयोर्जां E.

स्वधां[1] पितरः श्रद्धया स्वर्गं लोकं ब्राह्मणास्तेन सुन्वन्त्यृषयो[2] ऽत्तत स्त्रियः केवल आत्मन्यवारुन्धत[3] वाह्या[4] ऽभयेन सुन्वन्ति[5] ' यद्ध यज्ञे ब्राह्म्यं[6] हविर्निरुप्येतानृजवः प्राजापत्यहविषो[7] मनुष्या[8] जायेरन्नसौ याह्लोकाञ्जूर्णिवति[9] पिता[10] ह्येष आहवणीयस्य[11] गार्हपत्यस्य[11] दक्षिणाग्नेर्यो ऽग्निहोत्रं जुहोतीति ' देवाः प्रिये धामनि मदन्ति[12] ' तेषामेषो ऽग्निः सांतपनः श्रेष्ठो[13] भवत्येतस्य वाचि तृप्तायामग्निस्तृप्यति ' प्राणे तृप्ते वायुस्तृप्यति ' चक्षुषि[14] तृप्त[15] आदित्यस्तृप्यति ' मनसि तृप्ते चन्द्रमास्तृप्यति ' श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति ' स्नेहेषु[16] तृप्तेष्वापस्तृप्यन्ति ' लोमेषु[9] तृप्तेष्वोषधिवनस्पतयस्तृप्यन्ति[17] ' शरीरे[18] तृप्ते पृथिवी तृप्यत्येवमेषो[19] ऽग्निः सांतपनः श्रेष्ठस्तृप्तः सर्वांस्तृप्तांस्तर्पयतीति[20] ब्राह्मणम् ' ॥ २२ ॥

सांतपना इदं हविरित्येष ह[21] वै[22] सांतपनो ऽग्नि-

1) स्वधा E; 2) सुन्वन्त्यृ° C; 3) आत्मन्येवा° A und C; आत्मन्यवरुधत E; 4) वाचा B; 5) सुन्वन्तिं E; 6) ब्राह्मणं C; 7) प्रजाप° B; °हविषो C; 8) मानुष्या C; 9) Sic.! 10) पित C; 11) So ed. B. Ind.; die hss. °वज्ञ; 12) मदन्ते C; मदते E; 13) श्रेष्ठयो E; 14) चक्षुषो A und E; 15) तृप्या E; 16) स्नेहेषु E; 17) °प्यति B; 18) शरी B; 19) तृप्यन्येव° A; तृप्यत्येवम् fehlt in E; 20) सर्वास्तृ° A, C und E; 21) हा E; 22) Fehlt in E.

र्यद्ब्राह्मणो[1] 'यस्य गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनगोदानचूडाकरणोपनयनाप्लवनाग्निहोत्रव्रतचर्यादीनि कृतानि भवन्ति स सांतपनो ऽथ यो ऽयमनग्निकः स कुम्भे लोष्टस्तद्यथा कुम्भे[2] लोष्टः प्रक्षिप्तो[3] नैव शौचार्थाय कल्पते नैव शस्यं[4] निर्वर्तयत्येवमेवायं[5] ब्राह्मणो ऽनग्निकस्तस्य ब्राह्मणस्यानग्निकस्य नैव दैवं दद्यान्न[6] पित्र्यं न चास्य[7] स्वाध्यायाशिषो[8] न[9] यज्ञाशिषः[9] स्वर्गंगमा[10] भवन्ति तदप्येतदृचोक्तमग्निं[11] दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुमिति ब्राह्मणम्' ॥ २३ ॥

अथ ह प्रजापतिः सोमेन यक्ष्यमाणो[12] वेदानुवाच कं वो होतारं वृणीय[13] कमध्वर्युं[14] कमुद्गातारं कं ब्रह्माणमिति[15] 'त[16] ऊचुरृग्विदमेव[17] होतारं वृणीष्व यजुर्विदमध्वर्युं[18] सामविदमुद्गातारमथर्वाङ्गिरोविदं[19] ब्रह्माणं[20] ' तथा हास्य यज्ञश्चतुर्षु[21] लोकेषु चतुर्षु देवेषु

---

1) ऽग्निर्य ब्रह्मणो B; °ह्मणो E; 2) कुम्भ A; 3) प्रतिप्तौ B; 4) शास्यं E; 5) निर्वर्तयन्त्ये° C; निवर्तयन्त्ये° E; 6) दद्यात् E; 7) चास्या E; 8) स्वध्या° B; 9) भवन्ताशिष E; 10) °गया E; 11) °मग्नि B; 12) यक्ष्माणो E; 13) So corr.; die hss. वृणीयां; 14) °ध्वर्यु E; 15) ब्राह्मणमिति B; 16) तद् A und C; 17) ऊचुरृक्ते° A, B und E; 18) यजुर्वे° A, B und E; 19) सामवे° C; 20) ब्रह्मणां B; 21) यज्ञ: ist einmal zu viel.

चतुर्षु वेदेषु चतसृषु होत्रासु[1] चतुष्पाद्यज्ञः प्रतितिष्ठति[2]' प्रतितिष्ठति[3] प्रजया पशुभिर्य एवं वेद' तस्मादृग्विदमेव[4] होतारं वृणीष्व स[5] हि[5] हौत्रं[6] वेदाग्निर्वै[7] होता' पृथिवी वा ऋचामायतनमग्निर्देवता गायत्रं छन्दो भूरिति[8] शुक्रं[9]' तस्मात्तमेव होतारं वृणीष्वेत्येतस्य लोकस्य जितय' एतस्य लोकस्य विजितय' एतस्य लोकस्य संजितय' एतस्य लोकस्यावरुद्धय' एतस्य लोकस्य विवृद्धय[10]' एतस्य लोकस्य समृद्धय एतस्य लोकस्योदात्तय[11]' एतस्य[12] लोकस्य व्यात्तय[13]' एतस्य लोकस्य पर्यात्तय' एतस्य[12] लोकस्य समात्तये' ऽथ चेन्नैवंविदं[14] होतारं वृणुते[15] पुरस्तादेवैषां यज्ञो रिच्यते' यजुर्विदमेवाध्वर्युं वृणीष्व[16] स ह्याध्वर्यवं वेद' वायुर्वा अध्वर्युरन्तरिक्षं[17] वै यजुषामायतनं' वायुर्देवता[18] त्रैष्टुभं छन्दो भुव इति शुक्रं[19]' तस्मात्तमेवाध्वर्युं[20] वृणीष्वेत्येतस्य लोकस्येत्येवाथ[21] चेन्नैवंविदमध्वर्युं[20] वृणुते[22] पश्चादेवैषां यज्ञो रिच्यते'

---

1) होत्रा B; 2) So corr.; die hss. प्रतिष्ठति; 3) प्रतीष्ठति B; प्रतिष्ठति E; 4) °निव A und C; 5) तन्ति E; 6) होत्रं E; 7) वेदग्निं वे E; 8) भूमिति B; 9) शुकं B und C; 10) व्यृद्धय A sec. m. und C; विगृर्द्धय E; 11) ?; vielleicht °स्योदाप्तय; 12) एतस्या B; 13) व्याप्ताय B; 14) चेन्नैव विदं E; 15) वृणुति E; 16) वृणीष्य C; 17) °रिक्ष E; 18) °वतां E; 19) शुक्र E; 20) °ध्वर्यु E; 21) लोकस्यनाय B; 22) वृणुत्यते B.

सामविदमेवोद्गातारं[1] वृणीष्व' स ह्यौद्गात्रं[2] वेदादित्यो वा उद्गाता' द्यौर्वै साम्नामायतनमादित्यो देवता जागतं छन्दः स्वरिति शुक्रं[3]' तस्मात्तमेवोद्गातारं वृणीष्वेत्येतस्य लोकस्येत्येवाथ चेन्नैवंविदमुद्गातारं वृणुत उत्तरत एवैषां यज्ञो रिच्यते' ऽथर्वाङ्गिरोविदमेव ब्रह्माणं[4] वृणीष्व[5]' स हि ब्रह्मत्वं वेद' चन्द्रमा वै ब्रह्मापो[6] वै भृग्वङ्गिरसामायतनं' चन्द्रमा[7] देवता वैद्युतश्चोष्णिक्ककुभे[8] छन्दसी[9] ओमित्यथर्वणां शुक्रं जनदित्यङ्गिरसां' तस्मात्तमेव ब्रह्माणं वृणीष्वेत्येतस्य लोकस्य जितय' एतस्य लोकस्य विजितय[10]' एतस्य लोकस्य संजितय' एतस्य लोकस्यावरुद्धय' एतस्य लोकस्य[11] विवृद्धय[12]' एतस्य लोकस्य समृद्धय' एतस्य लोकस्योदात्तय[13]' एतस्य लोकस्य व्याप्तय' एतस्य लोकस्य पर्याप्तय' एतस्य लोकस्य समाप्तये' ऽथ चेन्नैवंविदं[14] ब्रह्माणं[15] वृणुते दक्षिणत[16] एवैषां यज्ञो रिच्यते दक्षिणत[17] एवैषां[17] यज्ञो[17] रिच्यते ॥ २४ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे द्वितीयः प्रपाठकः ॥

---

1) सामवे° C; 2) क्षौद्गात्रं E; 3) शुक्रं B; 4) ब्राह्मणा E; 5) वृणीष्वं E; 6) ब्रह्मा आपो E; 7) चन्द्रं च मा B; 8) °तश्चोष्णि-काकुभे E; 9) छन्दसि A; 10) विजित C; 11) लोकस्या C; 12) व्यृद्धय A sec. m., B und C; 13) ?; °दाप्तय ?; 14) चेनैवं° C; चेन्नैवंविद E; 15) ब्रह्माणा E; 16) दक्षित C; 17) Fehlt in C und E.

ओं दक्षिणाप्रवणा भूमिर्दक्षिणात[1] आपो वहन्ति । तस्माद्यज्ञास्तद्भूमेरुन्नततरमिव[2] भवति यत्र भृग्वङ्गिरसो विष्ठास्तं व्याप[3] इमांल्लोकानभिवहन्त्येवमेव[4] भृग्वङ्गिरसः सर्वान्देवानभिवहन्त्यैवमेवैषा[5] व्याहृतिः सर्वान्वेदानभिवहत्योमिति[6] ऋचामोमिति यजुषामोमिति साम्नामोमिति सर्वस्याह्याभिवादस्तं ह स्मैतदुत्तरं यज्ञे विद्वांसः कुर्वन्ति । देवा ब्रह्माण आगच्छतागच्छतेत्यैते[7] वै देवा ब्रह्माणो यद्भृग्वङ्गिरसस्तानेवैतद्वृणानास्तान्वृणाना[8] ह्वयन्तो मन्यन्ते । नान्यो ऽभृग्वङ्गिरोविदो[9] वृतो यज्ञमागच्छेन्यंज्ञस्य[10] तेजसा तेज आप्नोत्यूर्जयोर्जा[11] यशसा यशो । नान्यो ऽभृग्वङ्गिरोविदो[12] वृतो यज्ञमागच्छेन्नेद्यज्ञं[13] परिमुष्णीयादिति[14] । तद्यथा पूर्वं वत्सो ऽधीत्य[15] गां[16] धयेदेवं ब्रह्मा भृग्वङ्गिरोविद्वृतो[17] यज्ञमागच्छेन्नेद्यज्ञं[13] परिमुष्णीयादिति । तद्यथा गौर्वाश्वो वाश्वतरो वैकपाद्द्विपात्त्रिपा-

1) °क्षिणात A pr. m. und E; 2) तस्माद्यज्ञस्त° C ?; 3) विष्ठाः sic.!!; 4) °न्त्येवमेव E; 5) °न्त्येव° E; °मवैष्टा B; 6) °भिवहंत्यामिति E; 7) आगच्छता आगच्छतेत्येते A sec. m. und C; आगच्छतगच्छतेत्येत B; आगच्छतागच्छत गच्छतेत्यैतेव E; 8) So corr.; A und B °दृणानांस्तान्वृणानां; C °द्वाणानांस्तान्वृणानां; E °दृणातास्तान्वृणानां; 9) °रोविद् A und E; 10) गच्छनागच्छन्य° A, B und E; l. °गच्छेय° ? 11) °त्यूर्जयाज्ञां B; 12) °रोविद् A und E; 13) °नेयज्ञं E; 14) परी° B; 15) Sic.!! ऽधीत्यं E; 16) गा E; 17) °विद्वृतो B und C.

दिति स्यात्किमभिवह्देत्किमभ्यश्नुयादिति[1] ' तस्मादृग्विद-मेव[2] होतारं वृणीष्व[3] यजुर्विदमध्वर्युं[4] सामविदमुद्गा-तारमथर्वाङ्गिरोविदं ब्रह्माणं ' तथा ह्यस्य यज्ञश्चतुर्षु लो-केषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पा-द्यज्ञः प्रतितिष्ठति[5] ' प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद[6] यश्चैवमृत्विजामार्त्विज्यं वेद यश्च यज्ञे यजनीयं[7] वेदेति ब्राह्मणम् ' ॥ १ ॥

प्रजापतिर्यज्ञमतनुत[8] ' स[9] ऋचैव[9] हौत्रमकरोद्यजुषा-ध्वर्यवं[10] साम्नौद्गात्रमथर्वाङ्गिरोभिर्ब्रह्मत्वं[11] ' तं वा एतं[12] महावाद्यं[13] कुरुते यदृचैव हौत्रमकरोद्यजुषाध्वर्यवं सा-म्नौद्गात्रमथर्वाङ्गिरोभिर्ब्रह्मत्वं[14] ' स वा एष त्रिभिर्वेदैर्य-ज्ञस्यान्यतरः पक्षः संस्क्रियते[15] ' मनसैव ब्रह्मा यज्ञस्या-न्यतरं[16] पक्षं[17] संस्करोत्ययमु वै यः पवते स यज्ञस्तस्य[18] मनश्च वाक्च वर्तनी[19] ' मनसा चैव हि वाचा च[20]

---

1) °श्नुयादिति C; °ःयपीयादिति E; 2) °ग्विदमिव A und C; °ग्वेदमेव E; 3) वृणोष्वं E; 4) यजुर्वे° E; 5) So corr.; die hss. प्रतिष्ठति; 6) वेदं E; 7) यजनेयं E; 8) °नुतं E; 9) सपृन्नचै E; 10) होत्र° C und E; 11) °ब्रह्मा C; °ब्रह्म E; 12) Von एतं bis एव fehlt in E; 13) महावाद्यं; B महावाद्य! sic.! cf. Ait. Br. V 33. 1; 14) साम्नौद्गात्र° A; 15) संक्रियते E; 16) यज्ञस्यां न्यतरं A; 17) पक्ष E; 18) यज्ञस्तस्या B; 19) So corr.; die hss. वर्तनिः; 20) Fehlt in E.

यज्ञो[1] वर्तते[1] ऽह[1] एव मन इयमेव वाक्स यद्ध-
न्नास्ति[2] विद्यादर्धं[3] मे ऽस्य यज्ञस्यान्तरगादिति[4]। तद्यथै-
कपात्पुरुषो यन्नेकचक्रो[5] वा रथो[6] वर्तमानो भ्रेषं[7]
न्येत्येवमेवास्य यज्ञो भ्रेषं[8] न्येति। यज्ञस्य[9] भ्रेषमनु यज-
मानो भ्रेषं न्येति[10]। यजमानस्य भ्रेषमन्वृत्विजो[11] भ्रेषं[12]
नियन्त्यृत्विजां[13] भ्रेषमनु दक्षिणा भ्रेषं[8] नियन्ति। दक्षि-
णानां भ्रेषमनु यजमानः पुत्रपशुभिर्भ्रेषं न्येति। पुत्रपशूनां
भ्रेषमनु यजमानः[14] स्वर्गेण लोकेन भ्रेषं[8] न्येति।
स्वर्गस्य लोकस्य भ्रेषमनु तस्यार्धस्य योगक्षेमो भ्रेषं[15]
न्येति यस्मिन्नर्धे यजन्त इति ब्राह्मणम्। ॥ २ ॥

तद्ध स्माह श्वेतकेतुरारुणेयो[16] ब्रह्माणं दृष्ट्वा भा-
षमाणमर्धं[17] मे[18] ऽस्य यज्ञस्यान्तरगादिति। तस्माद्ब्रह्मा
स्तुते बहिःपवमाने वाचोयम्यमुपांश्वन्तर्यामाभ्यामथ[19] ये
पवमाना[20] ओदृचस्तेष्वथ[21] यानि[22] स्तोत्राणि सशस्त्रा-

1) So corr. nach Ait. B. V 33. 3 die hss. यज्ञे वर्त्यत; 2) Sic.; 3) विद्यादर्ध E; 4) यज्ञस्यावरग° B; 5) यज्ञन्ने° B; 6) रथो E; 7) भ्रेव A, C und B; 8) भ्रेव B und C; 9) Von यज्ञस्य bis नियन्त्यृ° fehlt in B; 10) नेति A; 11) भ्रेवमुत्वत्विजो E; 12) भ्रेव E; 13) °त्विजो E; 14) Von यजमानः bis तस्यार्धस्य fehlt in E; 15) भ्रेव C; 16) श्वेतके° A; °रुणोयो B; °रुणो E; 17) °नर्ध E; 18) न E; 19) वाचोयम्यं?; Ait. B. वाचंयमः; 20) So corr.; °मान alle; 21) A und B उदुचुस्ते°; C उदचुस्ते°; E उदृचुस्ते°; 22) Die hss. fügen hier च ein.

एषा[1] वषट्कारान्तेषु[2] ' स यदृक्तो श्रेषं न्यृच्छेदों[3] भूर्जनदिति गार्हपत्ये जुहुयाद्यदि[4] यजुष्ट[5] ओं भुवो[6] जनदिति दक्षिणाग्नौ जुहुयाद्यदि सामत ओं स्वर्जनदित्याहवनीये जुहुयाद्यद्यनाज्ञाताद्ब्रह्मतो वों भूर्भुवः[7] स्वर्जनदोमित्याहवनीय एव जुहुयात्तद्वाकोवाक्यस्यर्चां यजुषां साम्नामथर्वाङ्गिरसामंथापि[8] वेदानां रसन यज्ञस्य विरिष्टं[9] संधीयते' तद्यथा लवणेनेत्युक्तं[10]' तद्यथोभयपात्पुरुषो यन्नुभयचक्रो वा रथो वर्तमानो ऽश्रेषं[11] न्येत्येवमेवास्य[12] यज्ञो ऽश्रेषं[11] न्येति' यज्ञस्याश्रेषमनु यजमानो ऽश्रेषं न्येति' यजमानस्याश्रेषमन्वृत्विजो ऽश्रेषं नियन्त्यृत्विजामश्रेषमनु[13] दक्षिणा अश्रेषं[14] नियन्ति' दक्षिणानामश्रेषमनु यजमानः पुत्रपशुभिरश्रेषं[15] न्येति' पुत्रपशूनामश्रेषमनु यजमानः स्वर्गेण[16] लोकेनाश्रेषं न्येति[17]' स्वर्गस्य लोकस्याश्रेषमनु तस्यार्धस्य योगक्षेमो[18] ऽश्रेषं न्येति यस्मिन्नर्धे[19] यजन्त इति ब्राह्मणम्' ॥ ३ ॥

---

1) Die hss. haben चशत्ता°; 2) °रांतेषु E; 3) So corr.; die hss. नियच्छे°; 4) जुहुयादितियदि E; 5) यष्ट B; यजुष्टं E; 6) भूवो B; 7) भुर्भुवः B; 8) °नथापि E; 9) विरिष्टं रं विरिष्टं C; 10) लवणेनोत्युक्तं B; vid. Gop. Br. I 1. 14; 11) ऽश्रेष C; 12) एवं fehlt in C; 13) °विज्ञानामश्रे° C und E; 14) श्रेषं A und B; 15) श्रेष C; 16) स्वर्गेणां B; 17) नेति E; 18) योगक्षमो E; 19) यास्मि° A.

तस्यदौदुम्बर्यां[1] म आसिष्ट[2] हिङ्कार्षीन्मे[3] प्रास्तावीन्म उदगासीन्मे[4] सुब्रह्मण्यामाह्वासीदित्युद्गात्रे[5] दक्षिणा नीयते ' यद्धान्मे[6] ऽग्रहीत्प्राचारीन्मे[7] ऽशुश्रुवन्मे[8] समनसस्कार्षीदियाक्षीन्मे[9] ऽवषट्कार्षीन्म इत्यध्वर्यवे ' होतृषदन आसिष्टायाक्षीन्मे[10] ऽशंसीन्मे[11] ऽवषट्कार्षीन्म[12] इति होत्रे ' देवयजनं[13] मे ऽचीक्लृपद्ब्रह्मासादं[14] मे ऽसीसृपद्ब्रह्मजपान्मे[15] ऽजपीत्पुरस्ताद्धोमसंस्थितहोमान्मे ऽहौषीदयाक्षीन्मे ऽशंसीन्मे ऽवषट्कार्षीन्म[16] इति ब्रह्मणे[17] ' भूयिष्ठेन मा[18] ब्रह्मणाकार्षीदित्येतद्धि[19] भूयिष्ठं ब्रह्म यद्भृग्वङ्गिरसो ' ये[20] ऽङ्गिरसः[20] स रसो ये[21] ऽथर्वाणो[21] ये ऽथर्वाणस्तद्भेषजं ' यद्भेषजं तदमृतं यदमृतं तद्ब्रह्म ' स वा एष[22] पूर्वेषामृत्विजामर्धभागस्यार्धमितरेषामर्धं[23] ब्रह्मण इति ब्राह्मणम् ' ॥ ४ ॥

---

1) So corr. A, B und C °दुम्बर्यान्; E °दुम्बर्यं; 2) आशिष्ट C und E; 3) So corr. die hss. हिंकृणोत्; 4) उदक आसीन्मे A sec. m.; 5) °त्युहात्रे E; 6) आहान्मे B und C; 7) °चोरीन्मे B; 8) शुश्रवन्मे E; 9) समनसस्कार्षीत् ??; 9) A, B und C fügen ऽशांसीन्मे ein; 10) आशिष्टा° C; 11) शंसीन्मे C; शांशीन्मे E; 12) °ट्कार्षन्म E; 13) °जनां E; 14) °सादन C; 15) सीदयद्ब्र° C; सीस्वपद्ब्रह्मासादन्ते E; 16) ऽवषट्कारीन्म C; °षान्म E; 17) ब्रह्मणो E; 18) मा? vielleicht मे; 19) ब्रह्मणान्कार्षीदित्येताद्धि B; 20) In A zweimal ये ऽङ्गिरसः; 21) Wahrscheinlich Dittografie; 22) एवं E; 23) °भागनार्ध° B und C.

देवाश्च[1] ह वा असुराश्च संग्रामं समयतन्त । तत्रैतास्तिस्रो होत्रा[2] जिह्मं प्रतिपेदिरे । तासामिन्द्र उक्थानि[3] सामानि लुलोप । तानि होत्रे प्रायच्छदाज्यं ह वै होतुर्बभूव । प्रउगं पोतुर्वैश्वदेवं ह[4] वै[4] होतुर्बभूव[4] । निष्केवल्यं नेष्टुर्मरुत्वतीयं ह वै होतुर्बभूवाग्निमारुतमाग्नीध्रस्य । तस्मादेतदभ्यस्ततरमिव शस्यते यदाग्निमारुतं[5] । तस्मादेते[6] संशंसुका[7] इव भवन्ति यद्धोता पोता नेष्टाग्नीध्रो मुमुहे[8] वसीत[8] । तद्ब्रह्मेयसामिवास । तासामर्धं[9] प्रतिलुलोप[10] प्रथमार्हणं च प्रथमपदं[11] चैतद्दक्षिणां[12] चैतत्परिशिषेदिदिति[13] ब्राह्मणम् । ॥ ५ ॥

उद्दालको ह वा आरुणिरुदीच्यान्वृतो[14] धावयां चकार । तस्य ह निष्क[15] उपाहितो बभूवोपवादाद्बिभ्यतो[16] यो मा[17] ब्राह्मणो ऽनूचान उपवदिष्यति[18] तस्मा एतं प्रदास्यामीति । तद्धोदीच्यान्ब्राह्मणान्भयं[19] विवेदो-

---

1) देवश्च A; 2) So corr.; die hss. होत्रका; 3) उच्छानि B und C; 4) ह वै होतुः fehlt in E; 5) यदाग्नीमरुतं E; 6) °देतं C und E; 7) शंशंसुका E; 8) मुमोह A, B und E; besser wäre: मोह एवासीत्; 9) तासामर्धं E; 10) प्रती° A; 11) प्रथमं पदं C; 11) und 12) प्रथपदैतदृदक्षणां E; 13) Sic! चैतत्परिशषेदिति C; 14) आरुणिरुदि° E; 15) निस्क C; 16) °दाद्भियतो B; °दाद्विभ्यता C; 17) मां A und B; 18) °दिष्यत B; 19) °ह्मणा भयं E.

द्दालको ह वा अयमायाति[1] कौरुपञ्चालो[2] ब्रह्मा[3] ब्रह्मपुत्रः । स[4] ऊर्ध्वं[4] वृतो[4] न[4] पर्यादधीत[4] । केनेमं वीरिण प्रतिसंयतामद्धा इति । तं यत एव[5] प्रपन्नं दध्रे तत एवमनुप्रतिपेदिरे[6] । ते[7] ह स्वैदायनं शौनकमूचुः स्वैदायन त्वं वै नो ब्रह्मिष्ठो[8] ऽसीति । त्वयेमं वीरिण प्रतिसंयतामद्धा इति । तं यत एव प्रपन्नं[9] दध्रे तत एवमनुप्रतिपेदिरे[10] । तं ह स्वैदायना[11] इत्यामन्त्रयामास । स भो[12] गौतमस्य[13] पुत्रेति[14] हास्मा असूया[15] प्रतिश्रुतं प्रतिशुश्राव । स वै गौतमस्य[16] पुत्र ऊर्ध्वं[17] वृतो धावेत्[18] ॥ ६ ॥

यस्तद्दर्शपूर्णमासयो[19] रूपं[20] विद्यात्कस्मादिमाः[21] प्रजाः शिरस्तः प्रथमं लोमशा जायन्ते कस्मादासामपरमिव श्मश्रूण्युपकक्षाण्यन्यानि[22] लोमानि जायन्ते । यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमाः[23] प्राजाः शिरस्तः[24] प्रथमं

---

1) अमयति E; 2) °पाञ्चलो B; 3) ब्राह्मा B; 4) Corrupt. 5) एवं C; 6) l. एनम°?; 7) So corr.; तं A, C und E; त B; 8) अलेषु E; 9) प्रपन्न B; 10) l. एनम°?; 11) स्वैदा° B; 12) So corr.; die hss. हो; 13) गोतमस्य A pr. m.; B und C; 14) So corr.; पुत्रतीति A, B und C; पुत्रोतीति E; 15) असूयात् A, C und E; 16) गोतमस्य A sec. man. B und C; 17) ऊर्ध्व E; 18) So corr.; A, B und C धात्रीत्; E धात्रीत; 19) यनुदर्शपू° E; 20) रूपं B; 21) कस्मात् sic!; 22) °पचनानि E; 23) °स्मादिनां E; 24) Von शिरस्तः bis अदन्निका fehlt in B und C.

पलिता भवन्ति कस्माद्दन्तः[1] सर्वा एव पलिता भवन्ति' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमाः प्रजा अदन्तिका जायन्ते कस्मादासामपरमिव[2] जायन्ते' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादासां सप्तवर्षाष्टवर्षाणां[3] प्रभिद्यन्ते कस्मादासां[4] पुनरेव जायन्ते[5] कस्माद्दन्तः सर्व एव प्रभिद्यन्ते' यस्तद्दर्शपूर्णमासयो रूपं[6] विद्यात्कस्मादधरे दन्ताः पूर्वे[7] जायन्ते पर उत्तरे' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादधरे दन्ता अणीयांसो ह्रसीयांसः[8] प्रथीयांसो वर्षीयांस[9] उत्तरे' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमौ दंष्ट्रौ दीर्घतरौ कस्मात्समे इव[10] जंभे[11]' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिमे श्रोत्रे अन्तरतः समे इव दीर्णे' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मात्पुमांसः श्मश्रुवन्तो[12] ऽश्मश्रुवः स्त्रियो' यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादासां संततमिव शरीरं भवति कस्मादासामस्थीनि दृढतराणीव[13] भवन्ति' यस्तद्दर्शपूर्णमासयो रूपं ·· द्यात्कस्मादासां प्रथमे वयसि रेतः सिक्तं न संभवति

---

1) Fehlt in E; 2) °परिमिव B; 3) °र्षाणा B; °ष्टवर्षा° fehlt in E; 4) °दासा E; 5) जायते B; 6) रूप B; 7) Von पूर्वे bis अणीयांसः fehlt in E; 8) ह्रसीयासः B; 9) वर्षीयांस B und E; 10) इमेव A und C; 11) जम्भो B; 12) श्मश्रवतो B; 13) दृढतराणी C;

कस्मादासां[1] मध्यमे वयसि रेतः सिक्तं संभवति कस्मादासामुत्तमे वयसि रेतः सिक्तं न संभवति । यस्तद्दर्शपूर्णमासयो रूपं विद्यात्कस्मादिदं शिश्नमुच्चश[2] इति नीची[3]पद्यते । कस्मात्सकृदपानम्[4] ॥ ७ ॥

अथ[5] यः[5] पुरस्तादष्टावाज्यभागान्विद्यान्मध्यतः पञ्च हविर्भागाः षट्प्राजापत्या उपरिष्टादष्टावाज्यभागान्विद्यादथ यो गायत्रीं[6] हरिणीं[7] ज्योतिष्पक्षां[8] सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहन्तीं[9] विद्यादथ यः पङ्क्तिं[10] पञ्चपदां सप्तदशाक्षरां सर्वैर्यज्ञैर्यजमानं स्वर्गं लोकमभिवहन्तीं[11] विद्यात्तस्मै ह निष्कं प्रयच्छन्नुवाचानूचानो[12] ह वै स्वैदायनासि[13] सुवर्णं[14] वै[14] सुवर्णविदे[15] ददामीति । तदुपयम्य निश्चक्राम[16] । तत्रापवव्राज[17] यत्रेतरो बभूव । तं ह पप्रच्छ[18] किमेष गौतमस्य[19] पुत्र इत्येष ब्रह्मा ब्रह्मपुत्र[20] इति होवाच[21] यदेनं कश्चिदुपवदेतोत[22] मीमां-

---

1) °दाना E; 2) उचश sic!; 3) नीचो corrupt; 4) °दपादानम् C; °दयानम् E; 5) अप्रयः E; 6) गायित्रीं C; 7) हरीणीं E; 8) ज्योतिष्यं E; ज्योतिष्पक्षा C; 9) °वहन्तो E; °वहन्तिं C; 10) पङ्क्तिं A pr. m. und E; 11) °वहन्तिं C; वहन्तो E; 12) प्रयतनु° E; 13) So corr. A, C und E °यनास; B स्वैदायनांस; 14) सुवर्णत्वे C; वै fehlt in E; 15) Nur विदे in E; C fügt ह ein; 16) निश्चक्रम्य A und E; 17) So corr.; तत्रापव्राज A sec. man. und B, तत्रपव्रज C; तत्रापव्रज E und A pr. m.; 18) प्रयच्छ C; 19) गोत° A sec. m., B, C und E; 20) ब्रह्म B; 21) होवांच B; 22) °देतोत B; °देतोतं A.

सेत[1] दृ[2] वा[2] मूर्धा वा[2] अस्य[2] विपतेत्प्राणा वैनं जह्युरिति[3] । ते मिथ एव चिक्रन्देयुर्विप्रापवव्रज[4] यत्रेतरो बभूव[5] । ते प्रातः समित्पाणय उपोदियुरुपायामो भवन्तमिति । किमर्थमिति । यानेव नो भवांस्तान्यः प्रश्नानपृच्छस्तानेव[6] नो भवान्व्याचक्षीतिति[7] । तथेति । तेभ्य एतान्प्रश्नान्व्याचचक्षे[8] ॥ ८ ॥

यत्पुरस्ताद्वेदेः प्रथमं बर्हि स्तृणाति तस्मादिमाः प्रजाः शिरस्तः प्रथमं लोमशा जायन्ते । यदपरमिव प्रस्तरमनुप्रस्तृणाति तस्मादासामपरमिव श्मश्रूण्युपकक्षाण्यन्यानि[9] लोमानि जायन्ते । यत्प्राग्बर्हिषः प्रस्तरमनुप्रहरति तस्मादिमाः प्रजाः शिरस्तः प्रथमं[10] पलिता भवन्ति । यदन्ततः सर्वमिवानुप्रहरति तस्मादन्ततः सर्व एव पलिता भवन्ति । यत्प्रयाजा[11] अपुरोऽनुवाक्यावन्तो[12] भवन्ति तस्मादिमाः प्रजा अदन्तिका जायन्ते । यद्धवींषि[13] पुरोऽनुवाक्यावन्ति भवन्ति तस्मादासामपरमिव जायन्ते । यदनुयाजा अपुरो-

---

1) नांसेति B; 2) Corrupt; 3) So B. Ind.; die hss. जह्लु°; 4) चिक्रान्देयुः corrupt °विप्रापवव्रज A und B; °विप्रा अपवव्रज C und E; corrupt; 5) बभूवः A und E; बभूवुः B und C; 6) So corr.; A und B °पृच्छया-नेव, C °पृच्छयानेव, E °पृच्छायानेव; 7) So corr.; die hss. °गेति; 8) Vgl. I 2. 13; 9) श्मरश्रूण्यु° B; श्मश्रूण्यपक° C; °कक्षाण्यानि E; 10) Von प्रथमं bis यत्प्रयाजा fehlt in E; 11) यत्प्रजाजा C; 12) अपुरेऽनु° E; 13) यद्धवींषि B.

ऽनुवाक्यावन्तो भवन्ति तस्मादासां सप्तवर्षाष्टवर्षाणां[1] प्रभिद्यन्ते । यत्पत्नीसंयाजाः पुरोऽनुवाक्यावन्तो[2] भवन्ति तस्मादासां पुनरेव जायन्ते । यत्समिष्टयजुरपुरोऽनुवाक्यावद्भवति[3] तस्मादन्ततः सर्व एव प्रभिद्यन्ते[4] । यद्गायत्र्यानूच्य[5] त्रिष्टुभा[6] यजति तस्मादधरे[7] दन्ताः[8] पूर्वे जायन्ते पर उत्तरे । यदृचानूच्य यजुषा[9] यजति तस्मादधरे दन्ता अणीयांसो ह्रसीयांसः[10] प्रथीयांसो वसीयांस[11] उत्तरे । यदाघारौ दीर्घतरौ प्राञ्चावाघारयति[12] तस्मादिमौ दंष्ट्रौ दीर्घतरौ । यत्संयाज्ये सच्छन्दसी[13] तस्मात्समे इव जम्भे । यच्चतुर्थे प्रयाजे[14] समानयति तस्मादिमे श्रोत्रे अन्तरतः समे इव दीर्णे । यज्जपं जपित्वाभिहिंकृणोति तस्मात्पुमांसः श्मश्रुवन्तो[15] ऽश्मश्रव[16] स्त्रियो । यत्सामिधेनीः संतन्वन्नन्वाह[17] तस्मादासां संततमिव शरीरं भवति[18] । यत्सामिधेन्यः काष्ठहविषो भवन्ति तस्मादासामस्थीनि दृढतराणीव[19] भवन्ति । यत्प्रयाजा आज्यहविषो भवन्ति तस्मा-

1) °वर्षाणा C; 2) °वाक्यवन्ति E; 3) अन्तमिष्ट° E; 4) प्रतिभिद्यन्ति E; 5) °नूत्य B; 6) C fügt व ein; 7) °दधार C; 8) Von दन्ताः bis अणीयांसः fehlt in B; 9) यजुष E; 10) ह्नणीयांसः B; 11) वसीयांस B; वधीयीयांस E; 12) प्रञ्चावा° C; 13) संछन्दसि A; संछन्दसी B und E; 14) प्रयायाजे B; प्रजाते C; 15) Fehlt in E; 16) ऽश्मश्रुवं B; 17) So corr. संतन्वन्नाह A, C und E; संतन्वन्ता ह B; 18) भवन्ति B; 19) दृढतराणिव B.

दासां प्रथमे वयसि रेतः सिक्तं न संभवति ' यन्मध्ये हविषां[1] दध्ना च पुरोडाशेन च[2] प्रचरन्ति तस्मादासां मध्यमे वयसि रेतः सिक्तं संभवति[3] ' यदनुयाजा आज्यहविषो[4] भवन्ति तस्मादासामुत्तमे वयसि रेतः सिक्तं न संभवति[5] ' यदुत्तमे ऽनुयाजे सकृदपानिति तस्मादिदं शिश्नमुच्चश[6] इति नीचीपद्यते[7] ' यन्नापानेत्सकृच्छूनं स्याद्यन्मुहुरपानेत्सकृत्पन्नं स्यात्तस्मात्सकृदपानिति नेत्सकृच्छूनं स्यात्सकृत्पन्नं वेति ' ॥ १ ॥

अथ ये पुरस्तादष्टावाज्यभागाः पञ्च प्रयाजा[8] द्वावाघारौ[9] द्वावाज्यभागावाग्नेय[10] आज्यभागानां प्रथमः सौम्यो[11] द्वितीयो[12] हविर्भागानां ' हविर्ह्येव सौम्यमाग्नेयः पुरोडाशो ' ऽग्नीषोमीय उपांशुयाजो[13] ' ऽग्नीषोमीयः पुरोडाशो ऽग्निः स्विष्टकृदित्येते मध्यतः पञ्च हविर्भागा ' अथ ये षट् प्राजापत्या[14] इडा च प्राशित्रं च यच्चाग्नीध्रायावद्यति ब्रह्मभागो यजमानभागो ऽन्वाहार्य[15] एव षष्ठो ' ऽथ य उपरिष्टादष्टावाज्यभाग[illegible] त्रयो[16] ऽनुयाजाश्चत्वारः पत्नीसं-

1) हविषो E; 2) [illegible] ...hlt in A pr. m.; B, C und E; 3) संभवन्ति B; 4) अन्य[illegible] 5) संभवन्ति E; 6) उच्चशत् corrupt! 7) नीची corrupt; 8) प्रजाया C; प्रयजि B; 9) हि वाघारौ B; 10) लाज्यास्य° E; 11) सोम्य B; 12) द्वितीयो C; 13) उपांसु° E; 14) °जापत्य A pr. m.; 15) ऽन्वाहाय E; 16) उरिष्टावाज्य° B.

याज्याः समिष्टयजुरष्टममथ या गायत्री[1] हरिणी[2] ज्योतिष्पक्षा[3] सर्वैर्यज्ञैर्यजमानं[4] स्वर्गं लोकमभिवहति वेदिरेव सा[5]। तस्य ये पुरस्तादष्टावाज्यभागाः स दक्षिणः पक्षोऽथ य उपरिष्टादष्टावाज्यभागाः स उत्तरः पक्षो। हविष्यात्मा। गार्हपत्यो जघनमाहवनीयः[6] शिरः। सौवर्णराजतौ पक्षौ। तद्यदादित्यं पुरस्तात्पर्यन्तं न पश्यन्ति तस्माज्ज्योतिष्क उत्करो[7] भवत्यथ या पङ्क्तिः पञ्चपदा[8] सप्तदशाक्षरा सर्वैर्यज्ञैर्यजमानं स्वर्गं[9] लोकमभिवहति[10] याज्यैव[11] सा। तस्या ओं श्रावयेति चतुरक्षरमस्तु[12] श्रौषडिति चतुरक्षरं। यजेति[13] द्व्यक्षरं[14]। ये[15] यजामहे[15] इति पञ्चाक्षरं। द्व्यक्षरो[16] वै वषट्कारः। सैषा पङ्क्तिः पञ्चपदा सप्तदशाक्षरा सर्वैर्यज्ञैर्यजमानं[17] स्वर्गं[18] लोकमभिवहति। तद्यत्रास्यैश्वर्यं स्याद्यत्र वैनमभिवहेयुरेवंविदमेव तत्र ब्रह्माणं वृणीयान्नानेवंविदमिति[19] ब्राह्मणम्। ॥ १० ॥

अथ ह प्राचीनयोग्य आजगामाग्निहोत्रं भवन्तं पृच्छा-

---

1) गायत्रीं B; 2) हरणो B; 3) ज्योतिष्पक्षां E; 4) °जमान C; 5) सां B; 6) °हवनीः E; 7) उत्तरो B; उत्तरे C; उत्तरो E; 8) °पदात् E; 9) स्वर्ग B und C; 10) लोकमभिवहति C; 11) यां येव E; 12) चतुरक्ष-मस्तु E; 13) यजेति A, B und C; 14) द्यक्षरं C; 15) ये: यजामहे B; ये यज्यामहे C; य यजजामहे E; 16) द्व्यक्षरो E; 17) यज्ञैः fehlt in A; 18) स्वर्गं E; 19) वृणीयान्नने° E.

मि[1] गौतमेति[2] । पृच्छ[3] प्राचीनयोग्येति[4] । किंदेवत्यं ते गवीडायां[5] । किंदेवत्यमुपह्वतायां । किंदेवत्यमुपसृष्टायां । किंदेवत्यं[6] वत्समुन्नीयमानं[7] किंदेवत्यं वत्समुन्नीतं[7] । किंदेवत्यं दुह्यमानं । किंदेवत्यं दुग्धं । किंदेवत्यं प्रक्रम्यमाणं । किंदेवत्यं ह्रियमाणं[8] । किंदेवत्यमधिश्रीयमाणं[9] । किंदेवत्यमधिश्रितं । किंदेवत्यमभ्यवज्वाल्यमानं[10] । किंदेवत्यमभ्यवज्वालितं । किंदेवत्यं समुद्वान्तं[11] । किंदेवत्यं विष्यन्नं । किंदेवत्यमद्भिः[12] प्रत्यानीतं । किंदेवत्यमुद्वास्यमानं । किंदेवत्यमुद्वासितं[6] । किंदेवत्यमुन्नीयमानं[6] । किंदेवत्यमुन्नीतं[6] । किंदेवत्यं[6] प्रक्रम्यमाणं[6] । किंदेवत्यं ह्रियमाणं[13] । किंदेवत्यमुपसाद्यमानं[14] किंदेवत्यमुपसादितं । किंदेवत्या[15] समित्किंदेवत्यां[16] प्रथमामाहुतिमहौषीः । किंदेवत्यं गार्हपत्यमवेक्षिष्ठाः । किंदेवत्योत्तराहुतिः । किंदेवत्यं हुत्वा स्रुचं त्रिरुदञ्चमुदनैषीः[17] । किंदेवत्यं बर्हिषि स्रुचं[18] निधायोन्मृज्योत्तरतः पाणी निर-

---

1) So corr. vgl. I 3. 13, die hss. पृच्छेद् ; 2) गोतम इति A sec. m. und B; गोतमेति C und E; 3) पृच्छं B; 4) °योग्नेति A; 5) गविडायां A; 6) Fehlt in E; 7) Corrupt! 8) ह्रीय° A pr. m. und E; 9) °श्रियमाणं A sec. m. und C; 10) °देवत्यमध्य° B; 11) समुद्वान्तं C, समुद्रान्तं E; 12) Von किं° bis उन्नीयमानं fehlt in B; 13) ह्रीयमाणं A und E; 14) °पसाद्यमानं C; 15) °देवत्यसमित्कं किं A; 16) °देवत्या E; 17) So corr.; die hss. °मुन्नैषी: ; 18) स्रुच E.

मार्क्षीः[1] 'किंदेवत्यं द्वितीयमुन्मृज्य पित्र्युपवीतं कृत्वा दक्षिणतः पितृभ्यः स्वधामकार्षीः 'किंदेवत्यं प्रथमं[2] प्राशीः 'किंदेवत्यं द्वितीयं 'किंदेवत्यमन्ततः सर्वमेव[3] प्राशीः 'किंदेवत्यमप्रक्षालितयोदकं स्रुचा न्यनैषीः 'किंदेवत्यं प्रक्षालितया 'किंदेवत्यमपरेणाहवनीयमुदकं स्रुचा[4] न्यनैषीः[5] 'किंदेवत्यं स्रुवं[6] स्रुचं[7] च प्रत्यताप्सीः' किंदेवत्यं रात्रौ स्रुग्दण्डमवामार्क्षीः[8] 'किंदेवत्यं प्रातरुदमार्क्षीरित्येतच्चेद्वेत्थ[9] गौतम हुतं ते[10] यद्यु न वेत्थाहुतं त[11] इति ब्राह्मणम्' ॥ ११ ॥

स होवाच रौद्रं[12] मे गवीडायां 'मानव्यमुपहूतायां' वायव्यमुपसृष्टायां 'वैराजं वत्समुन्नीयमानं 'जागतमुन्नीतमाश्विनं[13] दुह्यमानं 'सौम्यं[14] दुग्धं 'बार्हस्पत्यं प्रक्रम्यमाणं 'द्यावापृथिव्यं[15] ह्रियमाणमाग्नेयमधिश्रीयमाणं[16] 'वैश्वानरीयमधिश्रितं 'वैष्णवमभ्यवज्वाल्यमानं 'मारुतम-

---

1) So corr.; die hss. निर्मार्क्षीः A; निर्मार्क्षो: B, C und E; 2) प्रथम E; 3) सर्वमेवा A, B und E; 4) सूचा B; 5) न्यनीषी: C; 6) स्रुक् C und B; 7) स्रुवं C; fehlt in E; 8) °वमार्क्षीः A, B und C; °वमार्क्षो: E; 9) So corr.; A und B प्रातरुन्मार्क्षो°; C und E प्रातरुन्मार्क्षो°; 10) So corr.; die hss. चेद्; 11) च E; 12) रौद्र् B; 13) जागतमुन्नित° B; 14) सौम्य B; 15) द्यावापृथिव्यां B; °थिव्यां A und C; 16) ह्रियमा° A und E.

ऽभ्यवज्वालितं । पौष्णं[1] समुद्धान्तं । वारुणं विष्यणं । सार-
स्वतमद्भिः प्रत्यानीतं । त्वाष्ट्रमुद्वास्यमानं । धात्रमुद्वासितं ।
वैश्वदेवमुन्नीयमानं[2] । सावित्रमुन्नीतं[3] । बार्हस्पत्यं प्रक्रम्य-
माणं । द्यावापृथिव्यं[4] ह्रियमाणमैन्द्रमुपसाद्यमानं[5] । ब-
लायोपसन्नमांग्नेयी[6] समिद्धां[7] प्रथमामाहुतिमहौषं मामेव
तत्स्वर्गे लोके ऽधां । यद्गार्हपत्यमवेक्षिषमस्य[8] लोकस्य
संतत्यै[9] । प्राजापत्योत्तराहुतिस्तस्मात्पूर्णतरा[10] मनसैव
सा । यद्धुत्वा स्रुचं[11] त्रिरुदञ्चमुदनैषं[12] रुद्रांस्तेनाप्रैषं[13] ।
यद्बर्हिषि स्रुचं[14] निधायोन्मृज्योत्तरतः पाणी[15] निरमा-
र्क्ष्मोषधिवनस्पतींस्तेनाप्रैषं[16] । यद्द्वितीयमुन्मृज्य पित्र्युप-
वीतं कृत्वा दक्षिणतः पितृभ्यः स्वधामकार्षं[17] पितॄंस्ते-
नाप्रैषं[18] । यत्प्रथमं प्राशिषं प्राणांस्तेनाप्रैषं[19] । यद्द्वितीयं
गर्भांस्तेन[20] । तस्मादनश्नन्तो गर्भा जीवन्ति[21] । यदन्ततः
सर्वमेव प्राशिषं[22] विश्वान्देवांस्तेनाप्रैषं[23] । यदप्रक्षालित-

---

1) पौष्ण E; 2) Fehlt in E; 3) सावित्रम् fehlt in E; 4) °पृथिव्यां A pr. m.; B und C; 5) ह्रीय° A und E; 6) Sic! 7) समीधां E; समिधा B; 8) धा यद्गा° B; 9) सतत्यै C und E; 10) प्राजपत्यो° B; 11) स्रुवं B; स्रुतं E; 12) So corr.; die hss. °मुनैषं; 13) रुद्रास्ते° B; 14) स्रुतं E; 15) पाणि E; 16) So corr.; A, B und E निर्मार्ज्यमो°; C निर्मार्जमो°; 17) °मकार्ष B; 18) °नाप्रैषा E; 19) प्रापांस्ते° A; 20) गर्भस्तेन B; 21) जीवन्ते B; 22) सर्वमेवाप्राशिषं C; 23) विश्वा-न्देवास्ते° E.

योदकं स्रुचा न्यनैषं[1] सर्पेतरजनांस्तेनाप्रैषं । यत्प्रक्षालितया[2] सर्पपुण्यजनांस्तेन[3] । यदपरेणाहवनीयमुदकं स्रुचा न्यनैषं गन्धर्वाप्सरसस्तेनाप्रैषं । यत्स्रुवं[4] स्रुचं च प्रत्यताप्सं[5] सप्तर्षींस्तेनाप्रैषं । यद्रात्रौ स्रुग्दण्डमवामार्क्षं[6] ये रात्रौ संविशन्ति दक्षिणांस्तानुदनैषं[7] । यत्प्रातरुदमार्क्षं[8] ये प्रातः प्रव्रजन्ति दक्षिणांस्तानुदनैषमिति[9] ब्राह्मणम् । ॥ १२ ॥

एवमेवैतद्वो यथा भवानाह । पृच्छामि त्वेव[10] भवन्तमिति । पृच्छ प्राचीनयोग्येति । यस्य सायमग्नय उपसमाहिताः स्युः सर्वे ज्वलयेयुः[11] प्रक्षालितानि यज्ञपात्राण्युपसन्नानि[12] स्युरथ चेद्दक्षिणाग्निरुद्वायात्किं वा ततो भयमागच्छेदिति । क्षिप्रमस्य पत्नी प्रैति यो ऽविद्वाञ्जुहोति । विद्यया त्वेवाहमभिजुहोमीति[13] । का ते विद्या का प्रायश्चित्तिरिति । गार्हपत्यादधि दक्षिणाग्निं प्रणीय प्राचो[14] ऽङ्गारानुद्धृत्य प्राणापानाभ्यां[15] स्वाहेति जुहुयादथ[16] प्रातर्यथास्थानमग्नीनुपसमाधाय यथापुरं जुहुयात्सा[17] मे

---

1) न्यनैष E; 2) °लितयो B; 3) °नंस्तेन B; 4) यत्स्रुव E; 5) प्रत्यताप्स B; 6) So corr. °वनार्च्य A und B; °वमार्च्च C und E; 7) So corr.; die hss. °नुन्नैषं; 8) Vgl. 6; 9) Vgl. 7; 10) त्वेवं B; त्वेनो E; 11) ज्वलयेयु E; 12) °सन्तानि E; सन्नानि C; 13) °हो-मिति C; 14) प्राञ्चो C; 15) प्रापाणायाताभ्यां E; 16) Statt जुहुयाद् erwartet man hier und an den folgenden Stellen जुहुयात्; 17) जुहु° C.

विद्या । सा प्रायश्चित्तिरित्यथ चेदाहवनीय उद्वायात्किं वा
ततो भयमागच्छेदिति[1] । क्षिप्रमस्य पुत्रः प्रैति[2] यो ऽवि-
द्वाञ्जुहोति । विद्यया त्वेवाहमभिजुहोमीति । का ते विद्या
का[3] प्रायश्चित्तिरिति । गार्हपत्यादध्याहवनीयं प्रणीय[4]
प्रतीचो ऽङ्गारानुद्धृत्य[5] समानव्यानाभ्यां स्वाहेति जुहुया-
दथ[6] प्रातर्यथास्थानमग्नीनुपसमाधाय[7] यथापुरं जुहुयात्सा
मे विद्या सा प्रायश्चित्तिरित्यथ चेद्गार्हपत्य उद्वायात्किं
वा ततो भयमागच्छेदिति । क्षिप्रं गृहपतिः प्रैति यो
ऽविद्वाञ्जुहोति । विद्यया त्वेवाहमभिजुहोमीति[8] । का ते
विद्या का प्रायश्चित्तिरिति[9] । सभस्मकमाहवनीयं दक्षि-
णेन दक्षिणाग्निं परिहृत्य गार्हपत्यस्यायतने प्रतिष्ठाप्य
तत आहवनीयं प्रणीय[10] उदीचो ऽङ्गारानुद्धृत्योदानरू-
पाभ्यां[11] स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमा-
धाय[12] यथापुरं जुहुयात्सा मे विद्या सा प्रायश्चित्तिरि-
त्यथ[13] चेत्सर्वे ऽग्नय उद्वायेयुः किं वा ततो भयमागच्छे-

---

1) भयना fehlt in B; 2) प्रैतीति C; 3) Fehlt in E; 4) प्रणीया B; 5) गारानुढ्य B und E; 6) °यादृत्य B; 7) Von अग्नीन् bis इत्यथ fehlt in A pr. man., B, C und E und diese haben statt इत्यथ, इत्येवाथ; 8) तेवाह° E; 9) इति fehlt in E; 10) प्रणायेद् A pr. man.; प्रणायेद् B; प्रणीयेद् C; प्रणोये E; 11) गारानु° B und E; 12) Von अग्नीन् bis इत्यथ fehlt in A pr. m., B, C und E; und statt इत्यथ haben die hss. इत्येवाथ; 13) Von इत्यथ bis त्वेवा° fehlt in E.

दिति ' क्षिप्रं गृहपतिः सर्वज्यानिं[1] जीयते यो ऽविद्वाञ्जुहोति ' विद्यया त्वेवाहमभिजुहोमीति[2] ' का ते विद्या का प्रायश्चित्तिरित्यानडुहेन शकृत्पिण्डेनाग्न्यायतनानि[3] परिलिप्य होम्यमुपसाद्याग्निं[4] निर्मथ्य प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहोदानरूपाभ्यां[5] स्वाहेति जुहुयादथ प्रातर्यथास्थानमग्नीनुपसमाधाय[6] यथापुरं जुहुयात्सा मे विद्या सा प्रायश्चित्तिरित्यथ चेन्नाग्निं जनयितुं[7] शक्नुयुर्न[8] कुतश्चन वातो वायात्किं वा ततो भयमागच्छेदिति ' मोघमस्येष्टं च हुतं च भवति यो ऽविद्वाञ्जुहोति ' विद्यया त्वेवाहमभिजुहोमीति ' का ते विद्या का प्रयश्चित्तिरित्यानडुहेनैव[9] शकृत्पिण्डेनाग्न्यायतनानि[10] परिलिप्य होम्यमुपसाद्य वात[11] आ वातु भेषजमिति सूक्तेनात्मन्येव जुहुयादथ प्रातरग्निं[12] निर्मथ्य यथास्थानमग्नीनुपसमाधाय[13] यथापुरं जुहुयात्सा[14] मे विद्या सा प्रायश्चित्तिरिति ब्राह्मणम् ' ॥ १३ ॥

एवमेवैतद्भो भगवन्यथा भवानाहोपयामि त्वेव[15]

1) सर्वज्यानिं A; सर्वज्यनं C; 2) °होमनि B; 3) शकृर्वत्यपडेना° E; 4) °पसाद्याग्निं B; °पसाद्याग्नि C und E; 5) °रूपाभ्यां C; 6) Vgl. Seite ८१ Note 12; 7) जनयितु E; 8) शंकुर्युन B; शक्नुर्युर्न C; शक्नुर्युर्न E; 9) °नुडुहे° A und B; °त्यानडुहे° E; 10) शकृत्पिण्डेनाग्न्यायतनानि C; 11) व्रातु C; 12) °रग्नि E; 13) °नग्निनुपसमाधाय B; 14) जुहुयात्सो B; 15) त्वेव A und E; त्वे C.

भवन्तमित्येवं[1] चेन्नावक्ष्यो[2] मूर्धा ते व्यपतिष्यदिति[3] ' हन्त तु ते तद्वक्ष्यामि[4] यथा ते न विपतिष्यतीति[5] ' यो ह वा एवंविद्वानश्नाति च पिबति च वाक्तेन तृप्यति ' वाचि तृप्तायामग्निस्तृप्यत्यग्नौ तृप्ते पृथिवी तृप्यति ' पृथिव्यां तृप्तायां यानि पृथिव्यां भूतान्यन्वायत्तानि[6] तानि तृप्यन्ति ' यो ह वा[7] एवंविद्वानश्नाति च पिबति च प्राणस्तेन तृप्यति ' प्राणे तृप्ते वायुस्तृप्यति ' वायौ तृप्ते ऽन्तरिक्षं तृप्यत्यन्तरिक्षे[8] तृप्ते यान्यन्तरिक्षे भूतान्यन्वायत्तानि तानि तृप्यन्ति ' यो ह वा एवंविद्वानश्नाति च पिबति च चक्षुस्तेन तृप्यति ' चक्षुषि[9] तृप्त[10] आदित्यस्तृप्यत्यादित्ये तृप्ते द्यौस्तृप्यति ' दिवि[11] तृप्तायां यानि दिवि भूतान्यन्वायत्तानि[12] तानि[12] तृप्यन्ति[13] ' यो ह वा एवंविद्वानश्नाति च पिबति च मनस्तेन तृप्यति[14] ' मनसि तृप्ते चन्द्रमास्तृप्यति[15] ' चन्द्रमसि तृप्त आपस्तृप्यन्त्यप्सु तृप्तासु यान्यप्सु भूतान्यन्वायत्तानि[16] तानि तृप्यन्ति ' यो ह वा एवंवि-

---

1) °त्येव A; 2) वन्नवक्ष्ये C; चेन्नावेक्ष्य B; चेन्नवक्ष्य E; 3) °ष्यतीति A und E; °ष्यदिदिति C; 4) तद्वक्तानि E; 5) व्यपति° A pr. m.; विपतीति E; 6) °यन्तानि E; 7) व: E; 8) तृप्यन्त्येतरिक्षे C; तृप्यन्त्यन्त° E; 9) चक्षुषी A pr. m. und E; 10) तुप्त B; तृप्त C; 11) दिविस् B und E; 12) भूतानि C; 13) तृप्यन्तिं E; 14) तृप्यन्तिं E; 15) °प्यन्तिं E; 16) भूतान्वा° B.

द्वानश्नाति च पिबति च श्रोत्रं तेन तृप्यति ' श्रोत्रे तृप्ते दिशश्चान्तर्देशाश्च तृप्यन्ति ' दिक्षु चान्तर्देशेषु च तृप्तेषु यानि दिक्षु चान्तर्देशेषु च[1] भूतान्यन्वायत्तानि[1] तानि तृप्यन्ति ' यो ह वा एवंविद्वानश्नाति च पिबति च तस्यायमेव दक्षिणः पाणिर्जुहूः[2] ' सव्य[3] उपभृत्कण्ठो ध्रुवान्नं[4] हविः ' प्राणा ज्योतींषि[5] ' सदेष्टं[6] सदा हुतं सदाशितं[7] पायितमग्निहोत्रं[8] भवति य एवं वेद यश्चैवं विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम् ' ॥ १४ ॥

प्रियमेधा ह वै भरद्वाजा यज्ञविदो मन्यमानास्ते ह स्म न कञ्चन[9] वेदविदमुपयन्ति ' ते सर्वमविदुस्ते सहैवाविदुस्ते ऽग्निहोत्र[10] एव न समवदन्त[11] ' तेषामेक सकृदग्निहोत्रमजुहोद्द्विरेकस्त्रिरेकस्तेषां[12] यः सकृदग्निहोत्रमजुहोत्तमितरावपृच्छतां[13] कस्मै त्वं जुहोषीत्येकधा वा इदं सर्वं प्रजापतिः ' प्रजापतय एवाहं सायं जुहोमीति प्रजापतय प्रातरिति ' तेषां यो द्विरजुहोत्तमितरावपृच्छतां

---

1) चभूतान्यन्वा° A; 2) °र्जुहु A pr. man. und B; जुहः E; 3) सव्य E; सव्यं C; 4) ध्रुवान्न C; 5) ज्योतीषि B; ज्योतींसि A pr. m.; 6) सदेद C; सदेष्टो E; 7) सदानितं E; 8) पाहितम° A; पायितम° E; 9) So corr.; die hss. कश्चना; 10) So corr.; die hss. ऽग्निहोत्रम्; 11) So corr.; die hss. समवदयन्त; 12) द्विरेकस् fehlt in E; 13) सकृदग्नि° B.

काभ्यां[1] त्वं जुहोषीत्यग्नये प्रजापतय[2] इति सायं सूर्याय प्रजापतय इति प्रातस्तेषां यश्चिरजुहोत्तमितरावपृच्छतां केभ्यस्त्वं जुहोषीत्यग्नये प्रजापतयेऽनुमतय इति सायं सूर्याय प्रजापतयेऽग्नये[3] स्विष्टकृत इति प्रातस्तेषां यो द्विरजुहोत्स आर्ध्नोत्स भूयिष्ठोऽभवत्प्रजया चेतरौ[4] श्रिया चेतरावत्याक्रामत्तस्य[5] ह प्रजामितरयोः प्रजे[6] सजातवमुपैतां[6] ' तस्माद्विर्होतव्यं यजुषा चैव मनसा च ' यामेव स ऋद्धिमार्ध्नोत्तामृध्नोति[7] य एवं वेद यश्चैवं[8] विद्वानग्निहोत्रं जुहोतीति ब्राह्मणम् ' ॥ १५ ॥

स्वाहा वै कुतः संभूता ' केन प्रकृता ' किं वास्या गोत्रं[9] ' कत्यक्षरा ' कतिपदा ' कति वर्णा[10] ' किंपूर्वावसाना ' क चित्स्थिता ' किमधिष्ठाना ' ब्रूहि स्वाहाया यद्दैवतं रूपं च ' स्वाहा वै सत्यसंभूता ' ब्रह्मणा[11] प्रकृता ' लामगायनसगोत्रा[12] ' द्वे अक्षरे ' एकं पदं ' त्रयश्च वर्णाः शुक्लः पद्मः सुवर्ण इति ' सर्वच्छन्दसां[13] वेदेषु समासभुतैकोच्छ्वासा वर्णान्ते चत्वारो वेदाः शरीरे ' षडङ्गान्यो-

---

1) काभ्य: C; 2) प्रजापत C; 3) Fehlt in B; 4) चेतरौ ist einmal zu viel; 5) चेतरावत्याक्रा° B; 6) So corr. nach Kaṭhakam; die hss. haben प्रजानु यातत्वमुपेयातां; 7) So corr.; die hss. ऋद्धिमार्ध्नोत्ति ता°; 8) यश्चैव E; 9) गात्रं B; 10) Fehlt in B und E; 11) ब्रह्मण: A, C und E; 12) लामकायन° C; 13) °च्छन्दसि E.

ओषधिवनस्पतयो लोमानि ' चक्षुषी सूर्याचन्द्रमसौ ' सा स्वाहा सा[1] स्वधा सैषा यज्ञेषु वषट्कारभूता प्रयुज्यते[2] ' तस्या अग्निर्दैवतं ' ब्राह्मणो[3] रूपमिति ब्राह्मणम् ' ॥ १६ ॥

अथापि कारवो ह नाम ऋषयो ऽल्पस्वा आसंस्त इममेकगुमग्निष्टोमं ददृशुस्तमाहरंस्तेनायजन्त ' ते स्वर्ययुः ' स य[4] इच्छेत्स्वरियामिति[5] स एतेनैकगुनाग्निष्टोमेन यजेतेति ब्राह्मणम् ' ॥ १७ ॥

अथातः सवनीयस्य पशोर्विभागं व्याख्यास्याम[6] ' उद्धृत्यावदानानि[7] हनू सजिह्वे[8] प्रस्तोतुः ' कण्ठः[9] सकाकुद्रः[10] प्रतिहर्तुः ' श्येनं[11] वक्ष[12] उद्गातुर्दक्षिणं पार्श्वं सांसमध्वर्योः[13] ' सव्यमुपगातृणां ' सव्यो ऽसः[14] प्रतिप्रस्थातुर्दक्षिणा[15] श्रोणिरथ्याक्षी[16] ब्रह्मणो ' ऽवरसक्थं[17] ब्राह्मणाच्छंसिन ' ऊरुः[18] पोतुः ' सव्या श्रोणिर्होतुरवरसक्थं[19] मैत्रावरुणस्योरुरच्छावाकस्य[20] ' दक्षिणा दोर्नेष्टुः '

---

1) Fehlt in C; 2) प्रयुज्यन्ते B; 3) ब्रह्मणो C; 4) य fehlt in C; 5) So corr.; A und C °स्वर्यामीति; B °स्वर्यां यीति; E °स्वर्यामिति; 6) व्याख्यामान E; 7) °वदानि E; 8) जिह्वे E; 9) कण्ठस्य B; 10) काकुद्रस्य B; 11) श्येन B; 12) So corr.; alle hss. पक्ष; 13) नान° B und E; 14) न: B und E; 15) प्रतिप्रज्ञातु° E; 16) ? sic; 17) :वरसक्थं C; °सक्थं A und C; °सक्थं B; 18) उरू: C; 19) Vgl. 17; 20) So corr.; die hss. °स्योरुरच्छावाकस्य.

सव्या सदस्यस्य । सदं[1] चानूकं च गृहपतेर्जाघनी[2] पत्न्या-स्तां[3] सा ब्राह्मणेन प्रतिग्राहयति । वनिष्ठुर्हृदयं वृक्कौ चाङ्गुल्यानि[4] दक्षिणो बाहुराग्नीध्रस्य । सव्य आत्रेयस्य । दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य[5] । सव्यौ पादौ गृहपत्न्याः व्रतप्रदायाः[6] । सहैवैनयोरोष्ठस्तं गृहपतिरेवानुशिनष्टि[7] । मणिकाश्च[8] स्कन्ध्यास्तिस्रश्च[9] कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसा अर्धं चापानस्योन्नेतुरंत[10] ऊर्ध्वं चमसाध्वर्यूणां । क्लोमा[11] शमयितुः । शिरः सुब्रह्मण्यस्य । यः श्वःसुत्या-माह्वयते तस्य चर्म । तथा खलु षट्त्रिंशत्संपद्यन्ते[12] । षट्त्रिंशदवदाना गौः । षट्त्रिंशदक्षरा बृहती[13] । बार्हतो वै स्वर्गो लोको । बृहत्या वै[14] देवाः स्वर्ग लोके यजन्ते[15] । बृहत्या[16] स्वर्गे लोके प्रतितिष्ठन्ति[17] । प्रतितिष्ठन्ति[18] प्रजया[19] पशुभिर्य[20] एवं विभजन्ते[21] । ऽथ यदतो ऽन्य-थाशीलिको[22] वा पापकृतो वा हुतादो वान्यजना[23]

---

1) सदां B; 2) °जोघनी B; 3) पत्न्यास्ता C; 4) Sic; B बाङ्गु°; 5) °पदस्य B; 6) व्रतपदाया: B; 7) So corr.; die hss. haben °रेवानुशास्ति: 8) मणिकाश्च B, C und E; 9) स्कन्धास्ति° B; 10) चापानस्योन्ने° A pr. m.; चापं नेत्रो E; 11) क्लोमा E; 12) °पद्यते C; 13) बृहति: B; 14) Fehlt in E; 15) यजन्ते A; 16) बृहत्यो C; 17) So corr.; die hss. प्रतिष्ठति; 18) So corr.; die hss. प्रतितिष्ठति; 19) प्रजाया E; 20) य fehlt in A, B und C; 21) विभजात C; 22) °शीलको B; 23) न्यजना C; वान्यत्रजना E.

वा विमथ्नीरन्नेवमेवैषां[1] पशुर्विमथितो भवत्यस्वर्ग्यो' देव-
भागो[2] ह वा इमं[3] श्रुतऋषिः पशोर्विभगं विदां चकार'
तमु[4] गिरिजाय बाभ्रव्यायान्यो मनुष्येभ्यः[5] प्रोवाच' ततो-
ऽयमर्वाङ्मनुष्येष्वासीदिति[6] ब्राह्मणम्[7]' ॥ १८ ॥

अथातो दीक्षा' कस्य स्विद्धेतोर्दीक्षित[8] इत्याचक्षते' श्रेष्ठां धियं क्षियतीति[9]' तं वा एतं धीक्षितं सन्तं[10] दीक्षित[11] इत्याचक्षते परोक्षेण' परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः' कस्य स्विद्धेतोर्दीक्षितोऽप्रत्युत्थायिको[12] भवत्यनभिवादुकः प्रत्युत्थेयो[13]ऽभिवाद्यो' ये प्रत्युत्थेया[14] अभिवाद्यास्त एनमाविष्टा[15] भवन्त्यथर्वाङ्गिरसस्तस्य किमाथर्वणमिति' यदात्मन्येव[16] जुह्वति न परस्मिन्नेवं ह्याथर्वणानामदनसवानामात्मन्येव जुह्वति न परस्मिन्नथास्य[17] किमाङ्गिरसमिति' यदात्मनश्च[18] परेषां च नामानि[19] न गृह्णात्येवं ह तस्मिन्नासादात्मनश्चैव[20]

---

1) So corr.; die hss. विमथ्नी°; 2) देवता गो C und E; 3) So corr.; die hss. इमां; 4) So corr.; die hss. तामु; 5) मनुष्येभ्यः E; 6) So corr.; die hss. इयम°; 7) ब्रह्मणम् C; 8) Von दीक्षित bis धीक्षितं fehlt in B; 9) क्षियन्तीति C; क्षयती E; 10) सतं B; 11) दीक्षितं E; 12) So corr.; alle hss. °त्थुको; 13) प्रत्युच्छेयो B; 14) प्रत्युच्छेया B; प्रत्युच्छेयो E; 15) °विष्टा B und C; 16) °त्मनेव E; 17) यस्मिन्न° B; 18) °त्मनश्चौ B; 19) नाम्यति B; 20) आसाद् ? ?.

परेषां[1] च नामानि न गृह्णन्ते[2]' विचक्षणवतीं[3] वाचं भाषन्ते चनसितवतीं' विचक्षयन्ति[4] ब्राह्मणं चनसयन्ति[5] प्राजापत्यं[6]' सैषा व्रतधुगथर्वाङ्गिरसस्तां[7] ह्यन्वायत्ताः[8]' कस्य स्विद्धेतोर्दीक्षितो ऽनाश्यन्नो[9] भवति नास्य नाम गृह्णन्त्यंन्नस्थो[10] नामस्थो[11] भवतीत्याहुस्तस्य ये ऽन्नमदन्ति ते ऽस्य पाप्मानमदन्त्यथास्य[12] ये नाम गृह्णन्ति[13] ते ऽस्य नाम्नः पाप्मानमपाघ्नते' ऽथापि वेदानां गर्भभूतो भवतीत्याहुस्तस्याजातस्याविज्ञातस्याक्रीतसोमस्याभोजनीयं[14] भवतीत्याहुः' स दीक्षाणां प्रातर्जायते सोमं क्रीणन्ति तस्य जातस्य विज्ञातस्य क्रीतसोमस्य[15] भोजनीयं[16] भवतीत्याहुः' कस्य स्विद्धेतोः संसवाः परिजिहीर्षिता[17] भवन्ति[18]' यतरो वीर्यवत्तरो[19] भवति[20] स परस्य यज्ञं[21] परिमुष्णाति[22]' कस्य स्विद्धेतोर्दीवे न ध्यायेत्संस्थिते[23] नाधीयीतेति[24]' संसवस्यैव हेतोरिति' विद्योतमाने स्तनयत्यथो

---

1) परेषा B; 2) गृह्णन्तो A; 3) °वतो E; 4) विचक्षयेति E; 5) न च सयन्ति B; 6) प्राजापतिं E; 7) Die hss. ता; 8) ह्यान्वायता: B; °यन्ता: E; 9) नाशान्नो C; 10) गृह्णात्य° C und E; 11) नामस्थो E; 12) °थास्या A; 13) गृह्णाति E; 14) °सोमस्याभजनीयं E; 15) क्रीतसोम E; 16) भोजनो E; 17) °जीर्षता C; 18) भवति C; 19) विर्यवत्तमो C; 20) भव B; भवती E; 21) यज्ञ E; 22) परिमुष्णाति B; 23) ध्याये संस्थिते C; धाये संस्थिते B; 24) नाधीयैतेति C; नाधीयीतैति B.

वर्षति वायव्यमभिषुण्वन्ति वै देवाः सोमं[1] च भक्षयन्ति' तदभिषुण्वन्ति ब्राह्मणाः शुश्रुवांसो[2] ऽनूचानास्तेषां सर्वरसभक्षाः पितृपितामहा भवन्ति' स दैवे न ध्यायेत्संस्थिते[3] नाधीयीतेति[4] ब्राह्मणम्' ॥ १९ ॥

समावृत्ता[5] आचार्या निषेदुस्तान्ह यज्ञो दीक्षिष्यमाणान्ब्राह्मणरूपं[6] कृत्वोपोदियायेत्यं[7] चेद्वो ऽपसमवत्सुर्द्धत[8] वो ऽहं मध्ये दिक्षा इति.' त ऊचुर्नैव[9] त्वा विद्म न जानीमः[10]' को हीदविज्ञायमानेन[11] सह दीक्षिष्यतीति[12]' यन्विदं दीक्षिष्यध्वे भूयो न दीक्षिष्यध्वे' ऽथ वा उ एकं दीक्षयिष्यथ[13] सं वै तर्हि मोहिष्यथ' मोहिष्यति[14] वो यज्ञः' सर्वे ते दीक्षयिष्यथेत्यथ[15] वा उ एकं[16] दीक्षयिष्यथ ते वा अहीनर्त्विजो गृहपतयो भविष्यथ[17]' ते तूष्णीं[18] ध्यायन्त[19] आसां चक्रिरे' स होवाच' किं नु तूष्णीमाध्वे' भूयो वः पृच्छामः' पृच्छतेति[20]' यन्विदं दीक्षिष्यध्व[21] उपमये[22] एतस्मिन्संवत्सरे मिथुनं

---

1) सोम E; 2) शुश्रु° A und E; शुश्रु° B; 3) ध्याये सं° B und C; 4) न धीयीतेति A pr. m.; नाधीयेतेति C; 5) समावृत्त C; 6) So corr.; die hss. दीक्षिष्यमाणानां ब्रा°; 7) °येत्थं B; 8) समवत्सु: ? ?; 9) ऊचुर्नैव A; 10) जनिमा B; 11) हीदवि° B; 12) °ष्यतीति A und B; 13) दीक्षिष्य B; दीक्षयीष्यथ E; 14) °ष्यतो C; 15) दीक्षिष्यतेत्यथ C; 16) एक B; 17) भविष्य B; 18) तष्णीं B; 19) ध्यायन्त B; 20) पृच्छेति E; 21) °ध्वं E; 22) ? ? B. Ind. उपयेन.

चरिष्यथ नोपैष्यथेति ' धिगिति होचुः ' कथं नु दीक्षिता उपैष्यामो नोपैष्यामहा इति ' ते वै ब्राह्मणानामभिमन्तारो[1] भविष्यथ[2] ' रेतो ह वो य एतस्मिन्संवत्सरे ब्राह्मणास्तदभविष्यंस्ते[3] बोधिमता भविष्यथेत्यथ[4] वा उपेष्यामो नोपैष्यामहा इति ' ते वै दीक्षिता अवकीर्णिनो भविष्यथ ' न ह वै देवयानः[5] पन्था प्रादुर्भविष्यतीति ' तिरो वै[6] देवयानः पन्था भविष्यतीति ' ते वयं भगवन्तमेवोपधावाम यथा स्वस्ति संवत्सरस्योदृचं समश्नवामहा इति ब्राह्मणम् ' ॥ २० ॥

स होवाच द्वादश ह वै वसूनि दीक्षितादुत्क्रामन्ति[7] ' न ह वै दीक्षितोऽग्निहोत्रं जुहुयान्न पौर्णमासेन[8] यज्ञेन यजेत ' नामावास्येनास्मिन्वसीत ' न पितृयज्ञेन यजेत[9] ' न तत्र गच्छेद्यत्र मनसा जिगमिषेन्नेष्ट्या यजेत ' न वाचा यथाकथाचिदभिभाषेत[10] ' न मिथुनं चरेन्नान्नस्य[11] यथाकाममुपयुञ्जीत ' न पशुबन्धेन यज्ञेन यजेत ' न तत्र गच्छेद्यत्र चक्षुषा परापश्येत्कृष्णाजिनं वसीत ' कुरीरं धारयेन्मुष्टी[12] कुर्यादङ्गुष्ठप्रभृतयस्तिस्र उच्छ्रयेन्मृगशृङ्ग

1) °भिमन्तारा A und B; 2) भविष्यत E; 3) °भविष्यन्ति ते E; 4) भविष्यतेत्यथ E; 5) देवायानः C; 6) वो C; 7) दीक्षिता उत्क्रा° E; 8) पूर्ण° C; 9) यजेत A; 10) °त्रिभाषेत C; 11) So corr.; die hss. °चरेन्नान्यस्य; 12) धारयन्मुष्टी E.

गृह्णीयात्तेन कर्षेताथ यस्य दीक्षितस्य वाग्वायता स्यान्मुष्टी वा विसृष्टौ[1] स एतानि जपेत्' ॥ २१ ॥

अग्निहोत्रं च मा पौर्णमासश्च यज्ञः पुरस्तात्प्रत्यञ्चमुभौ कामप्रौ भूत्वाक्षित्या सह्याविशतां[2] ' वसतिश्च मामावास्यश्च यज्ञः पश्चात्प्राञ्चमुभाविति[3] समानं ' मनश्च मा पितृयज्ञश्च यज्ञो दक्षिणत उदञ्चमुभाविति समानं ' वाक्च मेष्टिश्चोत्तरतो दक्षिणाञ्चमुभाविति समानं ' रेतश्च मान्नं चेत ऊर्ध्वमुभाविति समानं ' चक्षुश्च मा पशुबन्धश्च यज्ञो[4] ऽमुतो ऽर्वाञ्चमुभौ कामप्रौ भूत्वाक्षित्या[5] सह्याविशतामिति[6] खलु ह वै दीक्षितो य आत्मनि वसूनि धत्ते न चैवास्य का चनार्तिर्भवति न च यज्ञविष्कन्धमुपयात्यपहन्ति[7] पुनर्मृत्युमंपात्येति[8] पुनराजातिं[9] ' कामचारो ऽस्य सर्वेषु लोकेषु भाति य एवं वेद यश्चैवंविद्वान्दीक्षामुपैतीति ब्राह्मणम्' ॥ २२ ॥

अथ यस्य[10] दीक्षितस्यर्तुमती जाया स्यात्प्रतिस्नावा[11] प्रतिस्नावा[12] सरूपवत्साया[13] गोः[14] पयसि स्थालीपाकं

---

1) वसृष्टौ A pr. m. und E; 2) नाह्यविशता B; 3) In A findet man das ganze yajus; 4) यज्ञा C; 5) °क्षित्य E; 6) ? fehlt etwas; 7) यज्ञविस्कन्ध° B; 8) So alle hss. °मत्येति wäre besser; 9) °जातिं B; °जात्यं C; 10) ऽस्य B; 11) ? ? B स्यात्प्रस्यात्प्रतिस्नावा; 12) ? ?; 13) सारूप° A sec. m. und E; 14) गां: B.

अपयित्वाभिघार्योद्वास्योदृत्याभिहिंकृत्य गर्भवेदनपुंसवनैः संपातवन्तं[1] कृत्वा तं परैव प्राश्नीयाद्धेतो वा अन्नं[2]' वृषा हिंकार' एवं हीश्वरा या[3] दीक्षिताय[4] दीक्षिता[5] जाया पुत्रं लभेतेत्येतेनैव[6] प्रक्रमेण[7] यजेतेति ब्राह्मणम्' ॥ २३ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे तृतीयः प्रपाठकः ॥

ओमयं[4] वै यज्ञो यो ऽयं पवते' तमेत ईप्सन्ति ये संवत्सराय दीक्षन्ते[8]' तेषां गृहपतिः प्रथमो दीक्षते' ऽयं वै लोको गृहपतिरस्मिन्वा इदं सर्वं लोके प्रतिष्ठितं' गृहपता उ एव सर्वे[4] सत्रिणः प्रतिष्ठिताः' प्रतिष्ठाया[9] एवैनं[9] तत्प्रतिष्ठित्यै[9] दीक्षन्ते[10]' ॥ १ ॥

अथ ब्रह्माणं[11] दीक्षयति' चन्द्रमा वै ब्रह्माधिदैवं मनो ऽध्यात्मं' मनसैव तदोषधीः[12] संदधाति' तस्या[13] ओषधीर्विद स एव ब्रह्मौषधीस्तांदनेन लोकेन[4] संदधाति' तस्मादेतावत्तरेणान्यो न दीक्षेत[14]' स यदेतावत्तरेणान्यो

---

1) °तवन्त E; 2) अन्न C; 3) So corr.; die hss. य; 4) Fehlt in E; 5) So corr. die hss. °ता; 6) °त्येत्येनैव E; 7) प्रक्रम्येण E; 8) दीक्षन्तो E; 9) ? ? 10) दीक्ष्यन्ते E; 11) ब्राह्मणं C; 12) तदौषधी: C; 13) तय E; 14) दीक्षत B.

दीक्षेतेमं तं लोकमोषधिभिर्व्यापादयेदुच्छोषुका[1] ह[2] स्युस्तस्मादेतावत्तरेणान्यो न दीक्षेत' ॥ २ ॥

अथोद्गातारं दीक्षयत्यादित्यो[3] वा उद्गाताधिदैवं चक्षुरध्यात्मं 'पर्जन्य[4] आदित्यः[4] 'पर्जन्यादधि वृष्टिर्जायते' वृष्टिरेव[5] तदोषधीः[5] संदधाति[5] 'तस्मादेतावत्तरेणान्यो न दीक्षेत' स यदेतावत्तरेणान्यो दीक्षेतेमं तं लोकं वर्षेण व्यापादयेदवर्षुका[6] ह स्युस्तस्मादेतावत्तरेणान्यो[7] न दीक्षेत' ॥ ३ ॥

अथ होतारं दीक्षयत्यग्निर्वै होताधिदैवं वागध्यात्ममन्नं वृष्टिर्वाचं[8] चैव तदग्निं चान्नेन संदधाति 'तस्मादेतावत्तरेणान्यो न दीक्षेत' स[9] यदेतावत्तरेणान्यो दीक्षेतेमं तं लोकमन्नेन व्यापादयेदशनायुका ह स्युस्तस्मादेतावत्तरेणान्यो न दीक्षेत' ॥ ४ ॥

अथाध्वर्युं[10] प्रतिप्रस्थाता दीक्षयति 'वायुर्वा अध्वर्युरधिदैवं प्राणो ऽध्यात्ममन्नं वृष्टिर्वायुं[11] चैव[12] तत्प्राणं चान्नेन संदधाति 'तस्मादेतवत्तरेणान्यो न दीक्षेत' स

---

1) °व्यांदयेदुच्छ्रा° B; 2) E fügt आ ein; 3) °द्रीत्यो E; 4) Corrupt; 5) Corrupt; man erwartet वृष्टिं तदोषधिभ्यः संदधाति; 6) °वर्षुका B; 7) स्युस्तस्मादेताव° B; 8) °र्वाच E; 9) Von स bis I 4. 5 fehlt in E; 10) °ध्वर्यु E; 11) °र्वायु C und E; 12) चैवं C.

यदेतावन्तरेणान्यो दीक्षेतेमं तं लोकं प्राणेन व्यापादये-
त्प्रमायुकाः[1] ह स्युस्तस्मादेतावन्तरेणान्यो[2] न दीक्षेत'
॥ ५ ॥

अथ ब्रह्मणे ब्राह्मणाच्छंसिनं दीक्षयत्यथोद्गात्रे प्रस्तो-
तारं दीक्षयत्यथ[3] होत्रे मैत्रावरुणं दीक्षयत्यथाध्वर्यवे
प्रतिप्रस्थातारं[4] नेष्टा दीक्षयति' स हैनमन्वेतेषां[5] वै
नवानां क्लृप्तिमन्वितरे[6] कल्पन्ते' नव वै प्राणाः' प्रा-
णैर्यज्ञस्तायते[7]' ऽथ ब्रह्मणे पोतारं दीक्षयत्यथोद्गात्रे[8]
प्रतिहर्तारं दीक्षयत्यथ होत्रे ऽच्छावाकं दीक्षयत्यथाध्वर्यवे
नेष्टारमुन्नेता दीक्षयति' स हैनमन्वथ ब्रह्मण आग्नीध्रं
दीक्षयत्यथोद्गात्रे सुब्रह्मण्यं दीक्षयत्यथ होत्रे ग्रावस्तुतं
दीक्षयत्यथ[9] तमन्यः स्नातको वा ब्रह्मचारी वा दीक्षयति'
न पूतः[10] पावयेदित्याहुः' सैषानुपूर्वं[11] दीक्षा[12]' तथ
एवं दीक्षन्ते दीक्षिष्यमाणा[13] एव[14] ते[14] सत्त्रिणां प्रा-
यश्चित्तं न विन्दन्ते[15]' सत्त्रिणां प्रायश्चित्तमनु तस्यार्धस्य

---

1) व्यापद° A und C; 2) स्युस्तस्मादेताव° B; 3) °त्यगा A pr. m.; °त्यंा C; 4) So corr.; die hss. प्रतिस्थातारं; E प्रतिस्थातं; 5) So corr.; die hss. °न्वितरेषां; 6) So corr. die hss. कृप्तिरन्यतरे; 7) °स्ता-गात B; 8) °थोद्गायत्रे B; 9) °त्यथा C; 10) पुनः A; पुतः C; 11) सेषानुपूर्व्वं B; °पूर्व्यं C; 12) दीक्षते C; 13) दक्षिष्य° A pr. m.; 14) एवमेते C; 15) विंदंते A; विंदंते C.

योगक्षेमः कल्पते यस्मिन्नर्धे दीक्षन्त इति ब्राह्मणम् ।

॥ ६ ॥

श्रद्धाया वै देवा दीक्षणीयां[1] निरमिमतादितेः प्रायणीयां[2] । सोमात्क्रयं[3] । विष्णोरातिथ्यमादित्यात्प्रवर्ग्यं[4] । स्वधाया उपसदो । अग्नीषोमाभ्यामौपवसथ्यमह्नः[5] । प्रातर्यावभ्यो देवेभ्यः प्रातरनुवाकं । वसुभ्यः प्रातःसवनं । रुद्रेभ्यो माध्यंदिनं सवनमादित्येभ्यस्तृतीयसवनं । वरुणादवभृथमदितेरुदयनीयां[6] । मित्रावरुणाभ्यामनूबन्ध्यां[7] । त्वष्टुस्त्वाष्ट्रं । देवीभ्यो देविकाभ्यो[8] देवताहवींषि[9] । कामाद्दशातिरात्रं[10] । स्वर्गाल्लोकादुदवसानीयां । तद्वा एतदग्निष्टोमस्य जन्म । स य एवमेतदग्निष्टोमस्य जन्म वेदाग्निष्टोमेन[11] सात्मा[12] सलोको[13] भूत्वा देवानप्येतीति[14] ब्राह्मणम् ।

॥ ७ ॥

अथ यद्दीक्षणीयया[15] यजन्ते श्रद्धामेव तद्देवीं[16] देवतां यजन्ते । श्रद्धा देवी[17] देवता[18] भवन्ति[19] । श्रद्धाया

---

1) देक्षिणीया E; दीक्षोयां B; 2) प्रायणीयां C; 3) सोमात्क्रम्यं B; 4) °प्रवर्ग्यं B; 5) °थ्यमः E; 6) °नीयं E; 7) °बन्ध्यां B; °बन्ध्यं C; 8) देकाभ्यो B; देवकाकाभ्यो E; 9) Man erwartet देविकाहवींषि; 10) Wahrscheinlich कामाद्दतिरात्रं; 11) देवाग्नि° E; 12) Die hss. न आत्मा; 13) सलोका E; 14) देवानपीतीति E; 15) यस्य दीक्षिणी° B; 16) तद्देवी A und B; तद्देवो E; 17) Fehlt in B; देव E; 18) देवताय B; 19) भवति A, C und E.

देव्याः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ[1] यत्प्रा-
यणीयया[2] यजन्ते ऽदितिमेव तद्देवीं देवतां यजन्ते' ऽदि-
तिर्देवी देवता भवत्यंदित्या[3] देव्याः[4] सायुज्यं[5] सलो-
कतां यन्ति य एतदुपयन्त्यंथ[6] यत्क्रयमुपयन्ति सोममेव
तद्देवं[4] देवतां यजन्ते' सोमो देवो दवता भवन्ति' सोमस्य
देवस्य[4] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यंथ[7]
यदातिथ्यया यजन्ते विष्णुमेव तद्देवं[8] देवतां[8] यजन्ते'
विष्णुर्देवो देवता भवन्ति[9]' विष्णोर्देवस्य सायुज्यं सलो-
कतां यन्ति[10] य[11] एतदुपयन्त्यंथ[11] यत्प्रवर्ग्यमुपयन्त्या-
दित्यमेव तद्देवं[12] दवतां यजन्त' आदित्यो देवो देवता
भवन्त्यादित्यस्य[13] देवस्य सायुज्यं सलोकतां यन्ति य
एतदुपयन्त्यंथ[14] यदुपसदमुपयन्ति[15] स्वधामेव तद्देवीं[16]
देवतां यजन्ते' स्वधा देवी देवता भवन्ति[17]' स्वधाया
देव्याः सायुज्यं[18] सलोकतां यन्ति य एतदुपयन्त्यंथ[19]
यदौपवसथ्यमहरुपयन्त्यग्नीषोमावेव तद्देवौ देवते यजन्ते[20]'

---

1) एतदुभय° B; 2) यत्प्राणीया B; 3) भवत्यदित्य A, C und E; 4) Fehlt in B; 5) सायुज्य B; 6) एत उपय° B; 7) एतदुभ° B; 8) तदेवनं B; 9) भवति A, C und E; 10) गन्ति B; 11) यदात उप° B; 12) देवं fehlt in B; 13) Alle hss. haben भवत्यादि°; 14) एतदुभ° B; 15) य उपस° B; 16) तद्देवी B; 17) भवति B; 18) सायुज्य B; 19) एतमुप° B; 20) यजतो A, C und E; यजन्तो B.

ऽग्नीषोमौ देवौ देवते भवन्ति' ऽग्नीषोमयोर्देवतयोः[1] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यत्प्रातरनुवाकमुपयन्ति प्रातर्यावाण एव तद्देवान्देवता[2] यजन्ते' प्रातर्यावाणो देवा देवता भवन्ति[3]' प्रातर्यावाणां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यत्प्रातःसवनमुपयन्ति वसूनेव तद्देवान्देवता[4] यजन्ते' वसवो देवा देवता भवन्ति' वसूनां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यन्माध्यंदिनं सवनमुपयन्ति रुद्रानेव तद्देवान्देवता यजन्ते' रुद्रा देवा देवता भवन्ति' रुद्राणां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यत्तृतीयसवनमुपयन्त्यादित्यानेव तद्देवान्देवता[5] यजन्त' आदित्या देवा[6] देवता भवन्त्यादित्यानां देवानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदवभृथमुपयन्ति[7] वरुणमेव तद्देवं देवतां[8] यजन्ते' वरुणो देवो देवता भवन्ति[9]' वरुणस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदुदयनीयया यजन्ते ऽदितिमेव तद्देवीं देवतां यजन्ते' ऽदितिर्देवी देवता भवत्यादित्या[10] देव्याः

1) °र्देवयोः B und C; 2) °न्देवतां C und E; 3) भवति C und E; 4) °न्देवतां A pr. m., B und C; 5) °न्देवतां A und B; 6) Fehlt in E; 7) Von उप° bis यदुदयनीयया fehlt in B; 8) देवता E; 9) भवति A, B und C; 10) °दित्य E.

सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदनूबन्ध्यया[1] यजन्ते मित्रावरुणावेव तद्देवौ देवते यजन्ते[2] । मित्रावरुणौ देवौ देवते भवन्ति[3] । मित्रावरुणयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ[4] यत्त्वाष्ट्रेण[5] पशुना यजन्ते त्वष्टारमेव[6] तद्देवं देवतां यजन्ते । त्वष्टा देवो देवता भवन्ति । त्वष्टुर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यद्देविकाहविर्भिश्चरन्ति या एता उपसत्सु[7] भवन्त्यग्निः[8] सोमो विष्णुरिति देव्यो देविका देवता भवन्ति[9] । देवीनां देविकानां[10] देवतानां सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यद्दशातिरात्रमुपयन्ति[11] काममेव तद्देवं देवतां यजन्ते । कामो देवो देवता भवन्ति । कामस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदुदवसानीयया यजन्ते स्वर्गमेव[12] तल्लोकं देवं देवतां यजन्ते । स्वर्गो लोको देवो देवता भवन्ति । स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति । तद्वा एतदग्निष्टोमस्य जन्म । स य एवमेतदग्निष्टोमस्य[13] जन्म वेदाल्वैव[14]

---

1) °बन्ध्याय B und C; 2) So corr.; alle hss. यजतो; 3) So corr.; alle hss. भवतोः; 4) °पयात्यथ B und E; 5) यत्त्वाष्ट्रेणा A; 6) त्वाष्टारमेव B; 7) So corr.; die hss. उपसत्सुः; 8) भवत्यग्निः A pr. man. und C; 9) भवति B; 10) देवीकानां E; 11) ? wschl. यदतिरात्रमुपयन्ति vgl. I 4. 7; 12) स्वर्गमेवं B; 13) एवमेव तदग्नि° E; 14) वेदो हौव E; वेदाधैव C.

तदग्निष्टोमं स्वर्गे[1] लोके[1] प्रतितिष्ठति[2] । प्रतितिष्ठति[3] प्रजया पशुभिर्य एवं वेदाग्निष्टोमेन सात्मा[4] सलोको भूत्वा देवानप्येतीति ब्राह्मणम् । ॥ ८ ॥

अहोरात्राभ्यां वै देवाः प्रायणीयमतिरात्रं[5] निरमिमतार्धमासेभ्यश्चतुर्विंशमहर्ब्रह्मणो[6] ऽभिप्लवं । क्षत्रात्पृष्ठ्यमग्नेरभिजितमद्भ्यः[7] स्वरसाम्नः[8] । सूर्याद्विषुवन्तमुक्ता आवृत्ताः स्वरसामान । इन्द्राद्विश्वजितमुक्तौ पृष्ठ्याभिप्लवौ । मित्रावरुणाभ्यां गवायुषी । विश्वेभ्यो देवेभ्यो दशरात्रं[9] । दिग्भ्यो दाशरात्रिकं[10] पृष्ठ्यं[11] षडहमेभ्यो लोकेभ्यश्छन्दोमं[12] त्र्यहं[13] । संवत्सराद्दशममहः । प्रजापतेर्महाव्रतं । स्वर्गाल्लोकादुदयनीयमतिरात्रं[14] । तद्वा एतत्संवत्सरस्य जन्म । स य एवमेतत्संवत्सरस्य[15] जन्म वेद संवत्सरेण[16] सात्मा[17] सलोको भूत्वा देवानप्येतीति[18] ब्राह्मणम् । ॥ ९ ॥

अथ यत्प्रायणीयमतिरात्रमुपयन्त्यहोरात्रावेव तद्देवौ

---

1) स्वलोक B; स्वर्गा लोके E; 2) So corr.; die hss. प्रतिष्ठति; 3) प्रतिष्ठति B; fehlt in C; 4) न आत्मा A, B und E; 5) °रात्र E; 6) C निरमिमताधमा°, E °आतुर्विंशतिमहद्ब्रह्मणो; 7) क्षत्रात्पृष्ठ्यान° E; 8) So corr.; die hss. स्वरसामान:; 9) दशरात्र E; 10) दशरात्रकं E; 11) पृष्ठ्य: B; 12) °श्छन्दाम A, B und E; 13) त्रहं E; 14) स्वर्गोल्लोकदु° C; 15) एवमेवतात्स° C; 16) °त्सरेणा A; 17) न आत्मा A sec. m.; न अत्मा B; 18) देवनप्येतीति B.

देवते यजन्ते[1]ऽहोरात्रौ देवौ देवते भवन्ति[2]ऽहोरा-
त्रयोर्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ
यच्चतुर्विंशमहरुपयन्त्यर्धमासानेव[3] तद्देवान्देवता[4] यजन्ते-
ऽर्धमासा देवा देवता भवन्त्यर्धमासानां देवानां[5] सायुज्यं
सलोकतां यन्ति य एतदुपयन्त्यथ यदभिप्लवमुपयन्ति ब्र-
ह्माणमेव[6] तद्देवं देवतां यजन्तेऽब्रह्मा देवो देवता
भवन्ति[7]ऽब्रह्मणो देवस्य सायुज्यं सलोकतां यन्ति य
एतदुपयन्त्यथ यत्पृष्ठ्यमुपयन्ति क्षत्रमेव तद्देवं देवतां यजन्ते-
ऽक्षत्रं देवो[8] देवता भवन्ति[9]ऽक्षत्रस्य[10] देवस्य सायुज्यं
सलोकतां यन्ति य एतदुपयन्त्यथ यदभिजितमुपयन्त्यग्नि-
मेव[11] तद्देवं देवतां यजन्तेऽग्निर्देवो देवता भवन्त्यग्नेर्दे-
वस्य[12] सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यत्स्व-
रसाम्न[13] उपयन्त्येव तद्देवीर्देवता[14] यजन्त आपो देव्यो
देवता भवन्त्यपां देवीनां सायुज्यं सलोकतां यन्ति य
एतदुपयन्त्यथ यद्विषुवन्तमुपयन्ति सूर्यमेव तद्देवं देवतां

1) Alle hss. यजन्तो; 2) Alle hss. भवन्तो; 3) °रुत्रुपय° C und E; 4) °न्देवतां A pr. m.; B und C; 5) देवतानां E; 6) ब्राह्म व C; 7) भवन्ति A, C und E; 8) Fehlt in B; 9) So corr.; alle hss. भवन्ति; 10) क्षत्र E; 11) Von यदभि° bis यत्स्वर° fehlt in E; 12) So corr.; alle hss. भवन्त्य°; 13) °रसाम्न E; 14) °र्देवतो A; तद्देविं देवतां C; °र्देवतां E.

यजन्ते ' सूर्यो देवो देवता भवन्ति[1] ' सूर्यस्य देवस्य सा-
युज्यं सलोकतां यन्ति[2] य एतदुपयन्त्युक्ता आवृत्ताः स्व-
रसामानो ' ऽथ यद्विश्वजितमुपयन्तीन्द्रमेव[3] तद्देवं देवतां
यजन्त ' इन्द्रो देवो देवता भवन्तीन्द्रस्य[4] देवस्य सायुज्यं
सलोकतां यन्ति य एतदुपयन्त्युक्तौ पृष्ठ्याभिप्लवावथ य-
द्गवायुषी उपयन्ति मित्रावरुणावेव तद्देवौ देवते यजन्ते[5] '
मित्रावरुणौ देवौ[6] देवते[7] भवन्ति[8] ' मित्रावरुणयो-
र्देवयोः सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यद्द-
शरात्रमुपयन्ति विश्वानेव तद्देवान्देवता[9] यजन्ते ' विश्वे
देवा देवता[10] भवन्ति ' विश्वेषां देवानां सायुज्यं सलोकतां
यन्ति य एतदुपयन्त्यथ यद्दाशरात्रिकं पृष्ठ्यं[11] षडहमुपयन्ति
दिश एव तद्देवीर्देवता[12] यजन्ते ' दिशो देव्यो[13] देवता
भवन्ति ' दिशां देवीनां सायुज्यं सलोकतां यन्ति[14] य
एतदुपयन्त्यथ यच्छन्दोमं त्र्यहमुपयन्तीमानेव तल्लोकान्दे-
वान्देवता[15] यजन्त ' इमे लोका देवा देवता भवन्त्येषां
लोकानां देवानां[16] सायुज्यं सलोकतां यन्ति य एतदु-

1) Alle hss. भवन्ति; 2) यति A; 3) °यतीन्द्रमेव B; 4) भवती° A, B und C; 5) So corr.; die hss. यजतो; 6) Fehlt in A; 7) देते A; 8) Die hss. भवतो; 9) Die hss. °न्देवतां; 10) देवतां B; 11) पृष्ठ्यः B; 12) तद्देव्यों देवतां B; °न्देवतां C; 13) Fehlt in E; 14) यति A; 15) °वतां C und E; 16) Fehlt in B.

पयन्त्यथ[1] यद्दशममहरुपयन्ति[2] संवत्सरमेव तद्देवं देवतां[3] यजन्ते' संवत्सरो देवो देवता भवति[4]' संवत्सरस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यन्महाव्रतमुपयन्ति[5] प्रजापतिमेव[5] तद्देवं[5] देवतां[6] यजन्ते' प्रजापतिर्देवो देवता भवति[7]' प्रजापतेर्देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्त्यथ यदुदयनीयमतिरात्रमुपयन्ति स्वर्गमेव[8] तल्लोकं देवं देवतां यजन्ते' स्वर्गो लोको[9] देवो देवता भवति[10]' स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकतां यन्ति य एतदुपयन्ति' तद्वा एतत्संवत्सरस्य जन्म' स य[11] एवमेतत्संवत्सरस्य जन्म वेदात्येव[12] तत्संवत्सरं[13] स्वर्गे लोके प्रतितिष्ठति[14]' प्रतितिष्ठति[15] प्रजया पशुभिर्य एवं[16] वेद' संवत्सरेण सात्मा[17] सलोको भूत्वा देवानप्येतीति ब्राह्मणम्' ॥ १० ॥

स वा एष संवत्सरो ऽधिदेवं[18] चाध्यात्मं च प्रतिष्ठितः' स य एवमेतत्संवत्सरमधिदेवं[19] चाध्यात्मं च

---

1) एतदुपयत्यथ C; 2) °महरूपयन्ति C und E; 3) देवतं E; 4) Die hss. भवति; 5) Fehlt in E; 6) Fehlt in E; B hat देवानां; 7) Die hss. भवति; 8) स्वर्गमेवं B; 9) लोके E; 10) Die hss. भवति; 11) Fehlt in C; 12) वेदात्यैव E; 13) °त्सर E; 14) So corr.; die hss. प्रतितिष्ठति; 15) तिष्ठति B; 16) एव E; 17) स आत्मा A und B; 18) °देव E; 19) एवमेतं सं° C und E.

प्रतिष्ठितं वेद प्रतितिष्ठति[1] ' प्रतितिष्ठति[2] प्रजया पशुभिर्य एवं वेद[3] ' ॥ ११ ॥

स वा एष संवत्सरो बृहतीमभिसंपन्नो ' द्वावन्तरावह्नां[4] षडहौ[5] द्वौ पृष्ठ्याभिप्लवौ[6] ' गवायुषी दशरात्रस्तथा खलु षट्त्रिंशत्संपद्यन्ते[7] ' षट्त्रिंशदवदाना[8] गौः[8] ' षट्त्रिंशदक्षरा बृहती ' बार्हतो वै स्वर्गो लोको ' बृहत्या वै देवाः स्वर्गे लोके यजन्ते ' बृहत्या स्वर्गे लोके प्रतितिष्ठति[1] ' प्रतितिष्ठति[2] प्रजया पशुभिर्य एवं वेद ' ॥ १२ ॥

स वा एष संवत्सरस्त्रिमहाव्रतश्चतुर्विंशे[9] महाव्रतं विषुवति महाव्रतं महाव्रत एव महाव्रतं ' तं ह स्मैतमेवं विद्वांसः पूर्वे त्रिमहाव्रतमुपयन्ति[10] ' ते तेजस्विन आसंस्सत्यवादिनः संशितव्रता[11] ' य एनमद्य तथोपेयुर्यथामपात्रमुदक आसिक्तं[12] निर्मृत्येदेवं[13] यजमाना निर्मृत्येरन्नुपर्युपयन्ति[13] ' तथा हास्य सत्येन तपसा व्रतेन चाभिजितमवरुद्धं[14] भवति य एवं वेद ' ॥ १३ ॥

---

1) So corr.; die hss. प्रतिष्ठति; 2) Fehlt in B; 3) Die hss. स वा एष संवत्सर in dieser und in sieben folgenden kaṇḍika's; 4) द्वादशान्तरा° C und E; 5) षडहो B; षड्हो C; 6) पृष्ठ्यभि° A pr. m.; 7) °पद्यते E; 8) Fehlt in E; 9) So corr.; alle hss. °विंशेन; 10) °यन्ते E; von °पयन्ति bis पात्रम् fehlt in B; 11) शंसितव्रता A und C; 12) आसिक्ते A; आसिसिक्ते C; 13) So corr.; die hss. निर्मृत्ये°; 14) चाभिजि° C.

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात्कथमनागूर्त्यै[1] भवतीति ' यमेवामुं पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति तेनेति ब्रूयादभिप्लवात्पृष्ठ्यो निर्मितः ' पृष्ठ्यादभिजिदभिजितः स्वरसामानः ' स्वरसामभ्यो विषुवान्विषुवतः[2] स्वरसामानः ' स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्याभिप्लवौ ' पृष्ठ्याभिप्लवाभ्यां गवायुषी ' गवायुर्भ्यां[3] दशरात्रः[4] ' दशरात्रान्महाव्रतं[5] ' महाव्रतादुदयनीयो[6] ऽतिरात्र[7] ' उदयनीयो[7] ऽतिरात्रः स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै ' ॥ १४ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य[8] विषुवन्तं महाव्रतमुपेयात्कथमनागूर्त्यै[9] भवतीति ' यमेवामुं[10] पुरस्ताद्विषुवतोऽतिरात्रमुपयन्ति[11] तेनेति ब्रूयादभिप्लवात्पृष्ठ्यो निर्मितः ' पृष्ठ्यादभिजिदभिजितः[12] स्वरसामानः ' स्वरसामभ्यो विषवान्विषुवतः[13] स्वरसामानः ' स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्याभिप्लवौ[14] ' पृष्ठ्याभिप्लवाभ्यां गवायुषी '

---

1) So corr.; die hss. °नाकूर्त्यै; 2) Von विषुवान्वि° bis पृष्ठ्या° fehlt in B; 3) गवायुभ्यां B; 4) Fehlt in B; 5) So corr.; die hss. दशरात्राय महाव्रतं; E °व्रत; 6) °दयनीयाया A und B; 7) ऽतिरात्रायोदनीयो A und B; 8) °त्यनुपेत्य B; 9) So corr.; die hss. °नाकूर्त्यै; 10) यमेवामु C; 11) ऽतित्रिरात्र° A; त्रिरात्र° E; 12) अभिजित् fehlt in B und E; 13) °षवन्तः E; 14) °भिप्लौ E.

गवायुर्भ्यां दशरात्रो[1] ऽथ ह देवेभ्यो महाव्रतं न[2] तस्थे कथमूर्ध्वै[3] स्तोमैर्विषुवन्तमुपागातावृत्तैर्मामिति[4]ऽते देवा इदसामिवासुरूप[5] तं यज्ञक्रतुं[6] जानीमो[7] य ऊर्ध्वस्तोमो[8] येनैतदहरवाप्नुयामेति तत[9] एतं द्वादशरात्रमूर्ध्वस्तोमं ददृशुस्तमाहरंस्तेनायजन्त तत एभ्यो ऽतिष्ठंस्तिष्ठति[10] हास्मै महाव्रतं प्रतितिष्ठति[11] प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद ॥ १५ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं महाव्रतमुपेयात्कथमनागूर्त्यै[12] भवतीति यमेवामुं पुरस्ताद्विषुवतो ऽतिरात्रमुपयन्ति तेनेति ब्रूयात्तदाहुः कति संवत्सरस्य पराञ्च्यहानि भवन्ति कत्यर्वाञ्चि तद्यानि सकृत्सकृदुपयन्ति तानि पराञ्च्यथ यानि पुनः पुनरुपयन्ति तान्यर्वाञ्चीत्येवैनान्युपासीरन्षडहयोर्ह्यावृत्तिमन्वावर्तन्ते[13] ॥ १६ ॥

अथ यच्चतुर्विंशमहरुपेत्यानुपेत्य विषुवन्तं[14] महाव्रतमुपेयात्कथमनागूर्त्यै[15] भवतीति यमेवामुं पुरस्ता-

1) दशरात्रौ C; 2) नु A; 3) °गुर्ध्वे E; 4) So corr.; die hss. °पागातां वृत्ते°; 5) ?; es kommt nog einige Malen in diesem Texte vor; 6) यज्ञक्रतं C und E; 7) जानीयो E; 8) °स्तोमो A, B und E; 9) तत्र C; 10) ऽतिष्ठंस्तिष्ठति B; 11) So corr.; die hss. प्रतिष्ठति; 12) So corr.; die hss. °नाकूर्त्ये; 13) °त्येवैनां न्युपन्तो° A, B, C; 14) त्रिपुवन्त E; 15) So corr.; die hss. °नाकूर्त्ये.

द्विषुवतो ऽतिरात्रमुपयन्ति[1] तेनेति ब्रूयादभिप्लवं पुरस्ता-द्विषुवतः पूर्वमुपयन्ति' पृष्ठमुपरिष्टात्पिता वा अभिप्लवः पुत्रः पृष्ठस्तस्मात्पूर्वे वयसि पुत्राः पितरमुपजीवन्ति' पृष्ठं[2] पश्चाद्विषुवतः पूर्वमुपयन्त्यभिप्लवमुपरिष्टात्पिता वा अभिप्लवः' पुत्रः पृष्ठस्तस्मादुत्तमे वयसि पुत्रान्पितोपजीवति[3] य एवं वेद' तदप्येतदृचोक्तं शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम्[4]। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरित्युप ह वा एनं पूर्वे वयसि पुत्राः पितरमुपजीवन्त्युपोत्तमे वयसि पुत्रान्पितोपजीवति[5] य एवं वेद' ॥ १७ ॥

अथ हैष महासुपर्णस्तस्य यान्पुरस्ताद्विषुवतः षण्मासानुपयन्ति स दक्षिणः[6] पक्षो[7]' ऽथ यानावृत्तानुपरिष्टात्षडुपयन्ति स उत्तरः पक्ष[8]' आत्मा वै संवत्सरस्य विषुवानङ्गानि[9] पक्षौ' यत्र वा आत्मा तत्पक्षौ' यत्र वै पक्षौ तदात्मा' न वा आत्मा पक्षावतिरिच्यते[10]' नो पक्षावात्मानमतिरिच्येते[11] इत्येवमु हैव तदपरेषां स्वि-

1) त्रिरात्र° A; 2) पृष्ठे C; 3) °जीवन्ति A und B; 4) तनूनाम् E; 5) °जीवन्ति A, B und E; 6) दक्षिणतः E; 7) पक्षो B; 8) Fehlt in B; 9) विषुवानाङ्गानि B und C; 10) So corr.; die hss. °च्येते; 11) So corr.; die hss. °रिच्यन्त.

दितमङ्गां[1] परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्' ॥ १८ ॥

तदाहुर्यद्द्वादश मासाः संवत्सरो ऽथ[2] हैतदहरवाप्नुयामेति[2] ' यद्विषुवतमपरेषां स्विदितमङ्गां परेषामित्यपरेषां चैव परेषां चेति ब्रूयादात्मा वै संवत्सरस्य विषुवानङ्गानि मासा[3] ' यत्र वा आत्मा तदङ्गानि ' यत्राङ्गानि तदात्मा ' न वा[4] आत्माङ्गान्यतिरिच्यते[4] नो ऽङ्गान्यात्मानमतिरिच्यन्त इत्येवमु हैव तदपरेषां स्विदितमङ्गां[5] परेषामित्यपरेषां चैव परेषां चेति ब्रूयात्स वा एष संवत्सरः' ॥ १९ ॥

तदाहुः कथमुभयतोज्योतिषो ऽभिप्लवा अन्यतरतोज्योतिः[6] पृष्ठ्य इत्युभयतोज्योतिषो वा इमे लोका[7] अग्निनेत आदित्येनामुत इत्येष ह वा एतेषां ज्योतिर्य एनं[8] प्रमृदीव[9] तपति ' देवचक्रे ह वा एते पृष्ठ्यप्रतिष्ठिते[10] पाप्मानं तृंहती[11] परिप्लवेते[12] ' तस्य एवं विदुषां दीक्षितानां पापकं कीर्तयदेते[13] एवास्य तद्देवचक्रे शिर-

1) Corrupt!; 2) ऽथैतदह° A und E; 3) So corr.; die hss. मासो; 4) वात्मा° E; °रिच्येते B und E; 5) स्विदितिमङ्गां B; 6) अन्यतरोऽज्योतिः B, C und E; 7) लोको E; 8) ?; 9) ?? B प्रमृदिव; 10) पृष्ठ्यं प्रति° B; पृष्ठः प्रति° C; 11) तृंहती B und C; 12) परिप्लवते A; 13) So corr.; A, B und C °यदेत; E °यदेव.

श्छिन्दतो[1] ' दशरात्रमुद्धिः[2] ' पृष्ठ्याभिप्लवौ चक्रे ' दशरात्रमुद्धिं[3] पृष्ठ्याभिप्लवौ चक्रे तत्त्वं कुर्वीतेति ह स्माह[4] वास्युस्तयो[5] स्तोत्राणि च शस्त्राणि च संचारयेयुः[6] संचारयेत्तस्मादिमे पुरुषे प्राणा[7] नाना सन्त एकोदयाच्छरीरमधिवसति यन्न संचारयेत्प्रमायुको ह यजमानः स्यादेष ह वै प्रमायुको यो ऽन्धो वा बधिरो वा ' नवाग्निष्टोमा मासि संपद्यन्ते ' नव वै प्राणाः[8] ' प्राणैर्यज्ञस्तायत ' एकविंशतिरुक्थ्या ' एक[9] उक्थ्यः[9] षोडश्यन्नं वा उक्थ्यो[10] ' वीर्यं षोडश्येव[11] ' तथा[12] हृवा स्वर्गं लोकमध्यारोहन्ति[13] ' ॥ २० ॥

अथातो ऽह्नामध्यारोहः ' प्रायणीयेनातिरात्रेणोदयनीयमतिरात्रमध्यारोहन्ति[14] चतुर्विंशेन महाव्रतमभिप्लवेन परमभिप्लवं ' पृष्ठ्येन परं पृष्ठ्यमभिजिताभिजितं[15] स्वरसामभिः परान्त्स्वरसामानो ' ऽथैतदहरवाप्नुयामेति[16] यद्वैषुवतमपरेषां[17] स्विदितमह्नां[18] परेषामित्यपरेषां चैव

1) शिरश्छन्दतो B und E; 2) °मुद्धिं C; 3) °मुद्धि E; 4) Fehlt in E; 5) वास्युस्तायो B; वास्यस्तयो C; 6) संचारयेयुः A; 7) प्राणान् B; 8) Fehlt in B; 9) एकोक्थ्यः A und B; एकोक्थ्याः C; 10) उक्थ्यं B; 11) षोडश्यैव A; षोडशैव B; 12) So corr.; die hss. तया; 13) A, B und C fügen noch zu: यदध्यारोहन्ति; 14) प्रानीयेना° B; 15) पृष्ठ्यानभि° C; 16) ऽथ ऐतद° B, C und E; 17) यद्वैषुवतपरेषां C; 18) स्विदितिमह्नां B.

परेषां चेति ब्रूयात्स वा एष संवत्सरः ' ॥ २१ ॥
अथातो ऽह्नां निवाहः[1] ' प्रायणीयो ऽतिरात्रश्चतुर्विं-
शायाह्ने निवहति ' चतुर्विंशमहरभिप्लवायाभिप्लवः पृ-
ष्ठ्याय ' पृष्ठ्यो ऽभिजिते ' ऽभिजित्स्वरसामभ्यः ' स्वरसामानो
विषुवते ' विषुवान्स्वरसामभ्यः ' स्वरसामानो विश्वजिते '
विश्वजित्पृष्ठ्याभिप्लवाभ्यां ' पृष्ठ्याभिप्लवौ[2] गवायुर्भ्यां ' गवा-
युषी दशरात्राय ' दशरात्रो महाव्रताय ' महाव्रतमुदनीया-
यातिरात्रायोदयनीयो ऽतिरात्रः स्वर्गाय लोकायान्नाद्याय
प्रतिष्ठित्यै ' ॥ २२ ॥

आदित्याश्च ह वा अङ्गिरसश्च[3] स्वर्गे लोके ऽस्पर्धन्त
वयं पूर्वे स्वरेष्यामो[4] वयं पूर्व इति ' त आदित्या लघुभिः
सामभिश्चतुर्भि स्तोमैर्द्वाभ्यां पृष्ठ्याभ्यां स्वर्गं लोकमभ्यप्ल-
वन्त ' यदभ्यप्लवन्त तस्मादभिप्लवो ' ऽन्वञ्च एवाङ्गिरसो
गुरुभिः सामभिः[5] सर्वै स्तोमैः सर्वैः पृष्ठ्यैः स्वर्गं[6] लो-
कमभ्यस्पृशन्त ' यदभ्यस्पृशन्त तस्मात्स्पृश्यस्तं[7] वा एतं
स्पृश्यं[8] सन्तं[9] पृष्ठ्य[10] इत्याचक्षते[11] परोक्षेण ' परो-

1) नीवाहः A, C und E; 2) पृष्ठ्यभि° A; 3) आङ्गिरसश्च B und E; 4) स्वरेष्यामो E; 5) Fehlt in B; समानि: E; 6) स्वर्गं B; 7) So corr. तस्मात्पृश्यस्तं A und C; तस्मात्पृशास्तं E; तस्मात्पृश्यतं B; 8) स्पृशं B; 9) सन्त: C; 10) स्पृष्ठ्य A; पृष्ठ्या E und B; 11) Von इत्याचक्षते bis निर्मित: fehlt in B.

क्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषो ऽभिप्लवात्पृष्ठ्यो निर्मितः पृष्ठ्यादभिजिदभिजितः[1] स्वरसामानः[2] स्वरसामभ्यो विषुवान्विषुवतः स्वरसामानः स्वरसामभ्यो विश्वजिद्विश्वजितः पृष्ठ्याभिप्लवौ पृष्ठ्याभिप्लवाभ्यां गवायुषी गवायुर्भ्यां दशरात्रस्तानि ह वा एतानि यज्ञारण्यानि यज्ञकृन्तत्राणि[3] तेषां शतं शतं रथानान्यन्तरं[4] तद्यथारण्यान्याहृता[5] अशनापिपासे[6] ते पाप्मानं तृंहती[7] परिप्लवेते एवं[8] हैवैते प्रप्लवन्ते ये ऽविद्वांस[9] उपयन्त्यथ[10] ये विद्वांस[11] उपयन्ति तद्यथा प्रवाहात्प्रवाहं स्थलात्स्थलं समात्समं सुखात्सुखमभयादभयमुपसंक्रामन्तीत्येवं[12] हैवैते संवत्सरस्योदृचं समश्नुवामहा इति ब्राह्मणम् ॥ २३ ॥

प्रदिर्ह वै कौशाम्बेयः कौसुरुबिन्दुरुद्दालक[13] आरुणौ[14] ब्रह्मचर्यमुवास[15] तमाचार्यः पप्रच्छ[16] कुमार कति

---

1) अभिजित् fehlt in E; 2) Fehlt in E; 3) ? ? A, B und C यज्ञक्रतन्त्राणि; 4) Sic! B रथानां न्यन्तरं; E रथान्यंतरं; Ś. B. रथाह्नान्यन्तरेण; 5) तद्यथारण्यां न्या° A; तद्यथाराण्या° E; 6) अशनायपिपासे A pr. m.; अशनापिसे E; 7) So corr.; die hss. दृंहती; 8) एव E; 9) विद्वास B; विद्वांसम् A und C; 10) उपयत्यथ E; 11) विद्वांसम् A und C; 12) °क्रामन्त्येवं C; 13) कौसुरबिंदु° E; 14) आरुणो A, C und E; 15) So corr. nach Ś. B. XII 2. 2. 13; die hss. °मुवाच; 16) प्रपच्छ B.

ते पिता संवत्सरस्याह्वान्यमन्यतेति[1] ' कति[2] त्वेवेति[2] ' दशेति होवाच ' दश वा इति होवाच ' दशाक्षरा विराड्वैराजो यज्ञः ' कति त्वेवेति ' नवेति होवाच ' नव वा इति होवाच ' नव वै प्राणाः ' प्राणैर्यज्ञस्तायते[3] ' कति त्वेवेत्यष्टेति[4] होवाचाष्टौ वा इति होवाचाष्टाक्षरा गायत्री ' गायत्रो यज्ञः ' कति त्वेवेति सप्तेति होवाच ' सप्त वा इति होवाच ' सप्त छन्दांसि ' छन्दोभिर्यज्ञस्तायते ' कति त्वेवेति ' षडिति होवाच ' षड्वा इति होवाच ' षड्वा ऋतव ' ऋतूनामाप्त्यै ' कति त्वेवेति[5] ' पञ्चेति होवाच ' पञ्च वा इति होवाच ' पञ्चपदा पङ्क्तिः ' पाङ्क्तो यज्ञः ' कति त्वेवेति ' चत्वारीति[6] होवाच ' चत्वारि वा इति होवाच ' चत्वारो वै वेदा[7] ' वेदैर्यज्ञस्तायते ' कति त्वेवेति[8] ' त्रीणीति होवाच ' त्रीणि[9] वा[9] इति[9] होवाच ' त्रिषवणो वै यज्ञः ' सवनैर्यज्ञस्तायते ' कति त्वेवेति ' द्वे इति होवाच ' द्वे[10] वा इति होवाच ' द्विपाद्वै पुरुषो ' द्विप्रतिष्ठः[11] पुरुषः ' पुरुषो[12] वै यज्ञः ' कति त्वेवेत्येकमिति

1) °न्यचेति A, B und C; 2) So alle hss.; man erwartet es hier nicht. Im Ś. Br. fehlt es; 3) प्राणैर्यज्ञै° E; 4) त्वेवेतिष्टेति E; 5) त्वेति B; 6) चत्वारिति B; 7) Fehlt in B; 8) B fügt हो ein; 9) त्रीनिति B; 10) द्वि C und E; 11) द्विप्रतिष्ठितः E; 12) पुरुषो B.

ह्नोवाचैकं[1] वा इति ह्नोवाचाह्नरह्नरित्येव सर्वं संवत्सरं । ॥ २४ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे चतुर्थः प्रपाठकः ॥

ओमभिप्लवः षडहः । षडहानि[2] भवन्ति ज्योतिर्गौरायुर्गौरायुर्ज्योतिरभिप्लवः[3] पञ्चाहः[4] । पञ्च ह्येवाहानि भवन्ति । यद्येव[5] प्रथममहस्तदुत्तममहरभिप्लवश्चतुरहश्चत्वारो[6] हि स्तोमा भवन्ति त्रिवृत्पञ्चदशः[7] सप्तदश एकविंश[8] एवाभिप्लवस्त्र्यहस्त्र्यावृत्तिर्ज्योतिर्गौरायुरभिप्लवो[9] द्व्यहो । द्वे ह्येव सामनी[10] भवतो बृहद्रथंतरे[11] एवाभिप्लव[12] एकाह । एकाहस्य हि[13] स्तोमैस्तायते । चतुर्णामुक्थ्यानां[14] द्वादश स्तोत्राण्यतिरिच्यन्ते । स सप्तमो ऽग्निष्टोमस्तथा[15] खलु सप्ताग्निष्टोमा मासि संपद्यन्त इति ब्राह्मणम् । ॥ १ ॥

अथातो गाधप्रतिष्ठा[16] । समुद्रं वा एते प्रतरन्ति ये

---

1) ह्नोवाचैकैचैकं E; 2) षडूहानि C; षडहः षडूहानि E; 3) ज्योतिर्गौरायुर्गौ° E; 4) Von पञ्चाहः bis चतुरहश्च° fehlt in E; 5) So corr.; die hss. यद्येव; 6) °तुरहत्याश्चत्वारो E; 7) °दशा A pr. m.; 8) °विंशा A, B und C; 9) °हस्त्र्यहावृत्ति° B; 10) समनी B; सामानी C und E; 11) °थंतर A pr. m.; C und E; 12) °भिप्लवं C; 13) Fehlt in den hss.; 14) °मुकथाना E; 15) ऽग्निष्टोमास्तथा A; 16) गाधप्रतिष्ठ C.

संवत्सराय दीक्षन्ते ' तेषां तीर्थमेव प्रायणीयो ऽतिरात्र-स्तीर्थेन हि प्रतरन्ति ' तद्यथा समुद्रं तीर्थेन प्रतरेयुस्तादृक्तद्गाधं प्रतिष्ठा चतुर्विंशमहर्यथोपकक्षदघ्नं वा[1] कण्ठदघ्नं[2] वा यतो[3] विश्रम्य[4] प्रस्नायियुस्तादृक्तत्प्रस्नेयो ऽभिप्लवः ' प्रस्नेयः पृष्ठ्यो ' गाधं प्रतिष्ठाभिजिद्यथोपकक्षदघ्नं वा कण्ठदघ्नं[5] वा यतो विश्रम्य प्रस्नायियुस्तादृक्तन्नीविदघ्न एव प्रथमः स्वरसामा ' जानुदघ्नो द्वितीयः ' कुल्फदघ्नस्तृतीयो[6] ' द्वीपः[7] प्रतिष्ठा विषुवान्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो[8] विश्रम्य[9] प्रस्नायियुस्तादृक्तत्कुल्फदघ्न[10] एव प्रथमो ऽर्वाक्स्वरसामा[11] ' जानुदघ्नो द्वितीयो ' नीविदघ्नस्तृतीयो ' गाधं प्रतिष्ठा[12] विश्वजिद्यथोपकक्षदघ्नं वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायियुस्तादृक्तत्प्रस्नेयः पृष्ठ्यः प्रस्नेयो ऽभिप्लवः[13] प्रस्नेये[14] गवायुषी प्रस्नेयो दशरात्रो ' गाधं प्रतिष्ठा महाव्रतं[15] यथोपकक्षदघ्नं[16] वा कण्ठदघ्नं वा यतो विश्रम्य प्रस्नायियुस्तादृक्तत्तेषां[17] तीर्थमेवोदय-

1) वा न B; 2) °दघ्नं E; 3) यातो E; 4) विश्राम्य E; 5) कण्ठं दघ्नं B; 6) कुल्युद° A und E; कुल्पद° C; 7) So corr. nach Ś. Br.; die hss. द्वीप:; 8) युतो C; 9) द्विश्रम्य C; 10) °त्कुल्यु° A, B und E; °त्कुल्प° C; 11) Von ऽर्वाक्स्व° bis यथोपक° fehlt in B; 12) प्रतिष्ठां C; 13) ऽभि: पृष्ठ: A pr. m.; 14) So corr.; die hss. प्रस्नेयो; 15) महां व्रतं E; 16) °क्षदघ्नं E; 17) °तत्तेषां B.

नीयो ऽतिरात्रस्तीर्थेन ह्युयन्ति[1] । तद्यथा समुद्रं तीर्थे-
नोदियुस्तादृक्तदथ ह स्माह श्वेतकेतुरारुणेयः संवत्सराय[2]
न्वहं दिक्षा इति । तस्य ह पिता मुखमुदीक्ष्योवाच[3]
वेत्थ[4] नु[4] त्वमायुष्मन्त्संवत्सरस्य[4] गाधप्रतिष्ठे[5] इति[5] ।
वेदेत्यैतद्ध स्मैतद्विद्वानाहेति ब्राह्मणम् । ॥ २ ॥

पुरुषो वाव संवत्सरस्तस्य पादावेव प्रायणीयो ऽतिरात्रः । पादाभ्यां हि[6] प्रयन्ति । तयोर्यच्छुक्लं तदह्नो रूपं । यत्कृष्णं तद्रात्रेर्नखानि नक्षत्राणां रूपं । लोमान्योषधिवनस्पतीनामूरू[7] चतुर्विंशमहरूरो[8] ऽभिप्लवः[9] । पृष्ठं[10] पृष्ठ्यः । शिर[11] एव त्रिवृत्त्रिवृतं ह्येव शिरो भवति[12] त्वगस्थि मज्जा मस्तिष्कं । ग्रीवाः पञ्चदशश्चतुर्दश ह्येवैतस्यां[13] कृकराणि[14] भवन्ति । वीर्यं पञ्चदशं[15] । तस्मादाभिरण्वीभिः[16] सतीभिर्गुरुं[17] भारं[18] हरति । तस्माद्ग्रीवाः

---

1) स्नायन्ति B; स्नुयन्तिः E; 2) So corr.; °संवत्सरस्या A und C; सवत्सरस्यां B und E; 3) °क्षोवाच C; 4) वेत्तनुत्तमनायुष्मान्त्सं° B; alle hss. °ष्मान्त्संव°; 5) °तिष्ठेति E; 6) Fehlt in B; 7) लोमान्योषधी° A pr. m.; °न्योषधिं वनस्प° C; °न्योषधेवनस्प° E; 8) °विंशाहरो E; °शमहरोह B; °शमहश्रो C; 9) भिप्लवं B; 10) पृष्ठं fehlt in alle hss.; 11) शिवर E; 12) भवत् A, B und E; 13) ग्रीवा wird im Sing. und im Plur. gebraucht; 14) कृकराणि C; कंकराणी E; 15) पञ्चदश E; 16) Die hss. तस्मादियमाभिरण्वीभिः; 17) °भिर्गुरं B; 18) भारं B.

पञ्चदश ' उरः सप्तदशो ' ऽष्टावन्ये[1] जत्रवो[2] ऽष्टावन्य ' उरः सप्तदशं[3] ' तस्मादुरः[3] सप्तदश ' उदरमेकविंशो[4] ' विंशतिर्ह्येवैतस्यान्तर उदरे कुन्तापानि[5] भवन्त्युदरमेकविंशं[6] ' तस्मादुदरमेकविंशः ' पार्श्वे त्रिणवस्त्रयोदशान्याः[7] पर्शवस्त्रयोदशान्याः[8] पार्श्वे त्रिणवे[3] ' तस्मात्पार्श्वे[3] त्रिणवो ' ऽनूकं त्रयस्त्रिंशो[9] ' द्वात्रिंशतिर्ह्येवैतस्य पृष्टीकुण्डीलानि[10] भवन्त्यनूकं त्रयस्त्रिंशं ' तस्मादनूकं त्रयस्त्रिंशस्तंस्यायमेव[11] दक्षिणो बाहुरभिजित्तंस्येमे दक्षिणे त्रयः प्राणाः स्वरसामान ' आत्मा विषुवांस्तंस्येमे सव्ये त्रयः प्राणा अर्वाक्स्वरसामानस्तस्यायं[12] सव्यो बाहुर्विश्वजिद्दुक्तौ पृष्ठ्याभिप्लवौ ' यावेवाञ्चौ प्राणौ ते[13] गवायुषी ' अङ्गानि दशरात्रो[14] ' मुखं महाव्रतं ' तस्य हस्तावेवोदयनीयो ऽतिरात्रो ' हस्ताभ्यां ह्युच्यन्ति ' ॥ ३ ॥

पुरुषो वाव संवत्सरस्तंस्य प्राण एव प्रायणीयो ऽतिरात्रः ' प्राणेन हि प्रयन्ति ' वागारम्भणीयमहर्व्यदार-

---

1) ऽष्टाचन्ये B; 2) यत्रवो A, B und C; 3) Fehlt in B; 4) उरमेकविंशो E; 5) कुन्तापानि B; कुतापानि C; 6) भवन्तु° B; Im E fehlt von शं तस्मा° bis °यस्त्रिंशो; 7) °दशांन्याः C; 8) पर्शवन्याः A, B und E; 9) Von त्रयस्त्रिंशो bis त्रयस्त्रिंशस्त° fehlt in B; 10) ? ?; 11) °शंस्तस्यायमेव C; 12) अर्वाकस्व° B; 13) So corr.; die hss. तौ; 14) दशरात्रा E.

भते[1] वागारभते ' वाचैव तदारभते ' तस्यायमेव दक्षिणः पाणिरश्मिवस्तस्येदं प्रातःसवनमिदं माध्यंदिनं[2] सवनमिदं तृतीयसवनं ' गायत्र्या आयतने ' तस्मादियमस्यै[3] ह्रसिष्ठा ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं ' त्रिष्टुभ[4] आयतने ' तस्मादियमस्यै[5] वरिष्ठा[6] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं[7] ' जगत्या आयतने[8] ' तस्मादियमनयोर्वरिष्ठा ' तस्येदं प्रातःसवनमिदं[9] माध्यंदिनं सवनमिदं तृतीयसवनं ' पङ्क्त्या आयतने[10] ' पृथुरिव वै पङ्क्तिस्तस्मादियमासां[11] प्रथिष्ठा[12] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं ' विराज[13] आयतने ' ऽन्नं वै श्रीर्विराडन्नाद्यमन्नाद्यस्य[14] श्रियो[15] ऽवरुद्ध्यै ' तस्मादियमासां[16] वरिष्ठा[17] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनमतिछन्दस[18] आयतने[19] ' ऽतिछन्दो[20] वै छन्दसामायतनं '

---

1) °मह्यचदा° C; 2) मध्यंदिनं E; 3) Man erwartet °मासां; 4) त्रिष्टुभा A pr. m.; und B; 5) Vgl. 3; 6) वशिष्ठा B und C; 7) तृतीयं सवनं E; 8) आयतनो A pr. m.; 9) प्रतिःसव° E; 10) आयतनो E; 11) पङ्क्तिं तस्मा° E; °वमासां B; 12) Alle hss. प्रतिष्ठा; 13) विराजा A pr. m. und B; 14) So corr.; die hss. श्रोर्विराडन्नाद्यस्य; 15) श्रीयो B und E; 16) तस्मादय° C; 17) वसिष्ठः B; 18) °तिछन्दसा A pr. m. und B; 19) आयताने C; 20) ऽतिछन्दों B.

तस्मादिदं[1] प्रयिष्ठं[2] फलकं[3] ' तस्येदं प्रातःसवनमिदं माध्यंदिनं सवनमिदं तृतीयसवनं ' स[4] इतः[4] स[4] इतो[4] ऽभिप्लवः स[5] इत[5] आत्मा पृष्ठ्यः ' प्लवतीवाभिप्लवस्तिष्ठतीव पृष्ठ्यः ' प्लवत इव ह्येवमङ्गैस्तिष्ठतीवात्मना[6] ' तस्यायमेव[7] दक्षिणः कर्णो ऽभिजित्तस्य यद्दक्षिणमक्ष्णः[8] शुक्लं[9] स प्रथमः स्वरसामा ' यत्कृष्णं[10] स द्वितीयो ' यन्मण्डलं[11] स[12] तृतीयो[12] ' नासिके विषुवान्मंण्डलमेव प्रथमो ऽर्वाक्स्वरसामा[13] ' यत्कृष्णं स द्वितीयो[14] ' यच्छुक्लं[15] स तृतीयस्तस्यायं[16] सव्यः कर्णो विश्वजिद्व्रतौ पृष्ठ्याभिप्लवौ ' यावावाञ्चौ प्राणौ ते गवायुषी ' अङ्गानि दशरात्रो[17] ' मुखं महाव्रतं ' तस्योदान एवोदयनीयो[18] ऽतिरात्र ' उदानेन ह्युद्यन्ति[19] ' ॥ ४ ॥

पुरुषो वाव संवत्सरः[20] ' पुरुष इत्येकं ' संवत्सर[21] इत्येकमंत्र[22] तत्समं ' द्वे अहोरात्रे संवत्सरस्य ' द्वाविमौ

1) तस्मादिनं C; 2) Die hss. प्रतिष्ठं; 3) फलनं B; 4) So corr.; die hss. सेत: सेतो; 5) Die hss. सेत; 6) °वात्माना C; 7) तस्माय° E; 8) °पामक्त: B; 9) सुक्र: B; 10) Die hss. यकृष्णं; 11) यन्मडलं A; यन्मडं B; 12) संस्तृतीया B; 13) ऽर्वाकस्त्वर° B, C und E; 14) द्वीतीयं B; 15) यच्छुक्र C; 16) तृतीयंस्त° E; 17) दशरात्रौ B, C und E; 18) °यनाद्यो E; 19) °ह्युधयन्ति C; 20) °त्सरा B; 21) So corr.; die hss. संवत्सरं; 22) So corr.; die hss. इत्येक इत्यत्र.

पुरुषे प्राणावित्यंत्र[1] तत्समं' त्रयो[2] वा ऋतवः संवत्सरस्य' त्रय इमे पुरुषे प्राणा इत्यंत्र तत्समं' षड्वा[3] ऋतवः संवत्सरस्य' षडिमे पुरुषे प्राणा इत्यंत्र तत्समं' सप्त वा ऋतवः संवत्सरस्य' सप्तेमे[4] पुरुषे प्राणा इत्यंत्र तत्समं' द्वादश मासाः संवत्सरस्य' द्वादशेमे पुरुषे प्राणा इत्यंत्र तत्समं' त्रयोदश मासाः संवत्सरस्य' त्रयोदशेमे पुरुषे प्राणा इत्यंत्र तत्समं' चतुर्विंशतिरर्धमासाः संवत्सरस्य' चतुर्विंशो ऽयं[5] पुरुषो' विंशत्यङ्गुलिश्चतुरङ्ग इत्यंत्र तत्समं' षड्विंशतिरर्धमासाः संवत्सरस्य' षड्विंशो[6] ऽयं पुरुषः' प्रतिष्ठे षड्विंशे[7] इत्यंत्र तत्समं' त्रीणि च ह वै शतानि षष्टिश्च[8] संवत्सरस्याहोरात्राणीत्येतावन्त एव पुरुषस्य प्राणा इत्यंत्र तत्समं' सप्त च ह[9] वै शतानि विंशतिश्च संवत्सरस्याहानि च रात्रयश्चेत्येतावन्त एव पुरुषस्यास्थीनि[10] च मज्जानश्चेत्यंत्र तत्समं' चतुर्दश च ह वै शतानि चत्वारिंशच्च संवत्सरस्यार्धाहाश्चार्धरात्रयश्चेत्येतावन्त[11] एव पुरुषस्य स्थूरा[12] मांसानीत्यंत्र[13] तत्सममंष्टाविंशतिश्च ह वै शतान्यशीतिश्च संवत्सरस्य

---

1) So corr.; die hss. प्राणा उत्यत्र; 2) Von त्रयो bis स्वेदायनानि fehlt in B; 3) षड्वा E; 4) सप्तमे C; 5) ने E; 6) षड्विंशो E; 7) षड्विंशे E; 8) षष्ठ्य E; 9) हे E; 10) पुरुषस्यीनि E; 11) संवत्सरस्यार्धाश्चार्ध° E; 12) स्थुरा E; 13) मांसानी° E.

पादाह्नाश्च पादरात्रयश्चेत्येतावन्त[1] एव पुरुषस्य स्नावा[2] वन्ध्या[3] इत्यत्र तत्समं ' दश च ह वै सहस्राण्यष्टौ च शतानि संवत्सरस्य मुहूर्ता[4] इत्येतावन्त एव पुरुषस्य पेशशमरा[5] इत्यत्र तत्समं ' यावन्तो मुहूर्ताः[4] पञ्चदश कृत्वस्तावन्तः प्राणा ' यावन्तः प्राणाः पञ्चदश कृत्वस्तावन्तो ऽपाना ' यावन्तो ऽपानाः पञ्चदश कृत्वस्तावन्तो[6] व्याना ' यावन्तो व्यानाः पञ्चदश कृत्वस्तावन्तः समाना ' यावन्तः समानाः पञ्चदश कृत्वस्तावन्त उदाना ' यावन्त उदानाः पञ्चदश कृत्वस्तावन्त्येतादीनि[7] ' यावन्त्येतादीनि तावन्त्येतर्हीणि ' यावन्त्येतर्हीणि[8] तावन्ति[9] स्वेदायनानि[10] ' यावन्ति स्वेदायनानि तावन्ति क्षिप्रायणानि ' यावन्ति क्षिप्रायणानि तावन्तो रोमकूपा ' यावन्तो रोमकूपाः पञ्चदश कृत्वस्तावन्तो[11] वर्षतो धारास्तदेतत्क्रोशशतिकं[12] परिमाणं ' तदप्येतदृचोक्तं अमादन्यत्र परिवर्तमानश्चरन्नासीनो[13] यदि वा स्वपन्नपि । अहोरात्राभ्यां पुरुषः क्षणेन कति कृत्वः[14] प्राणिति[15] चापानिति[16] च '

1) पादरात्र° E; 2) स्नात्रा C; स्नात्र E; 3) त्रिध्या E; 4) मूहूर्ता A; महूर्ता C; 5) शश्नमरा E; 6) °वतो E; 7) °तादिनि A pr. m.; 8) यावन्तेतर्हीणि A, B und C; 9) B fügt ein सप्तत्रा शतत्रः णितावन्ति; 10) स्वदाय° B; 11) °वन्यो A; °वन्त्यो C und E; 12) °देतक्रोशशन्तिं कं C; 13) °न्नासीनो E; 14) कृत्वा C; कृत्वः E; 15) प्राणति B und E; 16) चापानति B; चापानितिति E.

शतं शतानि परिवत्सराणामष्टौ च शतानि संवत्सरस्य[1]
मुहूर्तान्यान्वदत्यहोरात्राभ्यां[2] पुरुषः समेन कति[3] कृत्वः
प्राणिति[4] चापानिति[5] चेति ब्राह्मणम्' ॥ ५ ॥

संवत्सरस्य समता वेदितव्येति[6] ह स्माह वात्स्युरे-
कमेव पुरस्ताद्विषुवतो ऽतिरात्रमुपयन्त्येकमुपरिष्टात्त्रिंप-
ञ्चाशतमेव पुरस्ताद्विषुवतो ऽग्निष्टोमानुपयन्ति त्रिपञ्चा-
शतमुपरिष्टाद्विंशतिशतमेव[7] पुरस्ताद्विषुवत उक्थ्यानु-
पयन्ति विंशतिशतमुपरिष्टात्षडेव पुरस्ताद्विषुवतः षो-
डशिन[8] उपयन्ति षडुपरिष्टात्त्रिंशदेव पुरस्ताद्विषुवतः
षडहानुपयन्ति त्रिंशदुपरिष्टात्सैषा संवत्सरस्य समता' स
य एवमेतां संवत्सरस्य समतां वेद संवत्सरेण सात्मा[9]
सलोको भूत्वा देवानप्येतीति ब्राह्मणम्' ॥ ६ ॥

अथातो यज्ञक्रमा' अग्न्याधेयमग्न्याधेयात्पूर्णाहुतिः[10]'
पूर्णाहुतेरग्निहोत्रमग्निहोत्राद्दर्शपूर्णमासौ[11]' दर्शपूर्णमासा-
भ्यामाग्रयणमाग्रयणाच्चातुर्मास्यानि[12]' चातुर्मास्येभ्यः[13] प-

---

1) Fehlt in C und E; 2) मूहूर्ता° A und B; महूर्तं न्यान्व° C; 3) तति C; 4) प्राणाति B; प्राणानि E; 5) चापानाति A und B; 6) वेदिन्यव्येति C; वेतिदितवेति E; 7) °परिष्टात्षडेव B; °परिष्टाद्विशतमेव E; 8) षोडशिनं B; 9) सा आत्मा A; स आत्मा B; 10) °धेया: पूर्णाहुतिः B; °हूतिः C; 11) पुर्णा° C; दर्शपूर्णमासौ fehlt in C; 12) दर्शपौर्ण° B; आग्रयणान् fehlt in B; °तुर्मासानि E; 13) चातुर्मासेभ्यः B.

शुबन्धः ' पशुबन्धादग्निष्टोमो[1] ' ऽग्निष्टोमाद्राजसूयो ' राजसूयाद्वाजपेयो ' वाजपेयादश्वमेधो ' ऽश्वमेधात्पुरुषमेधः ' पुरुषमेधात्सर्वमेधः ' सर्वमेधाद्दक्षिणावन्तो[2] ' दक्षिणावद्भ्यो ऽदक्षिणा ' अदक्षिणाः सहस्रदक्षिणे प्रत्यतिष्ठंस्ते[3] वा एते यज्ञक्रमाः ' स य एवमेतान्यज्ञक्रमान्वेद यज्ञेन सात्मा[4] सलोको भूत्वा देवानप्येतीति[5] ब्राह्मणम् ' ॥ ७ ॥

प्रजापतिरकामयतानन्त्यमश्नुवीयेति[6] ' सो ऽग्नीनाधाय पूर्णाहुत्यायजत[7] ' सो ऽन्तमेवापश्यत्सो[8] ऽग्निहोत्रेणेष्ट्वान्तमेवापश्यत्स दर्शपूर्णमासाभ्यामिष्ट्वान्तमेवापश्यत्स आग्रयणेनेष्ट्वान्तमेवापश्यत्स[9] चातुर्मास्यैरिष्ट्वान्तमेवापश्यत्स पशुबन्धेनेष्ट्वान्तमेवापश्यत्सो ऽग्निष्टोमेनेष्ट्वान्तमेवापश्यत्स[10] राजसूयेनेष्ट्वा राजेति[11] नामाधत्त ' सो ऽन्तमेवापश्यत्स वाजपेयेनेष्ट्वा[12] सम्राडिति नामाधत्त[13] ' सो ऽन्तमेवापश्यत्सो[14] ऽश्वमेधेनेष्ट्वा स्वराडिति[15] नामाधत्त ' सो ऽन्तमेवापश्यत्स[16] पुरुषमेधेनेष्ट्वा विराडिति नामाधत्त ' सो ऽन्तमे-

1) अग्निष्टोमो fehlt in B; 2) °णावन्तो A; 3) °तिष्ठन्ते B; °तिष्ठन्ति E; 4) स आत्मा A, B und E; 5) °नप्यतीति A; देवा अप्येतीति B; 6) So corr.: A °श्नुवेति; B °श्नुवेति; C °श्नुवेने; E °श्नुयति; 7) So corr.; °जेत A, C und E; °जेते B; 8) तमेवा° C; तमेवा° E; 9) आग्रयणेने° E; आग्रयणेनं त्वान्तमेवा° B; 10) °पश्यात्स E; 11) राजेयेति E; 12) °येनेष्ट्वां E; 13) °धत्ते C; 14) ऽन्तमेवा° E; 15) स्वराडिति E; 16) ऽन्तमेवापश्यत्स A.

वापश्यत्स[1] सर्वमेधेनेष्ट्वा सर्वराडिति[2] नामाधत्त[3] सो ऽन्तमेवापश्यत्सो ऽह्नीनैर्दक्षिणावद्भिरिष्ट्वान्तमेवापश्यत्सो[4] ऽह्नीनैरदक्षिणावद्भिरिष्ट्वान्तमेवापश्यत्स[5] सत्त्रेणोभयतो-[6] ऽतिरात्त्रेणान्ततो ऽयजत[7] । वाचं[8] ह वै होत्रे प्रायच्छत्प्राणमध्वर्यवे[9] चक्षुरुद्गात्रे मनो ब्रह्मणे[10] ऽङ्गानि होत्रकेभ्य आत्मानं सदस्येभ्य[11] । एवमानन्त्यमात्मानं दत्त्वानन्त्यमाश्नुत[12] । तस्या दक्षिणा आनयत्ताभिरात्मानं[13] निष्क्रीणीय[14] । तस्मादेतेन ज्योतिष्टोमेनाग्निष्टोमेनात्मनिष्क्रयणेन सहस्रदक्षिणेन[15] पृष्ठशमनीयेन[16] यजेत । यो ह्यनिष्ट्वा[17] पृष्ठशमनीयेन[18] प्रैत्यात्मानं[19] सो ऽनिष्क्रीय[20] प्रैतीति[21] ब्राह्मणम् । ॥ ८ ॥

यद्धै[22] संवत्सराय संवत्सरसदो[23] दीक्षन्ते कथमेषाम-

1) स fehlt in E; 2) सर्वाराडिति B; 3) °धत्तत् B und C; 4) ऽह्नीनैर्दक्षिणातद्भि° B; °न्त्वमेवापश्यत्सो C; 5) स fehlt in E; 6) °भवतो B; सत्रेणोभयते C; सत्रेणोभयते E; 7) So corr.; यजेत A und C; यजेत B; यजेतं E; 8) वाच B; 9) °ध्वर्यवे B; °धर्यवे E; 10) ब्रह्मणो E; 11) सदस्योभ्य B; सदसेभ्य E; 12) So corr.; दत्वानन्त्यमश्नुयेति A; दत्वानन्तमश्नुयति B; दत्वानन्तमश्नुयेति C; दत्वानन्तमश्नुयते E; 13) आनं यं ताभिरात्मानं E; आंनयत्ता° B; 14) ? ? 15) सहस्रं दक्षिणेन E; 16) पृष्ठसम° E; 17) होनिष्ट्वा B; 18) पृष्ठाश° B; 19) प्रीत्यात्मानं B; 20) So corr.; निष्क्रीणीय A, B, C; नीष्कृणीयतीं E; 21) प्रैति E; 22) यद्धैत्ये B; 23) संवत्सरदो C; °रसोदो E.

ग्निहोत्रमनन्तरितं[1] भवति[1] । व्रतेनेति[1] ब्रूयात्कथमेषां[2] दर्शो ऽनन्तरितो[3] भवति । दध्ना च पुरोडाशेन चेति ब्रूयात्कथमेषां पौर्णमासमनन्तरितं[4] भवत्याज्येन[5] च पुरोडाशेन चेति ब्रूयात्कथमेषामाग्रयणमनन्तरितं भवति । सौम्येन चरुणेति ब्रूयात्कथमेषां[6] चातुर्मास्यान्यनन्तरितानि[7] भवन्ति । पयस्ययेति[8] ब्रूयात्कथमेषां पशुबन्धो[9] ऽनन्तरितो भवति । पशुना च पुरोडाशेन चेति ब्रूयात्कथमेषां[10] सौम्यो ऽध्वरो[11] ऽनन्तरितो[12] भवति । ग्रहैरिति ब्रूयात्कथमेषां[13] गृहमेधो[13] ऽनन्तरितो भवति । धानाकरम्भैरिति ब्रूयात्कथमेषां पितृयज्ञो ऽनन्तरितो भवत्यौपासनैरिति[14] ब्रूयात्कथमेषां मिथुनमनन्तरितं भवति । हिंकारेणेति[15] ब्रूयात्सैषा संवत्सरे यज्ञक्रतूनामपीतिः[16] । स य एवमेतां संवत्सरे यज्ञक्रतूनामपीतिं[17] वेद[18] यज्ञेन सात्मा[19] सलोको[20] भूत्वा देवानप्येतीति ब्राह्मणम् ।
॥ १ ॥

---

1) Fehlt in B; 2) ब्रूयात् fehlt in B; 3) ऽनतरिसोतो B; 4) पौषानन्तरितो B; 5) भवतित्या° B; 6) °त्कथमवां E; 7) चतु° E; 8) पयसेति A, C und E; 9) पशू° E; 10) °मेषो B; 11) ऽधरो E; 12) ऽनतरितो B und E; 13) Fehlt in E; 14) भवत्योपा° C; °सनोरिति E; 15) हिंकारेनेति C; 16) So corr.; die hss. °मुपैतिः; 17) So corr.; °तूनानुवर्ति A; °तूनानुवैते B; °तूनां मपैतिं C; °तूनां मुपैतिं E; 18) A fügt संवत्सरेण ein; 19) स आत्मा A, B und E; 20) संलोको E.

देवा ह वै सहस्रसंवत्सराय दिदीक्षिरे[1] । तेषां पञ्च शतानि संवत्सराणां पर्युपितान्यासन्नथेदं[2] सर्वं[3] शश्राम[4] ये स्तोमा यानि पृष्ठानि यानि[5] शस्त्राणि । ते देवा इहसामिवासुरुप[6] तं यज्ञक्रतुं[7] जानीमो यः सहस्रसंवत्सरस्य प्रतिमा । को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति । तदयातयाम[8] मध्ये[9] यज्ञस्यापश्यंस्तेना-यातयाम्ना[10] या[10] वेदे[10] व्यष्टिरासीत्तां[11] पञ्चस्वपश्यन्नृ-चि[12] यजुषि साम्नि[13] शान्ते ऽथ घोरे । ता वा[14] एताः पञ्च व्याहृतयो भवन्त्यो श्रावयास्तु[15] श्रौषड्यज येयजामहे वौषडिति । ते देवा इहसामिवासुरुप[16] तं यज्ञक्रतुं जा-नीमो यः[17] सहस्रसंवत्सरस्य[17] प्रतिमा[17] । को[17] हि[17] तस्मै[17] मनुष्यो[17] यः सहस्रसंवत्सरेण[18] यजेतेति[19] । तत एतं तापश्चितं[20] सहस्रसंवत्सरस्याञ्जस्यमपश्यंस्ते[20] ह्येव

---

1) दीक्षन्ते C; दीक्षरे E; 2) पर्यपेतां न्यास° B und C; 3) सर्वं B; 4) So corr. nach Ś. Br., die hss. शुश्रुवुः; 5) B fügt प्राणानि ein; 6) ? ? 7) °क्रतु B und E; 8) तदया fehlt in B; 9) मधे E; 10) So corr. nach Ś. Br.; °याम्या पेदे A; °याम्या य पेदे B; °याम्या या पेदे C; °याम्यां या पेदे E; 11) व्युष्टिरा° A, B und E; 12) So corr.; die hss. °पश्यदृचि; 13) साम्नि A, C und E; साम्ने B; 14) Fehlt in E; C व; 15) श्रव° A; श्रावया श्रस्तु B; 16) ? ?; 17) Fehlt in B; 18) सहस्रं वत्स° B; 19) यजेतिति B; यजेनेति C; यजेति E; 20) संवत्सरं तापश्चितस्या ञ्जस्यमपश्यंस्ते E.

स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि ' स[1] खलु द्वादश मासान्दीक्षाभिरेति[2] द्वादशमासानुपसद्भिर्द्वादशमासांत्सुत्याभिरथ यद्द्वादश मासान्दीक्षाभिरेति द्वादशमासानुपसद्भिस्तेनैतावग्न्यर्कावाप्नोत्यथ[3] यद्द्वादश मासांत्सुत्याभिस्तेनेदं महदुक्थमवाप्नोति[4] ' ते देवा इहसामिवासुरुप[5] तं[6] यज्ञक्रतुं जानीमो यः सहस्रसंवत्सरस्य[7] प्रतिमा ' को हि तस्मै मनुष्यो[8] यः सहस्रसंवत्सरेण[9] यजेतेति ' तत[10] एतं[11] संवत्सरं[12] तापश्चितस्याञ्जस्यमपश्यंस्तं[12] क्वेव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि ' ते[13] देवा इहसामिवासुरुप तं यज्ञक्रतुं जानीमो[14] यः सहस्रसंवत्सरस्य[15] प्रतिमा ' को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण[15] यजेतेति[16] ' तत एतं द्वादशाहं संवत्सरस्याञ्जस्यमपश्यंस्तं[17] क्वेव स्तोमा भवन्ति तानि पृष्ठानि[18] तानि शस्त्राणि ' स खलु द्वादशाहं दीक्षाभिरेति द्वादशाहमुपसद्भिर्द्वादशाहं[19] सुत्याभिरथ यद्द्वादशाहं दी-

1) Von त bis ते देवा इह° fehlt in E; 2) मासा दीक्षा° B; 3) °वग्नि-र्कावाप्नोत्यथ B; 4) °मावाप्नोति B; 5) ? ? °सुन्नप° A, C und E; 6) तां C; 7) सहस्रंव° B; 8) मनुष्या C und E; 9) सहस्रं सं° B und E; 10) त B; 11) एवं A; 12) द्वादशाहं संवत्सरस्याज्ञस्यमपश्यस्ते E; 13) Von ते bis द्वादशाहमुपसद्भि° fehlt in E; 14) जानानो A und C; 15) सहस्रंव° B; 16) यजेति B; 17) °मपश्यन्ते C; 18) पृष्ठा B; 19) °दशाह C.

जाभिरेति द्वादशाहमुपसद्भिस्तेनैतावग्न्यर्कावाप्नोत्यथ[1] यद्द्वादशाहं[2] सुत्याभिस्तेनेदं महदुक्थमवाप्नोति[3] ' ते देवा इहसमिवासुरुप[4] तं यज्ञक्रतुं[5] जानीमो यः सहस्रसंवत्सरस्य प्रतिमा ' को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति[6] ' तत एतं पृष्ठं[7] षडहं[8] द्वादशाहस्याञ्जस्यमपश्यंस्ते[9] क्वेव स्तोमा भवन्ति तानि पृष्ठानि तानि[10] शस्त्राणि ' ते देवा इहसामिवासुरुप[11] तं यज्ञक्रतुं[12] जानीमो यः सहस्रसंवत्सरस्य प्रतिमा ' को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति ' तत एतं विश्वजितं पृष्ठषडहस्याञ्जस्यमपश्यंस्ते[13] क्वेव स्तोमा भवन्ति[14] तानि पृष्ठानि तानि[15] शस्त्राणि ' ते देवा इहसामिवासुरुप[16] तं यज्ञक्रतुं[17] जानीमो यः सहस्रसंवत्सरस्य प्रतिमा[18] ' को हि तस्मै मनुष्यो यः सहस्रसंवत्सरेण यजेतेति ' स वा एष विश्वजिद्यः सहस्रसंवत्सरस्य प्रतिमैष ह प्रजानां प्रजापतिर्यद्विश्वजिदिति ब्राह्मणम् ' ॥ १० ॥

---

1) °ग्न्यर्काप्नोत्यथ A ; °ग्न्यार्कावाप्नोत्यथ C ; 2) °दशहं C ; 3) महदुक्थ° A und C ; महदुक्था° B ; 4) ? ? ; 5) °क्रतु E ; 6) यजेति B ; 7) पृष्ठ्य: B ; पृष्ठ E ; 8) षडह C ; 9) °पश्यस्ते E ; 10) Fehlt in E ; 11) ? ? ; °सुरूप E ; 12) °क्रतु E ; 13) °मपश्यस्ते B und C ; 14) भवति B ; 15) E fügt स्त ein ; 16) ? ? ; °सुरूप E ; 17) °क्रतु E ; 18) प्रति E.

पुरुषं ह वै नारायणं प्रजापतिरुवाच यजस्व[1] यजस्वेति । स होवाच यजस्व यजस्वेत्येवं हात्थ मा । त्रिरपि[2] जत[2] मे वसवः प्रातःसवनेनागू रुद्रा माध्यंदिनसवनेनादित्यास्तृतीयसवनेन[3] । यज्ञवास्तुन्येव[4] पर्यशिषो यज्ञवास्तुमित्येवमाशिषो[5] ऽहं वा एतद्वेद यज्ञे[6] वसवः प्रातःसवनेनागू रुद्रा माध्यंदिनसवनेनादित्यास्तृतीयसवनेन[7] यज्ञवास्तुन्येव पर्यशिषो यज्ञवास्तुमित्येवमाशिषो[8] विद्वांसो नूनं वा याजयेयुरेते[9] ह वा अविद्वांसो यत्रानृग्विद्धोता भवत्ययजुर्विदध्वर्युरसामविदुद्गाताभृग्वङ्गिरोविद्ब्रह्मा[10] । यजस्वैव हन्त तु ते तद्वक्ष्यामि । यथा सूत्रे मणिरिव सूत्रमेतान्युक्थाहानि भवन्ति सूत्रमिव वा मणाविति । तस्माद्य एव सर्ववित्स्यात्तं ब्रह्माणं कुर्वीतैष ह[11] वै विद्वांत्सर्वविद्ब्रह्मा यद्भृग्वङ्गिरोविदेते[12] ह वा अस्य सर्वस्य शमयितारः[13] पालयितारस्तस्माद्ब्रह्मा[14] स्तुते[15] बहिःपवमाने वाचयति । ॥ ११ ॥

---

1) यस्व E; 2) ?, त्रिरयजते A und C; त्रिरजयिते B; त्रिरजते D; Mit Ś. Br. XII 3. 4. 1. zu lesen यजस्वेति वाव त्वं मामात्थ त्रिरयक्षि वसवः u.s.w.; 3) So corr.; die hss. माध्यंदिने सवने आदित्यास्तृतीयसवने; 4) यज्ञवास्तुं नेव B und C; 5) यज्ञवस्तु° B; 6) यते A, E und D; यन्ते C; 7) Vgl. 3; 8) °माशिषो B; 9) यायजेयुरेते C; 10) भवन्त्यय° B; भवत्ययजुर्विदनध्व° C; भवत्ययजुर्वेदनध्व° E; 11) Fehlt in E; 12) य भृग्वङ्गि° B; °रोविदेते C; °रोविदेयते E; 13) समेतारः C; शमेयितारः E; 14) °स्तस्माद्ब्रह्मा C; °तार तस्मा E; 15) नुते B.

श्येनो ऽसि गायत्रछन्दा ' अनु त्वारभे ' स्वस्ति मा संपारयेति ' स यदाह[1] श्येनो ऽसीति सोमं वा एतदाहैष ह वा अग्निर्भूत्वास्मिंल्लोके[2] संश्यायति[3] ' तद्यत्संश्यायति[4] तस्माच्छ्येनस्तच्छ्येनस्य श्येनत्वं[5] ' स यदाह गायत्रछन्दा अनुत्वारभ इति गायत्रेण छन्दसा वसुभिर्देवैः[6] प्रातःसवने ऽस्मिंल्लोके ऽग्निं सन्तमन्वारभते[7] ' स यदाह स्वस्ति मा संपारयेति गायत्रेणैव छन्दसा वसुभिर्देवैः प्रातःसवने ऽस्मिंल्लोके ऽग्निना देवेन स्वस्ति मा[8] संपारयेति गायत्रेणैवैनं तच्छन्दसा[9] वसुभिर्देवैः प्रातःसवने ऽस्मिंल्लोके ऽग्निना देवेन स्वस्ति संपद्यते य एवं वेद ' ॥ १२ ॥

अथ माध्यंदिने पवमाने वाचयति सम्राडसि त्रिष्टुप्छन्दा[10] ' अनु त्वारभे ' स्वस्ति मा संपारयेति ' स यदाह सम्राडसीति[11] सोमं वा एतदाहैष ह वै वायुर्भूत्वान्तरिक्षलोके[12] सम्राजति[13] ' तद्यत्सम्राजति[14] तस्मात्सम्राट्तत्सम्राजस्य सम्राट्त्वं ' स यदाह त्रिष्टुप्छन्दा[15] अनु त्वारभ इति

1) यदा E; 2) °त्वा अस्मिंल्लोके A und E; 3) संश्यायति A; संशारयेति सदाश्यायति B; संशापयति C; संश्याति E; 4) So corr.; die hss. °श्याययति; 5) श्येनधं B; 6) वसुर्भि° A; 7) °रभेते A pr. m.; 8) Fehlt in B, C und E; 9) तच्छन्दंसा B; 10) त्रिष्टुभछन्दा B; त्रिष्टुपछन्दा C; 11) संम्यडसीति B; 12) °रिक्षं° B; 13) सम्राजिति E; 14) तद्यत्संभ्राजति E; B fügt ein: तस्मात्सम्राडसीति; 15) त्रिष्टपछन्दा B.

त्रैष्टुभेन[1] छन्दसा रुद्रैर्देवैर्माध्यंदिने सवने ऽन्तरिक्षलोके वायुं[2] सन्तमन्वारभते ' स यदाह[3] स्वस्ति मा संपारयेति[4] त्रैष्टुभेनैव छन्दसा रुद्रैर्देवैर्माध्यंदिने सवने अन्तरिक्षलोके वायुना[5] देवेन[5] स्वस्ति मा संपारयेति ' त्रैष्टुभेनैवैनं[6] तच्छन्दसा[6] रुद्रैर्देवैर्माध्यंदिने सवने अन्तरिक्षलोके वायुना देवेन स्वस्ति[7] संपद्यते य एवं वेद ' ॥ १३ ॥

अथार्भवे पवमाने वाचयति स्वरो ऽसि गयो ऽसि जगच्छन्दा ' अनु त्वारभे ' स्वस्ति मा[8] संपारयेति ' स यदाह स्वरो ऽसीति सोमं वा एतदाहैष ह वै सूर्यो भूत्वामुष्मिंल्लोके स्वरति[9] ' तद्यत्स्वरति तस्मात्स्वरस्तत्स्वरस्य[10] स्वरत्वं[11] ' स यदाह गयो ऽसीति सोमं[12] वा एतदाहैष ह वै चन्द्रमा भूत्वा[13] सर्वांल्लोकान्गच्छति[14] ' तद्यद्गच्छति तस्माद्गयस्तद्गयस्य[15] गयत्वं ' स यदाह जगच्छन्दा अनु त्वारभ इति जागतेन छन्दसादित्यैर्देवैस्तृतीयसवने ऽमुष्मिंल्लोके सूर्यं सन्तमन्वारभते ' स यदाह स्वस्ति

---

1) त्रिष्टुभेन E; 2) वायु B und C; 3) दाह B; 4) °रयति B; 5) B hat: वायु सन्तमन्वारभते सदाह; 6) वैनं तच् fehlt in B; 7) B fügt ein संपारयेति त्रैष्टुभेनैवैनं तच्छन्दसा रुद्रैर्देवैर्माध्यंदिने सवने अन्तरिक्षलोके वायुना देवेन स्वस्ति; 8) म B; 9) स्वरति B; 10) तस्मात्स्वरतस्व° A; तस्मात्स्वरतस्वरस्य C; 11) स्वरस्यत्वं C; 12) सोम B; 13) भूत्वां B; 14) E fügt व ein; 15) तस्माद्गयास्त° C; °स्तद्गयस्त E.

मा संपारयेति जागतेनैव[1] छन्दसादित्यैर्देवैस्तृतीयसवने ऽमुष्मिंल्लोके सूर्येण देवेन स्वस्ति मा[2] संपारयेति जागतेनैवैनं तच्छन्दसादित्यैर्देवैस्तृतीयसवने ऽमुष्मिंल्लोके सूर्येण देवेन स्वस्ति संपद्यते य एवं वेद ' ॥ १४ ॥

अथ संस्थिते संस्थिते सवने वाचयति[3] मयि भर्गो[4] मयि[5] महो मयि[6] यशो मयि सर्वमिति ' पृथिव्येव भर्गो ऽन्तरिक्ष एव[7] महो द्यौरेव यशो ऽप एव सर्वमग्निरेव भर्गो वायुरेव[8] मह आदित्या[9] एव यशश्चन्द्रमा एव सर्वं ' वसव एव भर्गो रुद्रा एव मह आदित्या[9] एव यशो विश्वेदेवा एव सर्वं ' गायत्र्येव भर्गस्त्रिष्टुबेव महो जगत्येव यशो ऽनुष्टुबेव सर्वं ' प्राच्येव भर्गः प्रतीच्येव मह उदीच्येव[10] यशो दक्षिणैव सर्वं ' वसन्त[11] एव भर्गो ग्रीष्म एव महो वर्षा एव यशः शरदेव सर्वं ' त्रिवृदेव भर्गः पञ्चदश[12] एव महः सप्तदश एव यश एकविंश एव सर्वमृग्वेद एव भर्गो यजुर्वेद एव महः सामवेद[13] एव यशो[14] ब्रह्मवेद एव सर्वं ' होतैव भर्गो ऽध्वर्युरेव

1) °नैवं C; °नैवैत E; 2) मा fehlt in C; von मा bis संपद्यते fehlt in B und E; 3) E fügt भवति ein; 4) भिर्गो A; 5) य E; 6) मय्ये E; 7) E fügt च ein; 8) °रेवम B; 9) आदित्य E; 10) उदीचिव C; 11) वसंत E; 12) पञ्चदशा B; 13) सामावेदा E; 14) E fügt एव ein.

मह उद्गातैव यशो ब्रह्मैव सर्वं' वागेव भर्गः प्राण एव महश्चक्षुरेव यशो मन एव सर्वम्' ॥ १५ ॥

स यदाह मयि भर्ग[1] इति पृथिवीमेवैतल्लोकानामाहाग्निं[2] देवानां वसून्देवान्देवगणानां[3] गायत्रं छन्दसां प्राचीं दिशां वसन्तमृतूनां[4] त्रिवृतं स्तोमानामृग्वेदं वेदानां हौत्रं[5] होत्रकाणां[6] वाचमिन्द्रियाणाम्[7] ॥ १६ ॥

स यदाह मयि मह[8] इत्यन्तरिक्षमेवैतल्लोकानामाह वायुं देवानां रुद्रान्देवान्देवगणानां त्रैष्टुभं छन्दसां[9] प्रतीचीं दिशां ग्रीष्ममृतूनां पञ्चदशं[10] स्तोमानां यजुर्वेदं[11] वेदानामाध्वर्यवं होत्रकाणां प्राणमिन्द्रियाणाम्[12] ॥ १७ ॥

स यदाह मयि यश इति दिवमेवैतल्लोकानामाहादित्यं देवानामादित्यान्देवान्देवगणानां[13] जागतं छन्दसामुदीचीं[14] दिशां वर्षा ऋतूनां[15] सप्तदशं स्तोमानां सामवेदं वेदानामौद्गात्रं होत्रकाणां चक्षुरिन्द्रियाणाम्' ॥ १८ ॥

स यदाह मयि सर्वमित्यप एवैतल्लोकानामाह[16] च-

1) भर्गा A pr. m.; 2) °नामाग्नि E; 3) वासुन्दे° C; वसूंदे° B; 4) °मृतुनां B; 5) Fehlt in B; 6) होत्रकाणां B; 7) वाचमिद्रियाणाम् E; 8) महे B; 9) छन्दंसां E; 10) पञ्चदशां C; 11) यजुर् E; 12) प्राणमिद्रि° E; 13) °गणाना E; 14) छदनां मुदीचीं B; 15) ऋतूना E; 16) °कानां माह C.

न्द्रमसं देवानां विश्वान्देवान्देवगणानामानुष्टुभं[1] छन्दसां दक्षिणां दिशां शरदमृतूनामेकविंशं[2] स्तोमानां ब्रह्मवेदं वेदानां ब्रह्मत्वं होत्रकाणां मन इन्द्रियाणाम्' ॥ १९ ॥

स वा[3] एष दशधा चतुः संपद्यते' दश च ह वै चतुर्विराजो ऽक्षराणि[4]' तं गर्भा उपजीवन्ति[5]' श्रीर्वै विराड्यशो[6] ऽन्नाद्यं[7]' श्रियमेव तद्विराजं[8] यशस्यन्नाद्ये प्रतिष्ठापयति' प्रतिष्ठन्तीरिदं[9] सर्वमनुप्रतिष्ठति' प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद' ॥ २० ॥

अनर्वाणं[10] ह वै देवं[11] दध्यङ्ङाङ्गिरस[12] उपसीदं[13] ह यज्ञस्य शुष्टिं[14] समश्नवामहा इति' स दध्यङ्ङाङ्गिरसो[15] ऽब्रवीद्यो वै सप्तदशं प्रजापतिं यज्ञे ऽन्वितं वेद नास्य यज्ञो रिष्यते' न यज्ञपतिं[16] रिष्यन्त[16] इति' ता वा एताः पञ्च व्याहृतयो भवन्त्यो श्रावयास्तु श्रौषड्यज ये यजामहे वौषडिति' स दध्यङ्ङाङ्गिरसो[17] ऽब्रवीन्न वयं विद्मो यदि ब्राह्मणाः स्मो यद्यब्राह्मणाः स्मो यदि तस्यर्षेः

---

1) °नामः नष्टुभं B; °ष्टुभ E; 2) शरन्मृतू° B; 3) एवा C und E; 4) ऽक्षराणी B; 5) °जीवन्ति E; 6) विराक्राशो A, C und E; 7) ऽन्नाद्यां C; 8) तद्विज E; 9) ? ? प्रतिष्ठन्तिरिदं B; 10) अयर्वाणं A pr. m.; 11) वं B; 12) So corr.; दध्यङाङ्गिरसन् die hss.; 13) Corrupt; 14) सुष्टि A; सुष्टीं B; सुष्टिं E; शुष्टि D; 15) So corr.; die hss. दध्यङाङ्गि°; 16) ? ?; vielleicht यज्ञपती रिष्यत ?; 17) So corr.; die hss. दध्यङाङ्गिरसो.

स्मो वान्यस्येत्यंनर्वाणाश्च[1] ह वा ऋतावन्तश्च[2] पितरः स्वधायामावृषायन्त[3] वयं वदामहै वयं वदामहा[4] इति' सो ऽयात्स्वायंभुवो[5] वा[5] ऋतावन्तो[5] मदयातां[5] न[5] वयं[5] वदामहा[5] इति' तस्मात्प्रवरे प्रव्रियमाणे[6] वाचयेद्देवाः पितर इति तिस्रो' य एति संयजति[7] स भवति यश्च[8] न ब्रूते यश्च[9] न ब्रूत इति ब्राह्मणम्' ॥ २१ ॥

सावित्रं ह स्मैतं[10] पूर्वं पुरस्तात्पशुमालभन्त इत्येतर्हि[11] प्राजापत्यं' यो ह्येव सविता स प्रजापतिरिति वदन्तस्तंस्माद्व समुप्याग्नींस्तेन[12] यजेरंस्ते समानधिष्ण्या एव स्युरोखासंभरणीयाया[13]' उखासंभरणीयायां विन्युप्याग्नींस्तया[14] यजेरंस्ते नानाधिष्ण्या एव स्युरा दीक्षणीयाया[15]' दीक्षणीयायां संन्युप्याग्नींस्तया[16] यजेरंस्ते समानधिष्ण्या[17] एव स्युरोदवसानीयाया[18]' उदवसानीयायां विन्युप्याग्नींस्तया यजेरंस्ते नानाधिष्ण्या एव स्युरंथ यदि यजमानस्योपतपेत्पार्श्वतो ऽग्नीनाधाय तावदासीत[19] या-

---

1) नान्य° ed. B. Ind.; 2) ऋतावन्त्यत्र B; ऋतावन्तत्र E; 3) °षायन्तं B; 4) वनहां E; 5) ? ? A und C नदेयातां; E मदायातां; 6) प्रव्रीय: माणे B; 7) सयजति B; 8) यस्य C; यस्त्वत्र E; 9) यस्य C; यस्न E; 10) स्न चैतं A, C und E; चैतं B; 11) So corr.; die hss. इति नेतर्हि; 12) So corr.; die hss. मनोप्या°; 13) स्युनेखासं A; स्युत्नेयां सं° B; स्युरेयासं° C; स्युरोया° E; 14) °स्तेन C; 15) Fehlt in B und E; 16) °स्तेन A, B und E; 17) नानानधिष्णया E; 18) स्युरेद° B; 19) तावदासीत A.

वदगदः[1] स्याद्यदि प्रेयात्स्वैरेव[2] तमग्निभिर्दहेद्दशवाग्नि-
भिरितरे[3] यजमाना[4] आसत इति वदन्तस्तस्य तदेव
ब्राह्मणं यददः पुरःसवने 'पितृमेध[5] आशिषो व्या-
ख्याताः' ॥ २२ ॥

सायंप्रातर्होमौ स्थालीपाको नवश्च[6] यः ।
बलिश्च पितृयज्ञश्चाष्टका[7] सप्तमः पशुः ॥
इत्येते पाकयज्ञाः[8] '
अग्न्याधेयमग्निहोत्रं पौर्णमास्यमावास्ये ।
नवेष्टिश्चातुर्मास्यानि[9] पशुबन्धो ऽत्र सप्तमः ॥
इत्येते हविर्यज्ञाः'
अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः ।
वाजपेयो ऽतिरात्रश्चाप्तोर्यामात्र सप्तमः ॥
इत्येते सुत्याः'
के स्विद्देवाः प्रवोवाजाः के स्विद्देवा अभिद्यवः ।
के स्विद्देवा हविष्मन्तः किं स्विज्जिगाति सुम्नयुः ॥
ऋतव एव प्रवोवाजा[10] मासा देवा अभिद्यवः ।

---

1) So corr.; die hss. यावदग्ध; 2) प्रेयाद्यासोत्स्वैरेव B; प्रेयात्सैरेव C; 3) °र्भिर्दहेद° B; °र्भिर्दहेद्दश वा अग्नि° A, C und E; 4) यजमान A, C und E; 5) पितृमेधा B; 6) नवश्च C; 7) पितृयज्ञ° A und E; पितृयज्ञस्याष्टका C; 8) पाकंयज्ञाः B; पाकयज्ञः C; 9) °तुर्मास्यानि A und E; 10) °वाजाता A und B.

अर्धमासा हविष्मन्तस्तान्जिगाति[1] सुम्नयुः ॥
कति स्विद्रात्रयः कत्यहानि कति स्तोत्राणि कति शस्त्राण्यस्य[2] ।
कति स्वित्सवनाः संवत्सरस्य स्तोत्रियाःपदाक्षराणि कत्यस्य ॥
द्वावतिरात्रौ षट्शतमग्निष्टोमा[3] द्वे[4] विंशतिशते उक्थ्यानां ।
द्वादश षोडशिनः षष्टिः[5] षडहा वैषुवतं[6] च ॥
अहान्यस्य विंशतिशतानि त्रीण्यहश्चैकं तावदस्य ।
संवत्सरस्य सवनाः सहस्रमसीति त्रीणि च संस्तुतस्य[7] ॥
षट्षष्टिश्च द्वे च शते भवत स्तुतशस्त्राणामयुतं[8] चैकमस्य ।
स्तोत्रियाश्च नवतिसहस्रा[9] द्वे नियुते नवतिश्चाति[10] षट्[11] ॥
अष्टौ शतान्ययुतानि त्रिंशच्चतुर्नवतिश्च पदान्यस्य[12] ।
संवत्सरस्य कविभिर्मितस्यैतावती मध्यमा देवमात्रा ॥
अयुतमेकं प्रयुतानि त्रिंशद्द्वे नियुते तथा[13] ह्यनुसृष्टाः[13] ।
अष्टौ शतानि नव चाक्षराण्येतावानात्मा परमः प्रजापतेः ॥

---

1) So corr.; °स्तांस्विजगाति A; °स्ता स्विजिगाति C; °स्तां स्वंजिगाति B; °स्तांजिगाति E; 2) Von शस्त्रा° bis रात्रौ fehlt in B; 3) षट्शत° B; 4) द्वा E; 5) षष्टिः A; 6) विषुवतं B; 7) संस्ततस्य E; 8) °णामयुः कं B; 9) नवतिंस° C und E; नवतीस° A; 10) °श्चाधि A; °श्चति C; 11) षड् C; षट E; 12) पदं न्यस E; 13) तथाश्वनुसृष्टाः E.

आज्यं वषट्कारः प्रदानात्तमेतमग्निष्टोमे[1] पर्वशः[2] साधु
क्लृप्तम् ।
सौभिषजं छन्द ईप्सन्त्यदग्नौ[3] चतुःशतं बहुधा हूयते यत् ॥
प्रातःसवन स्तुत एकविंशो गायत्रस्तोममित एक एव ।
माध्यंदिनः सप्तदशेन क्लृप्तस्त्रयस्त्रिंशेन सवनं तृतीयम् ॥
॥ २३ ॥

श्रद्धायां रेतस्तपसा तपस्वी वैश्वानरः सिषिचे ऽपत्यमी-
प्सन् ।
ततो जज्ञे[4] लोकजित्सोमजम्भा[5] ऋषेर्ऋषिरङ्गिराः संबभूव ॥
ऋषेर्यज्ञस्य चतुर्विधस्य[6] श्रद्धां[7] यः श्रेयसीं लोकममुं जिगाय ।
यस्मै वेदाः प्रसृताः सोमबिन्दु[8] युक्ता वहन्ति सुकृतामु
लोकम् ॥
ऋचो ऽस्य भागांश्चतुरो वहन्त्युक्थशस्त्रैः प्रमुदो मोदमानाः ।
यद्दैर्हविर्भिश्च कृताकृतश्च यजूंषि[9] भागांश्चतुरो वहन्ति ॥
औदुम्बर्यां सामघोषेण तावत्सविष्टुतिभिश्च स्तोमैः छन्द-
सा[10] ।
सामानि भागांश्चतुरो वहन्ति गीत्या स्तोमेन सह प्र-
स्तावेन[11] च ॥

---

1) °ष्टोमेन C; 2) प्रवर्तश: C; 3) इत्संत्यचग्नौ B; 4) यज्ञो B; यज्ञे A und E; 5) °स्तोमलंजंभा B; 6) °र्विदस्य C; 7) श्रद्धा C; 8) °विन्दुं A; 9) यजूंषी B; यजूषि E; 10) छन्द C; 11) प्रस्ताषेन C.

प्रायश्चित्तैर्भिषजः संस्तुवन्तो ऽथर्वाणो ऽङ्गिरसश्च शान्ताः ।
ब्रह्मा ब्रह्मत्वेन प्रमुदो मोदमाना असंसृष्टान्भागांश्चतुरो[1]
वहन्ति ॥

यो ब्रह्मवित्सो[2] ऽभिकरो ऽस्तु वः शिवो धिया[3] धी-
रो[4] रक्षतु धर्ममेतम्[5] ।
मा वः प्रमत्तामसृताच्च यज्ञात्कर्माच्च[6] येनानङ्गिरसो[7] ऽपि-
यासीत्[8] ॥

मायुं[9] दर्शं[10] मारुशस्ताः प्रमेष्टा मा मे भूर्युक्ता[11] वि-
दहाय लोकान् ।
दिव्यं भयं[12] रक्षत धर्ममुद्यतं[13] यज्ञं कालाश स्तुतिगो-
पनायनम्[14] ॥

होता च मैत्रावरुणश्च पादमच्छावाकः सह ग्रावस्तुतै-
कम्[15] ।
अग्निं स्तुवन्तो ऽहरहः पृथिव्या[16] अग्निं पादं ब्रह्मणा[17]
धारयन्ति ॥

---

1) असंसृष्टा प्रागोश्चतुरो E; 2) ब्रह्मभिः सो C; 3) धीया A pr. m.; 4) धीयो C; 5) धर्मेतां C; 6) ? ?; °त्कर्मच B; 7) °ङ्गिरासा B; 8) ऽपियासीत C; 9) मायु C; 10) दिशं A; दिशां B; 11) So corr.; die hss. भूर्युक्ता; 12) भयं A pr. m. und B; 13) °मुक्तन्त E; 14) °नापनायनं A, C und E; 15) ग्रावस्तुवैकम् C; ग्रावस्तुवैक E; 16) पृथिव्यां B; 17) ब्राह्मणा C.

अध्वर्युः प्रतिप्रस्थाता[1] नेष्टोन्नेता निहितं पादमेकम् ।
समन्तरिक्षं यजुषा स्तुवन्तो[2] वायुं पादं ब्रह्मणा धारयन्ति ॥
साम्नोद्गाता छादयन्नप्रमत्त औदुम्बर्यां[3] स्तोभदेयः[4] सगद्गदः ।
विद्वान्प्रस्तोता विदद्वाय[5] सुष्टुतिं सुब्रह्मण्यः प्रतिहर्ताय[6] यज्ञे ॥
साम्ना दिव्येकं निहितं स्तुवन्तः सूर्यं पादं ब्रह्मणा धारयन्ति ।
ब्रह्मा हैकं[7] ब्राह्मणाच्छंसिनः सह पोताग्नीध्रो निहितं पादमेकम् ॥
अथर्वभिरङ्गिरोभिश्च गुप्तो ऽप्सु[8] चन्द्रं पादं ब्रह्मणा धारयन्ति[9] ।
षोडशिकं होत्रका अभिष्टुवन्ति वेदेषु युक्ताः प्रपृथक्चतुर्धा[10] ॥
मनीषिणो दीक्षिताः श्रद्दधाना[11] होतारो गुप्ता अभिवहन्ति[12] यज्ञम् ।
दक्षिणतो ब्रह्मणस्यों[13] जनदित्येतां व्याहृतिं जपन् ॥

---

1) प्रस्थाता B; 2) स्तुवतो B; 3) °म्बर्या C; 4) स्तोनदेयः E; 5) Sic!; 6) °र्ताच A pr. m., B und E; 7) हैक E; 8) सु E; 9) धारयति B; 10) पृथक्चतुर्धा B; प्रथक्चतुर्धा C und E; 11) श्रद्धाना B; 12) अभिवहन्ति A; 13) So corr. nach Bloomfield (Ved. Conc.) ब्रह्मणास्या A und C; ब्रह्मणोस्यां B; ब्रह्मणास्यात् E.

सप्तदशं सदस्यं तं कीर्तयन्ति पुरा[1] विदुः ।
अष्टादशी दीक्षिता दीक्षितानां यज्ञे पत्नी श्रद्धानेह[2] युक्ता ॥
एकोनविंशः शमिता बभूव विंशो[3] यज्ञे गृहपतिरिव[4] सुन्वन् ।
एकविंशतिरेवैषां संस्थायामङ्गिरो वह[5] ॥
वेदैरभिष्टुतो लोको नानावेशापराजितः । ॥ २४ ॥
सप्त सुत्याः सप्त च पाकयज्ञाः[6] हविर्यज्ञाः सप्त तथैकविंशतिः ।
सर्वे ते यज्ञा अङ्गिरसो ऽपियन्ति[7] नूतना यानृषयो सृजन्ति[8] ये च सृष्टाः पुराणैः ॥
एतेषु वेदेष्वपि चैकमेवापव्रजमृत्विजां संभरन्ति ।
कृह्लृपात्सचते[9] तामशस्तिं[10] विष्कन्धमेनं विसृतं प्रजासु ॥
निवर्तन्ते दक्षिणा नीयमानाः सुते सोमे वितते यज्ञतन्त्रे[11] ।
मोघाशिषो यन्त्यनिवर्तमाना अनिष्टयज्ञा न तरन्ति लोकान् ॥

---

1) पुराद्दा B; 2) °नेव C; 3) त्रिंशो C und E; 4) गृहपतिरिव A, B und E; 5) हव B; 6) यावयज्ञा C; पाव्यकयज्ञा E; 7) ऽपीयन्ति E; 8) सृजन्ति B; 9) Corrupt; कृदलिपा° C; कृह्लिपात्सवते E; 10) कामशस्तिं C; °शस्तं B und E; 11) यज्ञं तन्त्रे E.

द्वादशवर्षं[1] ब्रह्मचर्यं पृथग्वेदेषु तत्स्मृतम् ।
एवं[2] व्यवस्थिता वेदाः[3] सर्व एव स्वकर्मसु ॥
सन्ति चैषां समानाः मन्त्राः कल्पाश्च ब्राह्मणानि च ।
व्यवस्थानं तु तत्सर्वं पृथग्वेदेषु तत्स्मृतम् ॥
ऋग्वेदस्य पृथिवी स्थानमन्तरिक्षस्थानो ऽध्वरः ।
द्यौ[4] स्थानं सामवेदस्यापो भृग्वङ्गिरसां स्मृतम् ॥
अग्निर्दैवत[5] ऋग्वेदस्य यजुर्वेदो वायुदेवतः[6] ।
आदित्यः[7] सामवेदस्य चन्द्रमा वैद्युतश्च भृग्वङ्गिरसाम् ॥
त्रिवृत्स्तोम ऋग्वेदस्य[8] यजूंषि पञ्चदशेन सह जज्ञिरे ।
सप्तदशेन सामवेद एकविंशो ब्रह्मसंमितः ॥
वागध्यात्ममृग्वेदस्य[9] यजुषां प्राण उच्यते ।
चक्षुषी सामवेदस्य मनो भृग्वङ्गिरसां स्मृतम् ॥
ऋग्भिः सह गायत्रं जागतमाहुर्यजूंषि त्रैष्टुभेन सह जज्ञिरे ।
उष्णिक्ककुब्भ्यां भृग्वङ्गिरसो जगत्या[10] सामानि[11] कवयो वदन्ति ॥
ऋग्भिः पृथिवीं[12] यजुषान्तरिक्षं[13] साम्ना दिवं लोकजित्सोमजम्भाः ।

---

1) °वर्षे B; 2) एव E; 3) वेदो: E; 4) द्यौः E; 5) अग्निर्देवता A; 6) वायुर्देवता A pr. m. und E; 7) आदित्या: E; 8) ऋग्वेदस्त E; 9) वागाध्या° E; 10) जागत्य C; 11) समानि C; 12) पृथिवो B und E; 13) °न्तरिक्ष E.

अथर्वभिरङ्गिरोभिश्च[1] गुप्तो यज्ञश्चतुष्पाद्दिवमुद्वहेत[2] ॥
ऋग्भिः सुशस्तो यजुषा[3] परिष्कृतः सविष्टुतः सामजित्सोमजम्भाः[4] ।
अथर्वभिरङ्गिरोभिश्च गुप्तो यज्ञश्चतुष्पाद्दिवमारुरोह ॥
ऋचो विद्वान्पृथिवीं वेद संप्रति यजूंषि विद्वान्बृहदन्तरिक्षम् ।
दिवं वेद सामगो यो[5] विपश्चित्सर्वाँल्लोकान्यद्भृग्वङ्गिरोवित् ॥
यांश्च ग्रामे यांश्चारण्ये[6] जपन्ति मन्त्रान्नानार्थान्बहुधा जनासः ।
सर्वे ते यज्ञा अङ्गिरसो ऽपियन्ति नूतना सा हि गतिर्ब्रह्मणो[7] यावरार्ध्या ॥
त्रिविष्टपं त्रिदिवं नाकमुत्तमं तमेतया त्रय्या विद्ययेति[8] ।
अत उत्तरे ब्रह्मलोका महान्तो ऽथर्वणामङ्गिरसां[9] च[9] सा गतिः ॥
अथर्वणामङ्गिरसां[9] च[9] सा गतिरिति ब्राह्मणम् ॥ २५ ॥
॥ इत्यथर्ववेदे गोपथब्राह्मणपूर्वभागे पञ्चमः प्रपाठकः ॥
॥ इति पूर्वब्राह्मणं समाप्तम् ॥

1) अवर्वाभि° A, B und C; 2) So corr.; die hss. °मुद्वदेर; 3) यजुष C; 4) सामजित्सो° C; 5) Ed. B. Ind.; die hss. जो; 6) यांश्चारारण्ये C; 7) °हाणो A; 8) So corr.; die hss. त्रिद्ययेति; 9) ऽथर्वणामङ्गिरसांश्च C.

॥ गोपथब्राह्मणोत्तरभागः ॥

अथ यद्ब्रह्मसदनात्तृणं निरस्यति शोधयत्येवैनं तदथोपविशतीदमहमर्वाग्वसोः सदने सीदामीत्यर्वाग्वसुर्ह [1] वै देवानां ब्रह्मा पराग्वसुरसुराणां [2] ' तमेवैतत्पूर्वं सादयत्यरिष्टं [3] यज्ञं [4] तनुतादित्यथोपविश्य [5] जपति बृहस्पतिर्ब्रह्मेति ' बृहस्पतिर्वा आङ्गिरसो देवानां ब्रह्मा ' तस्मिन्नेवैतदनुज्ञामिच्छति ' प्रणीतासु प्रणीयमानासु वाचं यच्छत्या हविष्कृत उद्वादनादेतद्वै यज्ञस्य द्वारं ' तदेतदशून्यं [6] करोतीष्टे च स्विष्टकृत्यानुयाजानां [7] प्रसवादित्येतद्वै [8] यज्ञस्य द्वितीयं द्वारं ' तदेवैतदशून्यं करोति ' यत्परिधयः परिधीयन्ते [9] यज्ञस्य गोपीथाय ' परिधीन्परिधत्ते यज्ञस्य सात्मत्वाय ' परिधीन्त्संमार्ष्टि [10] ' पुनात्येवैनांस्त्रिर्मध्यमं [11] ' त्रय इमे प्राणाः ' प्राणानेवाभिजयति ' त्रिर्दक्षिणार्ध्यं [12] ' त्रयो वै लोका [13] ' लोकानेवाभिजयति ' त्रिरुत्तरार्ध्यं [14] ' त्रयो वै देवलोका ' देवलोकानेवाभिजयति [15] ' त्रिरुपवा-

---

1) °सुर्व D; 2) यज्ञन्वसु° D; 3) सादयेत्य° A pr. m.; 4) यज्ञ E; 5) तनूनाद्मित्यथोपविश E; 6) तद्वै एतद° D; 7) स्विष्टकृत्य° D; 8) °दित्येतद्ध वै E; 9) परीधीयन्ते D; 10) परिधीत्सं° B und A sec. m.; 11) पुनात्येवैनांस्त्रि° F; 12) त्रिर्दक्षिणार्द्धं B, D, E und F; 13) लोका fehlt in E; 14) °त्तरार्द्धं B, D und F; त्रिरन्तरार्द्धं E; 15) °जयेति A; °जनयति D; °जयन्ति F.

नयति[1] ' त्रयो वै देवयानाः पन्थानस्तानेवाभिनयति ' ते वै द्वादश भवन्ति ' द्वादश ह वै मासाः संवत्सरः ' संवत्सरमेव तेन प्रीणात्यथो संवत्सरमेवास्मा[2] उपदधाति स्वर्गस्य लोकस्य समष्ट्यै[3] ' ॥ १ ॥

प्रजापतिर्वै रुद्रं[4] यज्ञान्निरभजत्सो[5] ऽकामयत ' मेयमस्मा आकूतिः समर्धि[6] यो मा यज्ञान्निरभाक्षीदिति ' स यज्ञमभ्यायम्याविध्यत्तदाविद्धं[7] निरकृन्तत्तत्प्राशित्रमभवत्तदुदयच्छत्तद्भगाय[8] पर्यहरंस्तत्प्रत्यैक्षत[9] ' तस्य चक्षुः परापतत्तस्मादाहुरन्धो वै भग इत्यपि ह[10] तं[10] नेच्छेद्यमिच्छति[10] ' तत्सवित्रे पर्यहरंस्तत्प्रत्यगृह्णात्तस्य[11] पाणी प्रचिच्छेद[12] ' तस्मै हिरण्मयौ प्रत्यदधुस्तस्माद्धिरण्यपाणिरिति[13] स्तुतस्तत्पूष्णे[14] पर्यहरंस्तत्प्राश्नात्तस्य दन्ताः परोप्यन्त ' तस्मादाहुरदन्तकः पूषा पिष्टभाजन इति ' तदिध्मायाङ्गिरसाय[15] पर्यहरंस्तत्प्राश्नात्तस्य शिरो व्यपतत्तं[16]

---

1) °जयन्ति F; 2) °वास्मान् F; 3) समष्टे D; 4) रुद्र D; 5) °भजात्सो A pr. m.; 6) So corr.; A समृध्यियों; die andere hss. समृद्धियों; 7) °विध्यं तदाविद्धं E; °विध्यतदाविद्धं F; °विध्यं D; 8) °च्छतद्भगाय D und F; 9) So corr.; °त्प्रतीक्षत A, B; °त्प्रतीक्षयत D; °त्प्रतीक्षत E; °त्प्रतीक्षित F; 10) हन्तेच्छेयमिच्छति A; ह तं ते इच्छति B; 11) So B. Ind.; die hss. °त्प्रतिगृह्णात्तस्य; 12) So corr.; प्रतिच्छेद die hss.; 13) प्रत्यदधीस्त° D, प्रत्यदधस्त° F; 14) स्तुतस्ते पूष्णो B; 15) °तदिध्मं वाङ्गिरसाय B; °व आङ्गिरसाय E; 16) व्यपततं A.

यज्ञ एवाकल्पयत्तं[1] एष इध्मः । समिधो ह पुरातनस्तं-बर्हेय आङ्गिरसाय पर्यहरंस्तत्प्राश्नात्तस्याङ्गा[2] पर्वाणि व्यस्रंसन्त[3] । तं यज्ञ एवाकल्पयत्तदेतद्बर्हिः । प्रस्तरो ह पुरातनस्तं बृहस्पतय आङ्गिरसाय पर्यहरंस्सोऽबिभेद्बृहस्पतिरित्थं वाव[4] स्य[4] आर्तिमारिष्यतीति[4] । स एतं मन्त्रमपश्यत्सूर्यस्य त्वा चक्षुषा प्रतीक्षे[5] इत्यब्रवीन्न हि सूर्यस्य[6] चक्षुः किं चन हिनस्ति । सोऽबिभेत्प्रतिगृह्णन्तं मा हिंसिष्यतीति । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा प्रतिगृह्णामीत्यब्रवीत्सवितृप्रसूत एवैनं तद्देवताभिः प्रत्यगृह्णात्तं गृह्य[7] तृणानि प्राग्दण्डं स्थण्डिले निदधाति पृथिव्यास्त्वा नाभौ सादयामीति । पृथिवी वा[8] अन्नानां[9] ,शमयित्री[10] । तयैवैनच्छमयां चकार । सोऽबिभेत्प्राश्नन्तं मा हिंसिष्यतीत्यग्नेष्ट्वास्येन प्राश्नामीत्यब्रवीन्न ह्यग्नेरास्यं किं चन हिनस्ति । सोऽबिभेत्प्राशितं मा हिंसिष्यतीतीन्द्रस्य[11] त्वा जठरे सादयामीत्यब्रवीन्न हीन्द्रस्य जठरं किं चन हिनस्ति ।

---

1) °ल्पयात्त A pr. m.; 2) ?; 3) So corr.; die hss. व्यस्रं°; 4) So corr. nach T. S. II 6. 8. 5. वामार्त्ति° A, B, D, F; वावार्त्ति° E; 5) प्रतिक्ष A und B; 6) सूर्य D; 7) प्रतिगृ° A, B und F; 8) वां A pr. m. B, C und E; 9) नां B; न्नानां E; 10) शमयत्री E; 11) °तितीन्द्रस्य A pr. m. und E.

वरुणस्योदर इति न हि वरुणस्योदरं किं चन हिनस्तीति । ॥ २ ॥

अथो आङ्गुर्ब्राह्मणस्योदर इत्यात्मास्यात्मन्नात्मानं[1] मे[2] मा हिंसीः स्वाहेत्यन्नं वै सर्वेषां भूतानामात्मा । तेनैवैनच्छमयां चकार । प्राशितमनुमन्त्रयते[3] यो ऽग्निर्नृमणा नाम ब्राह्मणेषु प्रविष्टः । तस्मिन्म एतत्सुकृतमस्तु प्राशित्रं तन्मा मा[4] हिंसीत्परमे व्योमन्निति । तत्सर्वेण ब्रह्मणा प्राश्नात्तत एनं नाहिनत्तस्माद्यो[5] ब्रह्मिष्ठः स्यात्तं ब्रह्माणं कुर्वीत[6] । बृहस्पतिर्वै सर्वं ब्रह्म[7] । सर्वेण[8] ह वा एतद्ब्रह्मणा यज्ञं दक्षिणत उद्यच्छते । ऽप वा[9] एतस्मात्प्राणाः[10] क्रामन्ति य आविद्धं[11] प्राश्नात्यद्भिर्मार्जयित्वा प्राणान्त्संस्पृशते वाङ्म आस्यन्नित्यमृतं वै प्राणा । अमृतमापः । प्राणानेव यथास्थानमुपाह्वयते[12] । तद्ध हैक आङ्गुरिन्द्राय पर्यहरन्निति[13] । ते देवा अब्रुवन्निन्द्रो[14] वै देवानामोजिष्ठो बलिष्ठस्तस्मा[15] एनत्परिहरतेति[16] । तत्तस्मै[17] पर्यहरंस्तत्स[18] ब्रह्मणा शमयां चकार । तस्मादा-

---

1) इत्यात्मास्यात्मनात्मान B; °त्मान D; 2) Fehlt in F; 3) प्राशित्रम° B; 4) मां A; 5) °स्माद्यौ A pr. m.; 6) कुर्वित D; 7) ब्रह्मा E; ब्रह्मणा D; 8) Fehlt in D; 9) एवा F; 10) एतस्मात्प्राणा: A; 11) अविद्धं F; 12) यथास्थानुनगुपा° E; 13) °हरन्नीति A; 14) °न्निन्द्रो E; 15) बलि? F; 16) So corr.; die hss. °हरन्तीति; 17) तं तस्मै E; 18) °रंस्तच्छद् A pr. m.; °रंस्तत्सद् A sec. m. und F.

हुरिन्द्रो ब्रह्मेति ' यवमात्रं भवति ' यवमात्रं वै विषस्य [1] न हिनस्ति ' यदधस्तादभिघारयति [2] तस्मादधस्तात्प्रहरणं प्रजा अरुर्न हिनस्ति ' यदुपरिष्टादभिघारयति तस्मादुपरिष्टात्प्रहरणं [3] प्रजा अरुर्न हिनस्ति ' यदुभयतो ऽभिघारयत्युभयतो [4] ऽभिघारि [5] प्रजा अरुर्घातुकं [6] स्याद्यत्समयाभिहरेदनभिविद्धं [7] यज्ञस्याभिविध्येत् [8] ' ॥ ३ ॥

अग्रेण परिहरति ' तीर्थेनैव परिहरति ' वि वा एतद्यज्ञश्छिद्यते यत्प्राशित्रं परिहरति ' यदाह ब्रह्मन्प्रस्थास्यामीति बृहस्पतिर्वै सर्वं ब्रह्म [9] ' सर्वेण ह वा एतद्ब्रह्मणा यज्ञं दक्षिणतः संदधात्यथो अत्र वा एतर्हि यज्ञः श्रितो यत्र ब्रह्मा तत्रैव यज्ञः श्रितस्तत एवैनमालभते ' यद्धस्तेन प्रमीवेद्वेपनः [10] स्याद्यच्छीर्ष्णा शीर्षक्तिमान्त्स्याद्यत्तूष्णीमासीतासंप्रत्तो [11] यज्ञः स्यात्प्रतिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो ' यत्र ब्रह्मा यत्रैव [12] यज्ञः श्रितस्तत एवैनं संप्रयच्छत्यग्नीध [13] आदधात्यग्निमुखानेवर्तून्प्रीणात्यथोत्त-

---

1) Sic!; 2) °भिधारयति E; 3) °ष्टात्प्रत्यत्तरणं A pr. m. und F; 4) Fehlt in F; 5) ??; 6) अरुघा° A und F; अरुघातुक B; 7) °नुभिविद्धं D; 8) So corr.; die hss. °विद्धेत्; 9) ब्रह्मा E; 10) प्रमीयेद्वे° die hss.; 11) So corr.; die hss. °सीदासंप्रत्तो; D °सीदासंप्रतो; 12) So corr.; die hss. तत्रैव; 13) So corr.; °त्याग्नीध्र A, B, E und F; °त्यग्नीध्र D.

रासामाहुतीनां[1] प्रतिष्ठित्या' अथो समिद्वत्यव जुहोति' परिधीन्त्संमार्ष्टि' पुनात्यैवैनान्त्सकृत्सकृत्संमार्ष्टि' पराङिव ह्येतर्हि यज्ञश्चतुः संपद्यते' ऽथो चतुष्पादः पशवः' पशूनामाप्त्यै' देव सवितरेतत्ते प्राहेत्याह प्रसूत्यै' बृहस्पतिर्ब्रह्मेत्याह' स हि ब्रह्मिष्ठः' स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि स मां कर्मण्यं[2] पाहीत्याह' यज्ञाय च यजमानाय च पशूनामाप्त्यै' ॥ ४ ॥

न वै पौर्णमास्यां नामावास्यायां[3] दक्षिणा दीयन्ते' य एष ओदनः पच्यते दक्षिणैषा दीयते यज्ञस्यर्द्ध्या[4]' इष्टी वा एतेन यज्जते ऽथो वा एतेन पूर्ती य एष ओदनः पच्यत' एष ह वा इष्टापूर्ती[5] य एनं पचति' ॥ ५ ॥

द्वया[6] वै देवा यजमानस्य गृहमागच्छन्ति सोमपा अन्ये ऽसोमपा अन्ये' हुतादो ऽन्ये ऽहुतादो ऽन्य' एते वै देवा अहुतादो यद्ब्राह्मणा' एतद्देवत्य एष यः पुरानीजान' एते ह वा एतस्य प्रजायाः पशूनामीशते' ते ऽस्याप्रीता[7] इषमूर्जमादायापक्रामन्ति' यदन्वाहार्यमन्वा-

---

1) °ग्निमत्र इचर्तू° B; 2) Fehlt in D; 3) नामावस्यायां D; 4) यज्ञस्याहुत्या A sec. m. und F; 5) इष्टपूर्त्ती D; 6) द्वयो A; 7) ऽस्याः प्रीता E.

हरति तानेव तेन प्रीणाति 'दक्षिणतः सव्यः[1] परिहर्त्वा आह[2] 'दक्षिणावतैव[3] यज्ञेन यजत 'आहुतिभिरेव देवा-न्हुतादः प्रीणाति दक्षिणाभिर्मनुष्यदेवांस्ते ऽस्मै प्रीता इषमूर्जं नियच्छन्ति' ॥ ६ ॥

देवाश्च ह वा असुराश्चास्पर्धन्त[4] 'ते देवाः प्रजापति-मेवाभ्ययजन्तान्यो[5] ऽन्यस्यासन्नसुरा अनुद्धवुस्ते देवा एत-मोदनमपश्यंस्तं प्रजापतये भागमनुनिरवपंस्तं[6] भागं प-श्यन्प्रजापतिर्देवानुपावर्तत 'ततो देवा अभवन्परासुराः 'स य[7] एवं विद्वानेतमोदनं पचति भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवति 'प्रजापतिर्वै देवेभ्यो भागधेयानि व्यक-ल्पयत्सो[8] ऽमन्यतात्मानमन्तरगामिति[9] 'स एतमोदनम-भक्तमपश्यत्तमात्मने[10] भागं निरवपत्प्रजापतेर्वा एष भा-गो 'ऽपरिमितः स्यादपरिमितो हि प्रजापतिः 'प्रजापते-र्भागो ऽस्यूर्जस्वान्पयस्वानक्षितो ऽस्यक्षित्यै त्वा 'मा मे क्षेष्ठा अमुत्रामुष्मिंल्लोक इह[11] च 'प्राणापानौ मे पाहि 'समानव्यानौ[12] मे पाह्युदानरूपे मे पाह्यूर्गस्यूर्जं मे धेहि'

1) °सव्य: D; 2) आहा D; 3) So corr.; die hss. दक्षिणावृतैव; 4) असुराश्च° D; 5) प्रजापतिरेवा° A pr. m. und B; 6) °निरवैपंस्तं F; 7) Fehlt in D; 8) So corr.; die hss. त्सोमं; 9) So corr.; ऽमन्यत आत्मा° A sec. m.; B, D, E, F; alle hss. °न्तरगादिति; 10) अभक्तम् fehlt in D; 11) उह A; 12) समानौ A.

कुर्वतो मे मा क्षेष्ठा' ददतो मे मोपदसः[1] 'प्रजापतिमहं त्वया समक्षमृध्यासमिति[2] 'प्रजापतिमेव समक्षमृध्नोति[2] य एवं वेद य एवं वेद' ॥ ७ ॥

ये वा इह यज्ञैरार्ध्नुवंस्तेषामेतानि ज्योतींषि यान्यमूनि नक्षत्राणि' तन्नक्षत्राणां नक्षत्रत्वं यन्न क्षीयन्ति[3] 'दर्शपूर्णमासौ वै यज्ञस्यावसानदर्शौ' ये वा अनिष्ट्वा दर्शपूर्णमासाभ्यां सोमेन यजन्ते[4] तेषामेतानि ज्योतींषि[5] यान्यमूनि नक्षत्राणि पतन्तीव' तद्यथा ह वा इदमस्पष्टावसाने[6] नेहावसास्यसि[7] नेहावसास्यसीति नोनुद्यन्त एवं हैवैते[8] ऽमुष्माँल्लोकान्नोनुद्यन्ते' त एते[9] प्रच्यवन्ते[10]' ॥ ८ ॥

यस्य[11] हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्त्रेधा तण्डुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे ऽष्टाकपालं निर्वपेद्ये[12] स्थविष्ठास्तानिन्द्राय प्रदात्रे दधनि[13] चरुं' ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय[14] शृते चरुं' पशवो वा एते ऽतिरिच्यन्ते' तानेवाप्नोति' तानवरुन्द्धे' ऽग्निर्वै

1) मोपदस: B; 2) समृक्ष° A, B, E und F; 3) So corr.; die hss. चियन्ति; 4) यजते A pr. m.; 5) ज्योतीषि D; 6) So corr.; इदमस्पष्टा° A, E und F; इदमस्याष्टा° B und D; 7) °स्यसी A, B und F; 8) ते D; 9) एनते D; 10) प्रच्यवते F; 11) यस्या D; 12) निर्वापेये B; 13) दधति F; 14) शिपिविष्टाय D.

मध्यमस्य दातेन्द्रो वै ज्येष्ठस्य प्रदाता' यदेवेदं[1] क्षुद्रं प-
शूनां तद्विष्णोः शिपिविष्टं' तदेवाप्नोति' पशूनेवावरुन्द्धे'
॥ ९ ॥

या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका' या
पूर्वामावास्या सा सिनीवाली[2] योत्तरा सा कुहूश्चन्द्रमा[3]
एव धाता च[4] विधाता च' यत्पूर्णा ऽन्यां वसत्यपूर्णा[5]
ऽन्यां[6] तन्मिथुनं' यत्पश्यत्यन्यां नान्यां तन्मिथुनं' यदमा-
वास्यायाश्चन्द्रमा अधि प्रजायते तन्मिथुनं' तस्मादेवास्मै
मिथुनात्पशून्प्रजनयति' ॥ १० ॥

न द्वे यजेत' यत्पूर्वया संप्रति यजेतोत्तरया छम्बट्कुर्या-
द्यदुत्तरया[7] संप्रति यजेत पूर्वया छम्बट्कुर्यान्नेष्टिर्भवति न
यज्ञस्तदनु ह्रीतमुख्यपगल्भो[8] जायत' एकामेव यजेत'
प्रगल्भो हैव जायते' ऽनादृत्य[9] तद्धु यजेत' यज्ञमुखमेव
पूर्वयालभते यजत उत्तरया' देवता एवं पूर्वयाप्नोतीन्द्रि-
यमुत्तर्या' देवलोकमेव पूर्वयावरुन्द्धे मनुष्यलोकमुत्तरया
भूयसो यज्ञक्रतूनुपैत्येषा[10] ह वै सुमना[11] नामेष्टिर्यमद्ये-

1) यद्देवेन्द्रं A; 2) शिनीवली D; 3) कुहः चन्द्रमा B; 4) Fehlt in D; 5) वर्स पूर्णो A; वसत्पूर्णो B, D und E; 6) ऽन्या F; 7) So corr.; die hss. छंवसट्कु°; 8) °मुख्यमुपगल्भो A; °मुख्यनपगल्भो B und E; ह्रातमुखमयगल्पो D; 9) So corr. ऽनादृत्यं A und E; ऽनादृत्यं B, D und F; 10) So corr.; die hss. यज्ञक्रतूनानुपे°; 11) सुम्ना E.

ज्ञानं[1] पश्चाच्चन्द्रमा अभ्युदियादस्मा[2] अस्मिंल्लोक[3] आर्धुकं भवति ' ॥ ११ ॥

आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारिप्समाणो[4] ' ऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो ' देवताश्चैव यज्ञं चारभत ऋद्ध्या ' ऋध्नोत्येवोभौ[5] सहारम्भावित्याहुरंहिनु[6] शृङ्गे सितो[7] मुच्यत इति ' दर्शो वा एतयोः पूर्वः पौर्णमास उत्तरो ' ऽथ यत्परस्तात्पौर्णमास आरभ्यते तद्यथा पूर्वं क्रियते ' तद्यत्पौर्णमासमारभमाणः[8] सरस्वत्यै चरुं निर्वपेत्सरस्वते द्वादशकपालममावास्या वै[9] सरस्वती पौर्णमासः सरस्वानित्युभावेवैनौ[10] सहारभत ऋद्ध्या ' ऋध्नोत्येव ' ॥ १२ ॥

अग्नये पथिकृते ऽष्टाकपालं निर्वपेद्यस्य[11] प्रज्ञातेष्टिरतिपद्यते[12] ' बहिष्पथं वा एष एति यस्य प्रज्ञातेष्टिरतिपद्यते[13] ' ऽग्निर्वै देवानां पथिकृत्तमेव[14] भागधेयेनोपासरत्स एनं पन्थानमपिनयत्यनड्वान्दक्षिणा[15] ' स हि पन्थानमभिवहति ' ॥ १३ ॥

---

1) So corr.; die hss. °मध्येयानं; ed. B. I. °मध्येयाने; 2) अभ्युदीया° A; 3) °लोकं F; 4) °माणा B; 5) °वाभौ D; 6) °हदिनु A, B, D und F; °हदिरं E; 7) सृतो A pr. m.; श्रितो D; 8) °समा आरभ° A sec. m.; 9) वर्णा F; 10) सरस्वत्यु° A pr. m.; सरस्वानित्या° A sec. m.; 11) °यस्मा E; 12) So corr.; die hss. प्रज्ञातेष्टिरितिप°; 13) Vgl. 12; 14) पथिकृतमेव A und F; 15) पन्थानपि° A pr. m., B und E.

अग्नये व्रतपतये[1] ऽष्टाकपालं निर्वपेद्य आहिताग्निः सन्प्रवसेदह्नो वा एष व्रतमतिपातयति य आहिताग्निः सन्प्रवसति व्रत्ये[2] ऽहनि स्त्रियं वोपैति मांसं वाश्नात्यग्निर्वै[3] देवानां व्रतपतिरग्निमेतस्य व्रतमगात्तस्मादेतस्य व्रतमालम्भयते ॥ १४ ॥

अग्नये व्रतभृते[4] ऽष्टाकपालं निर्वपेद्य आहिताग्निरार्तिजमश्रु[5] कुर्यादानीतो वा एष देवानां य आहिताग्निस्तस्मादेतेनाश्रु न कर्तव्यं न हि देवा अश्रु कुर्वन्त्यग्निर्वै देवानां व्रतभृदग्निमेतस्य व्रतमगात्तस्मादेतस्य व्रतमालम्भयते ॥ १५ ॥

ऐन्द्राग्नमुस्रमनुसृष्टमालभेत[6] यस्य पिता पितामहः सोमं न पिबेदिन्द्रियेण वा एष वीर्येण व्यृध्यते[7] यस्य पिता पितामहः सोमं न पिबति यदैन्द्र[8] इन्द्रियेणैवैनं तद्वीर्येण समर्धयति देवताभिर्वा एष वीर्येण[9] व्यृध्यते[7] यस्य पिता[10] पितामहः सोमं न पिबति यदाग्नेयो ऽग्निर्वै सर्वा देवताः सर्वाभिरेवैनं तद्देवताभिः समर्धयत्यनुसृष्टो भवत्यनुसृष्ट इव ह्येतस्य सोमपीथो यस्य पिता पितामहः

---

1) Fehlt in E; 2) प्रत्ये A; व्रते E; 3) वाग्नात्य° F; 4) व्रते E; 5) °र्त्विजमश्रु A, B, E und F; 6) So corr.; die hss. °मुत्लन°; 7) So corr.; die hss. विवृध्यते; 8) A, B, E und F fügen इन्द्र ein; 9) वीर्यपा A; 10) Fehlt in F.

सोमं न पिबति' तस्मादेष एव तस्या देवतायाः पशूनां समृद्धः' ॥ १६ ॥

देवा वा ओषधीषु पक्वास्वाजिमयुः[1] ' स[2] इन्द्रो ऽवेदग्निर्वाविमाः[3] प्रथम उज्जेष्यतीति' सो ऽब्रवीद्यतरो[4] नौ पूर्व उज्जयात्तन्नौ सहेति' ता[5] अग्निरुदजयत्तांदिन्द्रो ऽनूदजयत्स[6] एष ऐन्द्राग्नः सन्नाग्नेन्द्र[7] ' एका वै तर्हि यवस्य शुष्टिरासीदेका[8] व्रीहेरेका[9] माषस्यैका[10] तिलस्य[11] ' तद्विश्वे देवा अब्रुवन्वयं वा एतत्प्रथयिष्यामो भागो नोऽस्त्विति' तद्भूम एव वैश्वदेवो' ऽथो प्रथयत्येतेनैव' पयसि स्याद्विश्वदेवत्याय' वैश्वदेवं हि पयो[12] ' ऽथेमावब्रूतां[13] न वा ऋत आवाभ्यामेवैतद्यूयं प्रथयत मयि प्रतिष्ठितमसौ वृष्ट्या पचति नैतदितो[14] ऽभ्युज्जेष्यतीति 'भागो नावस्त्विति' ताभ्यां वा एष भागः क्रियत उज्जित्या एवाथो प्रतिष्ठित्या एव यो[15] द्यावापृथिवीयः' सौमीर्वा ओषधीः' सोम ओषधीनामधिराजो' याश्च ग्राम्या याश्चा-

1) °स्वजिमयुः A, B, E und F; °स्वाजिपुः D; 2) सं D; 3) So corr.; die hss. ऽवेदाग्नि°; 4) °यतरा B; 5) ना B; 6) ऽनोदज° A pr. m.; ऽनुद° B; 7) °ग्नेन्द्रा E; 8) शुष्टि° D und F; 9) व्रहेरेका A und B; 10) माकस्यैका D; 11) तिलस्या A und B; 12) प A; 13) So corr.; die hss. ऽथेने अब्रूतां; 14) नैतदिता D; 15) So corr.; die hss. य; ed. B. Ind. ये.

रएवास्तासामेव ऽद्धारो यच्छ्यामाको[1]' यच्छ्यामाकः सौम्यस्तमेव भागिनं कृणुते' यदकृत्वाग्रयणं नवस्याश्नीयाद्देवानां भागं प्रतिकॢप्तमद्यात्संवत्सराद्वा एतदधिप्रजायते यदाग्रयणं' संवत्सरं वै ब्रह्मा' तस्माद्ब्रह्मा[2] पुरस्ताद्धोमसंस्थितहोमेष्वावपेतैकहायनी दक्षिणा' स हि संवत्सरस्य प्रतिमा' रेत एव ह्येषो ऽप्रजातः[3]' प्रजात्यै' ॥ १७ ॥

अथ हैतदप्रतिरथमिन्द्रस्य बाहू स्थविरौ वृषाणावित्येतेन ह वा इन्द्रो ऽसुरानप्रत्यजयदप्रति ह भवत्येतेन[4]) यजमानो भ्रातृव्यं जयति' संग्रामे जुहुयादप्रति ह भवत्येतेन[5] ह[6] वै भरद्वाजः प्रतर्दनं समनह्यत्स राष्ट्र्यभवद्यं[7] कामयेत राष्ट्री स्यादिति तमेतेन संनह्येद्राष्ट्री ह भवत्येतेन ह वा इन्द्रो विराजमभ्यजयद्दशैवान्वाह[8]' दशाक्षरा विराड्वैराजं वा एतेन यजमानो भ्रातृव्यं वृङ्क्ते' तदु हैक एकादशान्वाहुरेकादशाक्षरा[9] वै त्रिष्टुप्त्रैष्टुभो वज्रो' वज्रेणैवैतद्रक्षांस्यपसेधति[10]' दक्षिणतो वै देवानां यज्ञं रक्षांस्यजिघांसंस्तान्यप्रतिरथेनापाघ्नत[11]' तस्माद्ब्रह्मा-

---

1) यच्छ्यामाको A pr. m., B, D und E; 2) Fehlt in E; 3) प्रजात्यः A pr. m.; 4) भवति interpolation; 5) भवति ? ?; 6) Fehlt in A sec. m., B und E; 7) तं ??; 8) So corr.; die hss. °शैतान्वाह; 9) एकादशान्वाहुर् fehlt in E; एकादशाद्दाहु° D; 10) °सेदति E; 11) °पाघ्न F.

प्रतिरथं जपन्नेति ' यद्ब्रह्माप्रतिरथं[1] जपन्नेति[1] यज्ञस्याभिजित्यै रक्षसामपहत्यै रक्षसामपहत्यै ' ॥ १८ ॥

अथातश्चातुर्मास्यानां[2] प्रयोगः ' फाल्गुन्यां पौर्णमास्यां चातुर्मास्यानि प्रयुञ्जीत ' मुखं वा एतत्संवत्सरस्य यत्फाल्गुनी पौर्णमासी मुखमुत्तरे फाल्गुन्यौ[3] पुच्छं पूर्वे ' तद्यथा[4] प्रवृत्तस्यान्तौ समेतौ स्यातामेवमेवैतत्संवत्सरस्यान्तौ समेतौ भवतस्तद्यत्फाल्गुन्यां[5] पौर्णमास्यां चातुर्मास्यैर्यजते मुखत एवैतत्संवत्सरं प्रयुङ्क्ते ' ऽथो[6] भैषज्ययज्ञा[7] वा एते यच्चातुर्मास्यानि[8] ' तस्मादृतुसंधिषु प्रयुज्यन्त ' ऋतुसंधिषु[9] वै व्याधिर्जायते ' तान्येतान्यष्टौ हवींषि भवन्त्यष्टौ वै चतसृणां पौर्णमासीनां हवींषि[10] भवन्ति ' चतसृणां वै पौर्णमासीनां वैश्वदेवं समासो[11] ' ऽथ यदग्निं मन्थन्ति प्रजापतिर्वै वैश्वदेवं ' प्रजात्या[12] एवाथैतं देवं गर्भं प्रजनयत्यथ यत्सप्तदश सामिधेन्यः सप्तदशो वै प्रजापतिः ' प्रजापतेराप्त्या ' अथ यत्सद्वन्तावाज्यभागावसिसंतीति[13] वै सद्वन्तौ भवतो ' ऽथ यद्विराजौ संयाज्ये अन्नं वै श्रीर्विराडन्नाद्यस्य श्रियो ऽवरुद्ध्या ' ऽथ यन्नव प्रयाजा[14]

1) Fehlt in E; 2) Zweimal in A, B, E und F; 3) फल्गुन्यो A sec. m. und B; 4) Fehlt in D; 5) °ल्गुन्या B; 6) ज्ञो E; 7) भेषज्य° F; 8) °र्मास्यनि B; 9) कृतु° B; 10) हवींषो E; 11) समसो A pr. m.; 12) प्रजपत्या A pr. m. und B; 13) Sic! 14) प्रयाज D.

नवानुयाजा अष्टौ हवींषि वाजिनं नवमं तन्नक्षत्रीयां[1] विराजमाप्नोत्यथो आहुर्दशनीं विराजमिति प्रयाजानुयाजा हवींष्याघारावाज्यभागाविति[2] ' ॥ १९ ॥

अथ यदग्नीषोमौ[3] प्रथमं देवतानां यजत्यग्नीषोमौ वै देवानां मुखं ' मुखत एव तद्देवान्प्रीणात्यथ यत्सवितारं यजत्यसौ वै सविता यो ऽसौ तपत्येतमेव तेन प्रीणात्यथ यत्सरस्वतीं यजति वाग्वै सरस्वती ' वाचमेतेन प्रीणात्यथ यत्पूषणं यजत्यसौ वै पूषा यो ऽसौ तपत्येतमेव तेन प्रीणात्यथ यन्मरुतः स्वतवसो[4] यजति घोरा वै मरुतः स्वतवसस्तानेव तेन प्रीणात्यथ यद्विश्वान्देवान्यजत्येते वै विश्वे देवा ' यत्सर्वे देवास्तानेव तेन प्रीणात्यथ यद्द्यावापृथिव्यौ यजति प्रतिष्ठे वै द्यावापृथिव्यौ ' प्रतिष्ठित्या एवाथ यद्वाजिनो यजति पशवो वै वाजिनः ' पशूनेव तेन प्रीणात्यथो ऋतवो वै वाजिन ' ऋतूनेव तेन प्रीणात्यथो छन्दांसि वै वाजिनश्छन्दांस्येव तेन प्रीणात्यथो देवाश्वा वै वाजिनो ' ऽत्र देवाः साश्वा अभीष्टाः प्रीता[5] भवन्त्यथ यत्परस्तात्पौर्णमासेन यजते तथा हास्य पूर्वपक्षे वैश्वदेवेनेष्टं भवति ' ॥ २० ॥

---

1) So corr.; तन्नाक्षत्रीयां A, D, E und F; तन्नाक्षत्रीयां B; 2) हवींष्यां द्वारा° D; हवींष्याधारा° E; 3) यदग्नि° A pr. m.; 4) स्वंतोवसो A pr. m.; स्वन्तवसो A sec. m.; स्वतोवसो F; 5) प्रीत्या D.

वैश्वदेवेन वै प्रजापतिः प्रजा असृजत । ताः सृष्टा[1] अप्रसूता वरुणस्य[2] यवाञ्जक्षुस्तां[3] वरुणो वरुणपाशैः प्रत्यबध्नात्ताः प्रजाः[4] प्रजापतिं पितरमेत्योपावदन्नुप[5] तं यज्ञक्रतुं जानीहि येनेष्ट्वा वरुणमप्रीणात्सं[6] प्रीतो[6] वरुणो[6] । वरुणपाशेभ्यः[7] सर्वस्माच्च[8] पाप्मनः[9] संप्रमुच्यन्त[10] इति । तत एतं प्रजापतिर्यज्ञक्रतुमपश्यद्वरुणप्रघासांस्तमाहरत्तेनायजत[11] । तेनेष्ट्वा वरुणमप्रीणात्सं प्रीतो वरुणो वरुणपाशेभ्यः सर्वस्माच्च[12] पाप्मनः प्रजाः प्रामुञ्चत्प्र ह[13] वा एतस्य प्रजा वरुणपाशेभ्यः सर्वस्माच्च पाप्मनो मुच्यन्ते[14] । य एवं वेदाथ यदग्निं प्रणयन्ति यमेवामुं वैश्वदेवे मन्थन्ति[15] तमेव तत्प्रणयन्ति[16] । यन्मथ्यते तस्योक्तं ब्राह्मणमथ यत्सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ विराजौ संयाज्ये तेषामुक्तं ब्राह्मणमथ यन्नव प्रयाजा नवानुयाजा नवैतानि हवींषि । समानानि त्वेव पञ्च संचराणि[17] हवींषि भवन्ति[18] पौष्णान्तानि । तेषामुक्तं ब्राह्मणम् ॥ २१ ॥

---

1) सृष्ट्वा D; 2) वरुणस्यां B; 3) यवां चजुस्ता A, D, E, F; यवां चतजुस्ता B; 4) Fehlt in B; 5) पितरमेत्या° D; 6) Interpolation!; 7) वरुण fehlt in D; 8) So corr.; die hss. सर्वस्मात्; 9) पाप्मान: A pr. m.; 10) Von संप्र° bis प्रजा: fehlt in B; 11) So corr.; die hss. प्रजापतिं यज्ञक्रतुमपश्यद्वरुणप्रघासं तमा°; 12) सर्वस्मात् E; 13) Fehlt in D; 14) मुच्यते B; मुच्यते E; 15) मथति E; 16) तत्प्रयन्ति D; 17) संचतराणि B; 18) भवति E.

अथ यदैन्द्राग्नो[1] द्वादशकपालो[2] भवति बलं वै तेज इन्द्राग्नी ' बलमेव तत्तेजसि प्रतिष्ठापयत्यथ[3] यद्वारुण्यामिक्षेन्द्रो वै वरुणः ' स उ वै पयोभाजनस्तस्माद्वारुण्यमिक्षाथ[4] यन्मारुती पयस्याप्सु वै मरुतः श्रित ' आपो हि पयो[5] ' ऽथैन्द्रस्य[6] वै मरुतः[7] श्रित[8] ऐन्द्रं पयस्तस्मान्मारुती पयस्याथ यत्काय एककपालः प्रजापतिर्वै कः ' प्रजापतेराप्त्या ' अथो सुखस्य वा एतन्नामधेयं कमिति ' सुखमेव तदध्यात्मन्धत्ते ' ऽथ यन्मिथुनौ गावौ ददाति[9] तत्प्रजात्यै रूपमुक्ष्णा[10] वाजिनो ' ऽथ यदप्सु वरुणं[11] यजति[12] स्व एवैनं तदायतने प्रीणात्यथ[13] यत्पुरस्तात्पौर्णमासेन यजते तथा ह्यस्य पूर्वपक्षे वरुणप्रघासैरिष्टं भवति ' ॥ २२ ॥

ऐन्द्रो वा एष यज्ञक्रतुर्यत्साकमेधास्तंयथा[14] महाराजः पुरस्तात्सेनानीकानि[15] व्युह्याभयं पन्थानमन्वियादेवमेवैतत्पुरस्ताद्देवता यजति[16] ' तद्यथैवादः सोमस्य महाव्रतमेवमेवैतदिष्टिमहाव्रतमथ यदग्निमनीकवन्तं प्रथमं दे-

---

1) यदैन्द्रग्न्यो A sec. m.; यदैन्द्राग्नौ D, 2) °पालौ D; 3) °पयताय D; 4) पयोभाजि° D und E; 5) यचो D; 6) ऽथेन्द्रस्या A; 7) मारुत D; 8) Interpolation?; 9) दधाति A; 10) Man erwartet °नुक्षो; 11) वरुणा E; 12) जयति D; 13) प्रीणाय B; 14) °त्साकानेधा° D; 15) So corr.; die hss. पुरस्तात्सेना°; 16) So corr.; die hss. यजन्ते.

वतानां यजत्यग्निर्वै देवानां मुखं । मुखत एव तद्देवान्प्रीणात्यथ यन्मध्यंदिने मरुतः सांतपनान्यजतीन्द्रो[1] वै मरुतः[2] सांतपना[3] । ऐन्द्रं माध्यंदिनं[4] । तस्मादेतानिन्द्रेणोपसंहितान्यजत्यथ[5] यत्सायं गृहमेधीयेन चरन्ति[6] पुष्टिकर्म वै गृहमेधीयः । सायं पोषः पशूनां । तस्मात्सायं गृहमेधीयेन चरन्त्यथ यच्छ्वो[7] भूते गृहमेधीयस्य निष्काशमिश्रेण पूर्णदर्वेण[8] चरन्ति पूर्वेद्युः कर्मणैवैतत्प्रातः कर्माभिसंतन्वन्त्यथ यत्प्रातर्मरुतः[9] क्रीडिनो यजतीन्द्रो[10] वै मरुतः क्रीडिनस्तस्मादेनानिन्द्रेणोपसंहितान्यजत्यथ यदग्निं प्रणयन्ति यमेवामुं वैश्वदेवे मन्थन्ति तमेव तत्प्रणयन्ति । यन्मथ्यते तस्योक्तं ब्राह्मणमथ यत्सप्तदश सामिधेन्यः सद्वन्तावाज्यभागौ[11] विराजौ संयाज्ये तेषामुक्तं ब्राह्मणमथ यन्नव प्रयाजा नवानुयाजा अष्टौ हवींषि समानानि[12] त्वेव[13] षडुच्चराणि हवींषि भवन्त्यैन्द्राग्नान्तानि । तेषामुक्तं ब्राह्मणमथ यन्महेन्द्रमन्ततो यजत्यन्ते[14] वै श्रेष्ठी भजते । तस्मादेनमन्ततो यजत्यथ यद्विश्वकर्मणा[15]

---

1) °न्यजन्तीन्द्रो A, B und E; 2) महः E; 3) सान्तपनो F; 4) मध्यं° D; 5) तस्मादेतानिंद्रेपासहिता° D; 6) चरति E; 7) यच्छो B; 8) So corr.; पूर्णादर्व्या A sec. m. und B; पूर्ल्यादर्व्या D; पूर्णादव्यां E; पूर्णादर्व्या A pr. m. und F; 9) °र्मरुत् F; 10) यजन्तीन्द्रो D; 11) यद्वन्तावा° D; 12) सामानानि A pr. m.; 13) त्वच D; 14) यजन्त्येयन्त B; 15) यद्विश्व° D.

एककपालो ऽसौ[1] वै विश्वकर्मा यो ऽसौ तपत्येतमेव तेन प्रीणात्यथ[2] यदृषभं[3] ददात्यैन्द्रो[4] ह यज्ञक्रतुः' ॥ २३ ॥

अथ यदपराह्णे पितृयज्ञेन चरन्त्यपराह्णभाजो वै पितरस्तस्मादपराह्णे पितृयज्ञेन चरन्ति' तदाहुर्यदपरपक्षभाजो[5] वै पितरः कस्मादेनान्पूर्वपक्षे यजन्तीति 'देवा वा[6] एते पितरस्तस्मादेनान्पूर्वपक्षे[7] यजन्तीत्यथ यदेकां सामिधेनीं[8] त्रिरन्वाह सकृदु ह वै पितरस्तस्मादेकां सामिधेनीं त्रिरन्वाहाथ यद्यजमानस्यार्षेयं[9] नाह[9] नेद्यजमानं प्रवृणजानीत्यथ[10] यत्सोमं पितृमन्तं[11] पितॄन्वा सोमवतः पितॄन्बर्हिषदः[12] पितॄनग्निष्वात्तानित्यावाहयति[13] ' न[14] हैके स्वं[15] महिमानमावाहयन्ति[16] यजमानस्यैष महिमेति वदन्त[17] आवाहयेदिति त्वेव स्थितमग्नेर्ह्येष महिमा भवत्यथो[18] स्वधेत्याश्रावयत्यस्तु स्वधेति प्रत्याश्रावयति' स्वधाकारो[19] हि पितॄणामथ यत्प्रयाजा-

1) यो D; 2) प्रीणीत्यथ E; 3) यदृषभं गां A und D; यदृषभगां B; यदृषभंगा E; 4) आददात्यैन्द्रो F; 5) तदाहुर्वेदपर° D; तदाहुर्यदापक्षभाजो E; 6) या E; 7) °देवान्पूर्वपक्षे B; 8) यामिधनीं D; सामिधेनी B; 9) So corr.; die hss. °नस्यार्षे ऽन्वाह; 10) So corr.; die hss. प्रनृणा°; 11) पितृवन्तं A, B, D und F; 12) पितृन्वार्हिषदः E; 13) Hier fehlen einige Worte; 14) ना B; 15) स्वं A pr. m. und B; 16) °ह्यन्ति E; 17) वदत E; 18) भवन्त्यों A und F; भवन्त्यो E; 19) स्वधाकरो D.

नुयाजेभ्यो बर्हिष्मन्तावुद्धरति[1] प्रजा वै बर्हिर्नेत्प्रजां[2] पितृषु दधानीति 'ते वै षडुपयन्ते[3] 'षड्वा ऋतव' ऋतवः पितरः[4] 'पितृणामाप्त्यै' ॥ २४ ॥

अथ यज्जीवनवन्तावाज्यभागौ भवतो यजमानमेव तज्जीवयत्यथ[5] यदेकैकस्य[6] हविषस्तिस्रस्तिस्रो[7] याज्या भवन्ति[8] ह्वयत्येवैनान्प्रथमया 'द्वितीयया गमयति 'प्रैव[9] तृतीयया यच्छत्यथो[10] देवयज्ञमेवैतत्पितृयज्ञेन[11] व्यावर्तयत्यथो दक्षिणासंस्थो वै पितृयज्ञस्तमेवैतदुदक्संस्थं कुर्वन्त्यथ यदग्निं कव्यवाहनमन्ततो यजत्येतत्स्विष्टकृतो वै पितरस्तस्मादग्निं कव्यवाहनमन्ततो यजत्यथ यदिडामुपहूयावघ्राय[12] न प्राश्नन्ति पशवो वा इडा 'नेत्पशून्प्रवृणजानीत्यथ[13] यत्सूक्तवाके यजमानस्याशिषो[14] ऽन्वाह नेद्यजमानं प्रवृणजानीत्यथ[15] यत्पत्नीं न संयाजयन्ति[16] नेत्पत्नीं[17] प्रवृणजानीत्यथ[18] यत्पवित्रवति[19] मार्जयन्ते

---

1) °न्तावुरत्तिं E; 2) °त्प्रजा E; 3) षडु fehlt in D; 4) Fehlt in D; 5) So corr.; °त्रयते ऽत्र A und F; °त्रयतो ऽत्र B, D und E; 6) यादाकैकस्य D; 7) तिस्रो fehlt in B; 8) भवन्ति D; 9) त्रैव A; 10) गच्छ° A; 11) So corr.; die hss. एवैतं; 12) यदिडां हप° D; यदिडानुपहणाया° B; °नुपहृया° D; °नुपहृया° E; 13) So corr.; die hss. °प्रवृणाजानी°; 14) °स्यार्ये B; 15) So corr.; die hss. प्रवृणा°; 16) °जयन्तेति F; 17) नेत् fehlt in F; 18) So corr.; die hss. प्रवृणा°; 19) °त्रवती A pr. m.

शान्तिर्वै भेषजमापः[1] ' शान्तिरेवैषा[2] भेषजमन्ततो यज्ञे क्रियते ' ऽथ यदध्वर्युः पितृभ्यो निपृणाति जीवानेव तत्पितॄननु[3] मनुष्याः पितरो ऽनुप्रवद्धन्त्यथो देवयज्ञमेवैनं[4] पितृयज्ञेन[4] व्यावर्तयन्त्यथो दक्षिणासंस्थो वै पितृयज्ञस्तमेवैतदुदकसंस्थं[5] कुर्वन्त्यथ यत्प्राञ्चो ऽभ्युत्क्रम्यादित्यमुपतिष्ठन्ते देवलोको वा आदित्यः ' पितृलोकः पितरो ' देवलोकमेवैतत्पितृलोकादुपसंक्रामन्तीत्यथ[6] यद्दक्षिणाञ्चो ऽभ्युत्क्रम्याग्नीनुपतिष्ठन्ते[7] प्रीत्यैव तद्देवेष्वन्ततो ऽर्धं[8] चरन्त्यथ यदुदञ्चो[9] ऽभ्युत्क्रम्य[10] त्र्यंबकैर्यजन्ते[11] रुद्रमेव तत्स्वायां[12] दिशि प्रीणन्त्यथो देवयज्ञमेवैतत्पितृयज्ञेन[13] व्यावर्तयन्त्यथो दक्षिणासंस्थो वै पितृयज्ञस्तमेवैतदुदकसंस्थं[14] कुर्वन्त्यथ यदन्तत आदित्येष्ट्या यजतीयं[15] वा अदितिरस्यामेवैनमन्ततः[16] प्रतिष्ठापयत्यथ यत्परस्तात्पौर्णमासेन यजते तथा ह्यस्य पूर्वपक्षे साकमेधैरिष्टं भवति ' ॥ २५ ॥

त्रयोदशं वा एतं मासमाप्नोति यच्छुनासीर्येण यजत[17] '

---

1) °जनाया: B; 2) °वैषां A, B, E und F; 3) तत्पित्रेननु A pr. m.; 4) देवयज्ञेनं D; 5) °दुदकसोंस्थं A; °दुदकसंस्थं B; 6) So corr.; die hss. एवैनं; 7) °तिष्ठते E; 8) ऽर्धं D; 9) °दञ्चा F; 10) ऽभ्युत्क्रम्या D; 11) त्रैयंबकिर्यजते D; 12) So corr.; die hss. तत्स्वस्यां; 13) Vid. 8. 14) °दुदकसंस्थं B; 15) यजन्तीयं B; 16) आदि° D; 17) यृत D.

एतावान्वै संवत्सरो यावानेष[1] त्रयोदशो मासो ऽथ यदग्निं प्रणयन्ति यमेवामुं वैश्वदेवे[2] मन्थन्ति तमेव तत्प्रणयन्ति यन्मथ्यते तस्योक्तं ब्राह्मणं यद्यु न मथ्यते पौर्णमासमेव तत्तं भवति प्रतिष्ठा वै पौर्णमासं प्रतिष्ठित्या एवाथ यद्वायुं यजति प्राणो[3] वै वायुः प्राणमेव तेन प्रीणात्यथ यच्छुनासीरं यजति संवत्सरो वै शुनासीरः संवत्सरमेव तेन प्रीणात्यथ यत्सूर्यं यजत्यसौ वै सूर्यो यो ऽसौ तपत्येतमेव[4] तेन प्रीणात्यथ[5] यच्छ्वेतां[6] दक्षिणां[6] ददात्येतस्यैव[7] तद्रूपं क्रियते ऽथ यत्प्रायश्चित्तप्रतिनिधिं[8] कुर्वन्ति स्वस्त्ययनमेव तत्कुर्वन्ति यज्ञस्यैव शान्तिर्यजमानस्य भैषज्याय तैर्वा एतैश्चातुर्मास्यैर्देवाः सर्वान्कामानाप्नुवंत्सर्वा इष्टीः सर्वममृतत्वं स वा एष प्रजापतिः[9] संवत्सरश्चतुर्विंशो[9] यच्चातुर्मास्यानि तस्य मुखमेव वैश्वदेवं बाहू वरुणप्रघासाः[10] प्राणो ऽपानो व्यान इत्येतास्तिस्र इष्टय आत्मा महाहविः प्रतिष्ठा शुनासीरं[11] स वा एष प्रजापतिरेव संवत्सरो यच्चातुर्मास्यानि[12] सर्वं वै प्रजापतिः सर्वं चातुर्मास्यानि तत्स-

1) यावानेव F; 2) विश्वेदेवे D; 3) प्राणा F; 4) तपत्ये° D; 5) प्रीणात्यथ E; 6) So corr.; die hss. यच्छ्वेता दक्षिणा; 7) दधात्ये° E; 8) °चित्तं प्रति° A; °चित्तः प्रति° B und E; 9) °पतिश्चतुर्विंशो E; 10) °प्रघासाः A pr. m.; °प्रधात्माः D; 11) शुनीरं D; 12) यावातु° D.

र्येणैव सर्वमाप्नोति य एवं वेद[1] यश्चैवं विद्वांश्चातुर्मास्यैर्यजते चातुर्मास्यैर्यजते ॥ २६ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे प्रथमः प्रपाठकः ॥

ओं मांसीयन्ति[2] वा आहिताग्नेरग्नयस्तं एनमेवाग्रे ऽभिध्यायन्ति यजमानं[3] य एतमैन्द्राग्नं पशुं षष्ठे षष्ठे मास आलभते तेनैवेन्द्राग्निभ्यां असितमात्मानं निरवदयत आयुष्काम[4] आलभेत[4] प्राणापानौ वा इन्द्राग्नी[5] प्राणापानावेवात्मनि धत्त आयुष्मान्भवति प्रजाकाम आलभेत[6] प्राणापानौ वा इन्द्राग्नी प्राणापानौ प्रजा अनुप्रजायन्ते प्रजावान्भवति पशुकाम आलभेत प्राणापानौ वा इन्द्राग्नी प्राणापानौ पशवो ऽनुप्रजायन्ते पशुमान्भवति याम्यं शुकहरितमालभेत[7] शुण्ठं[8] वा यः कामयेतानामयः पितृलोके स्यामित्येतेन ह वै यमो ऽमुष्मिंल्लोक आर्ध्नोत्पितृलोक एवार्ध्नोति त्वाष्ट्रं वडवमालभेत प्रजाकामः प्रजापतिर्वै प्रजाः सिसृक्षमाणः[9] स द्वितीयं

---

1) वेदे A; 2) °सियन्ति A pr. m.; 3) Hier fehlen einige Worten; 4) आयुष्कामालभेत A und B; 5) इन्द्राग्नीं D; 6) आलभते D; 7) So corr.; die hss. शुकं हरि°; शुकं हस्तिमालभेत D; 8) So corr.; die hss. शठं; 9) So corr.; die hss. समृत्त°.

मिथुनं[1] नाविन्दत्स[1] त्वाष्ट्रं वडवमपश्यत्त्वष्टा[2] हि रूपाणां प्रजनयिता ' तेन प्रजा असृजत ' तेन मिथुनमविन्दत्प्रजावान्मिथुनवान्भवति य एवं वेद यश्चैवं विद्वानेतमालभते ' योनीन्वा एष काम्यान्पशूनालभते[3] यो ऽनिष्ट्वैन्द्राग्नेन काम्यं पशुमालभत[4] इष्ट्वालम्भः समृद्ध्यै ' ॥ १ ॥

पञ्चधा वै देवा व्युदक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्ते देवा अब्रुवन्नसुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो[5] यन्मिथो विप्रियाः[6] स्मो ' या न इमाः प्रियास्तन्वस्ताः समवद्यामहा इति ' ताः समवाद्यन्त ' ताभ्यः स[7] निर्ऋच्छाद्यो नः प्रथमो ऽन्यो[8] ऽन्यस्मै द्रुह्यादिति ' यत्तन्वः समवाद्यन्त तत्तानूनप्त्रस्य[9] तानूनप्त्रत्वं ' ततो देवा अभवन्परासुरास्तस्माद्यः सतानूनप्त्रिणां[10] प्रथमो द्रुह्यति स आर्तिमार्छति ' यत्तानूनप्त्रं समवद्यति भ्रातृव्याभिभूत्यै ' भवत्यात्मना[11] परास्याप्रियो भ्रातृव्यो भवति ' ॥ २ ॥

पञ्च कृत्वो ऽवद्यति ' पाङ्क्तो यज्ञः ' पञ्चधा हि ते ताः

---

1) So corr.; die hss. °थुनमन्वाविं°; 2) वडवमपश्य° B; 3) °न्पशूनालभते A und E; 4) °लभन्त A pr. m., B, D und E; 5) So corr.; die hss. रध्यामो; 6) So corr.; die hss. विप्रिया; 7) सं A, D, E und F; सन् B; 8) Fehlt in D; 9) Fehlt in F; 10) So corr.; die hss. तानून°; 11) °त्मनो A pr. m.

समवाप्यन्तांपतये त्वा[1] गृह्णामीत्याह ' प्राणो वा आपतिः ' प्राणमेव तेन प्रीणाति ' परिपतये त्वेत्याह[2] ' मनो वै परिपतिर्मन एव[3] तेन[3] प्रीणाति ' तनूनप्त्र इत्याह ' तन्वो हि ते ताः समवाप्यन्त ' शाक्वरायेत्याह ' शक्त्यै[4] हि ते ताः समवाप्यन्त ' शक्मन[5] ओजिष्ठायेत्याहौजिष्ठं[6] हि ते तदात्मनः समवाप्यन्तांनाधृष्टमित्याहांनाधृष्टं[7] ह्येतदंनाधृष्यमित्याहांनाधृष्यं[8] ह्येतद्देवानामोज इत्याह ' देवानां[9] ह्येतदोजो ' ऽभिशस्तिपा इत्याहाभिशस्तिपा[10] ह्येतदंनभिशस्तेन्यमित्याहांनभिशस्तेन्यं[11] ह्येतदंनु मे दीक्षां दीक्षापतिर्मन्यतामनु[12] तपस्तपस्पतिरञ्जसा सत्यमुपगेषं[13] स्विते[14] मा[15] धा इत्याह ' यथायजुरेवैतत् ' ॥ ३ ॥

घृतं वै देवा वज्रं[16] कृत्वा सोममघ्नन्त्स्रुचौ[17] बाहू ' तस्मात्स्रुचौ सौमीमाहुतिं नाशाते[18] ' अवधीयेत सोमस्तंस्मात्स्रुचौ चाज्यं चान्तिकमाहार्षीदन्तिकमिव[19] खलु

---

1) वा D; 2) च त्याह D; 3) एतेन E; 4) So corr.; शक्त्यं A, B, E und F; शक्तिं D; 5) शक्मन् F; 6) जिष्ठाये° B; 7) °दृष्टमित्या° A pr. m. und E; 8) °नादृष्यमित्याहानादृष्यं E; 8) Von °आधृष्यं bis ऽभिशस्ति° fehlt in B; 9) देवानं E; 10) °स्तिपां A sec. m.; 11) °स्त्येनं A; 12) दिक्षाप° A pr. m.; 13) Die hss °गेयां; 14) स्वोते A pr. m.; स्वेते A sec. m.; 15) नां F; 16) वज्रं D; 17) सोमघ्नन्तं स्रुचौ A; सोमघ्नन्तंस्रुचौ B; सोमघ्नांत्स्रुचौ E; सोमघ्नंस्रुचौ F; 18) So corr.; die hss. नाशाते; 19) चान्तिकमहा° D.

वा अस्यैतत्प्रचरन्ति[1] यत्तानूनप्त्रेण प्रचरन्त्यंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद इत्याह ' यदेवास्यापवायते यन्मीयते[2] तदेवास्यैतेनाप्याययन्त्या तुभ्यमिन्द्रः प्यायतामा-त्वमिन्द्राय[3] प्यायस्वेत्याहोभावेवेन्द्रं च सोमं चाप्यायन्त्याप्याययास्मान्त्सखीन्त्सन्या मेधया प्रजया धनेनेत्याहर्त्विजो वा एतस्य[4] सखायस्तानेवास्यैतेनाप्याययन्ति ' स्वस्ति ते[5] देव सोम सुत्यामुदृचमशीयेत्याहाशिषमेवैतामाशास्ते ' प्र[6] वा एतस्माल्लोकाच्च्यवन्ते[7] ये सोममाप्याययन्त्यन्तरिक्षदेवत्यो[8] हि सोम आप्यायित[9] ' एष्टा राय एष्टा वामानि प्रेषे[10] भगाय ' ऋतमृतवादिभ्यो[11] नमो दिवे नमः पृथिव्या इति ' द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिंल्लोके प्रतितिष्ठति प्रतितिष्ठति ' ॥ ४ ॥

मख इत्येतद्यज्ञनामधेयं[12] छिद्रप्रतिषेधसामर्थ्याच्छिद्रं खमित्युक्तं[13] ' तस्य मेति प्रतिषेधो ' मा यज्ञं छिद्रं करिष्यतीति[14] ' छिद्रो हि यज्ञो भिन्न इवोदधिर्विस्रवति ' तद्धै

---

1) आस्यैत° B und E; 2) Fehlt in F; 3) त्वमिन्द्राय A, E und F; 4) Von एतस्य bis एतस्मा° fehlt in B; 5) Fehlt in A und F; 6) A sec. m., D und F fügen ह ein; 7) °वते A; 8) °न्तरिक्षदेवत्यो A, D, E und F; 9) °यत A sec. m, B, D, E und F; 10) प्रेषे A pr. m.; प्रेषाय F; 11) तमृतवा° A; ऋतदवादिभ्यो D; 12) इत्येतद्यज्ञं नाम° F; 13) खमि° F; 14) °ष्यतिति A pr. m.

खलु छिद्रं भवत्यृत्विग्यजमानविमानाद्वापि वैषां व्यपेक्षया मन्त्रकल्पब्राह्मणानामप्रयोगाद्यथोक्तानां वा दक्षिणाना-मप्रदानाद्धीनाद्वातिरिक्ताद्वोत्पाताद्भुतेषु प्रायश्चित्तव्यतिक्र-मादित्येतद्वै सर्वं ब्रह्मण्यर्पितं[1] । ब्रह्मैव विद्वान्यद्भृग्वङ्गि-रोवित्सम्यगधीयानश्चरितब्रह्मचर्यो[2] ऽन्यूनानतिरिक्ता-ङ्गो[3] ऽप्रमत्तो यज्ञं रक्षति । तस्य प्रमादाद्यदि वाप्यसांनि-ध्याद्यथा भिन्ना नौरगाधे महत्युदके संप्लवेन्मत्स्यकच्छपशिं-शुमारनक्रमकरपुरीकयजषरक्षसपिशाचानां[4] भागधेयं भ-वत्येवमादीनां चान्येषां विनष्टोपजीविनामेवं खल्वपि यज्ञश्छिन्नभिन्नो ऽपध्वस्त उत्पाताद्भुतो बहुलो ऽथर्व-भिरसंस्कृतो ऽसुरगन्धर्वयक्षरक्षसपिशाचानां[5] भागधेयं भवत्येवमादीनां[6] चान्येषां विनष्टोपजीविनां[7] । तदपि श्लोकाः ।

छिन्नभिन्नो ऽपध्वस्तो विश्रुतो[8] बहुधा मखः ।
इष्टापूर्तद्रविणं गृह्य यजमानस्यावापतत्[9] ॥
ऋत्विजां च विनाशाय राज्ञो जनपदस्य च ।
संवत्सरविरिष्टं तद्यत्र यज्ञो विरिष्यते ॥

---

1) °र्पित D; 2) °धीयानश्चरितचर्यो D; 3) नूनान° A, D, E und F; 4) °मकरं पुण्डरीकजूखरक्षस B; so corr.; die hss. °जखरक्षस°; 5) So corr.; die hss. °राक्षसपिशाचानां; 6) °मादीना B; 7) °जीवनां B und D; 8) विसृतो A und E; व्रितो F; 9) °स्यवापतत F.

दक्षिणाप्रवणीभूतो यज्ञो दक्षिणतः स्मृतः ।
हीनाङ्गो रक्षसां भागो ब्रह्मवेदादसंस्कृतः ॥
चतुष्पात्सकलो यज्ञश्चातुर्होत्रविनिर्मितः[1] ।
चतुर्विधि स्थितो मन्त्रैर्ऋत्विग्भिर्वेदपारगैः ॥
प्रायश्चित्तैरनुध्यानैरनुज्ञानानुमन्त्रणैः ।
होमैश्च यज्ञविभ्रंशं सर्वं ब्रह्मा प्रपूरयेद्[2] ॥

इति ' तस्माद्यजमानो भृग्वङ्गिरोविदमेव तत्र[3] ब्रह्माणं वृणीयात्स हि यज्ञं तारयतीति ब्राह्मणम् ' ॥ ५ ॥

यज्ञो वै देवेभ्य उदक्रमन्न[4] वो ऽहमन्नं भविष्यामीति ' नेति[5] देवा अब्रुवन्नन्नमेव नो भविष्यसीति ' तं देवा विमेथिरे ' स एभ्यो विहृतो[6] न प्रबभूव ' ते होचुर्देवा ' न वै न इत्थं विहृतो[6] ऽलं भविष्यति ' हन्तेमं संभरामेति[7] ' तं संजभ्रुस्तं[8] संभृत्योचुरश्विनाविमं[9] भिषज्यतमित्यश्विनौ[10] वै देवानां भिषजावश्विनावध्वर्यू ' तस्मादध्वर्यू घर्मं संभरतस्तं[11] संभृत्योचतुर्ब्रह्मन्घर्मेण प्रचरिष्यामो होतर्घर्ममभिष्टुह्युद्गातः सामानि गायेति[12] ' प्रचरत घर्ममित्य-

---

1) यज्ञश्च° A pr. m. und F; 2) पूरयेद् E; 3) Fehlt in A, B und F; 4) उत्क्रामन् B; 5) तेनेति A und B; 6) विह्रुतो A und D; 7) °रामीति A, B, E und F; 8) जभ्रुस्तं B; 9) संभृत्योचतुर° B und E; 10) भिषज्य° A; भिषज्ज्य° F; 11) संचरतस्तं D; 12) गायति D.

नुजानाति ' ब्रह्मप्रसूता हि प्रचरन्ति ' ब्रह्म हीदं प्रसवा-
नामीशे" सवितृप्रसूततायै[1] ' घर्मं तपामि ब्रह्म जज्ञानमियं
पित्र्या राष्ट्र्येत्वग्र इति घर्मं ताप्यमानमुपासीत[2] शश्वव-
दर्धर्चश आह्वावप्रतिगरवर्जं रूपसमृद्धाभिरेतद्वै यज्ञस्य स-
मृद्धं यद्रूपसमृद्धं[3] ' यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति स्व-
स्ति तस्य यज्ञस्य पारमश्नुते य एवं वेद ' देवमिथुनं[4]
वा एतद्यद्घर्मस्तस्मादन्तर्धाय[5] प्रचरन्त्यन्तर्हिता[6] वै मिथुनं
चरन्तीति[7] ' तदेतद्देवमिथुनमित्याचक्षते ' तस्य यो घर्मस्त-
च्छिश्नं ' यौ शफौ तावाण्डौ ' योपयमनी[8] ते[8] श्रोणि-
कपाले ' यत्पयस्तद्रेतस्तदग्नौ देवयोन्यां रेतो ब्रह्ममयं धत्ते
प्रजननाय ' सो ऽग्निर्देवयोनिर्ऋङ्मयो[9] यजुर्मयः साममयो
ब्रह्ममयो ऽमृतमय आहुतिमयः सर्वेन्द्रियसंपन्नो यजमान
ऊर्ध्वः स्वर्गं लोकमेति ' तदाहुर्न प्रथमयज्ञे प्रवर्ग्यं कुर्वी-
तानुपनामुका[10] ह वा एनमुत्तरे यज्ञक्रतवो भवन्तीति '
कामं तु[11] यो[11] ऽनूचानः श्रोत्रियः[12] स्यात्तस्य[12] प्रवृ-
ञ्ज्यादात्मा[13] वै स यज्ञस्येति विज्ञायते ' ऽपशिरसा ह वा

---

1) °प्रसूतानायै A; 2) °पसीत A, B, E und F; 3) °समृद्ध D; 4) So corr.; die hss. °देवमिथुनं; 5) °न्तर्धा हि B, D und E; 6) A fügt ए ein; 7) चरन्तीति D; 8) So corr.; die hss. य उपयमनी के; 9) °यो-निमृगमय B; °योनिरृग्मयो E; °योनी ऋङ्मयो F; 10) So corr.; die hss. °नुपनामका; 11) ऋषो B; 12) श्रोत्रियात्तस्य F; 13) प्रवृत्यादात्मा E.

एष यज्ञेन यजते[1] यो[2] ऽप्रवर्ग्येण[2] यजते[2] ' शिरो ह वा एतद्यज्ञस्य यत्प्रवर्ग्यस्तस्मात्प्रवर्ग्यवतैव[3] याजयेन्नाप्रवर्ग्येण[4] ' तदप्येषाभ्यनूक्ता चत्वारि शृङ्गेति ' ॥ ६ ॥

देवाश्च ह वा ऋषयश्चासुरैः संयत्ता[5] आसंस्तेषामसुराणामिमाः पुरः प्रत्यभिजिता आसन्नयस्मयी पृथिवी रजतान्तरिक्षं हरिणी द्यौस्ते[6] देवाः संघातंसंघातं पराजयन्त ' ते ऽविदुरनायतना हि वै स्मस्तस्मात्पराजयामह[7] इति ' त एताः पुरः प्रत्यकुर्वत हविर्धानं दिव आग्नीध्रमन्तरिक्षात्सदः पृथिव्यास्ते देवा अब्रुवन्नुपसदमुपायामोपसदा वै महापुरं जयन्तीति ' त एभ्यो लोकेभ्यो निरघ्नन्नेकयामुष्माल्लोकादेकयान्तरिक्षादेकया पृथिव्यास्तस्मादाहुरुपसदा वै महापुरं[8] जयन्तीति ' त एभ्यो लोकेभ्यो निर्हता ऋतून्प्राविशंस्ते[9] षडुपायंस्तानुपसद्भिरेवर्तुभ्यो[10] निरघ्नन्द्वाभ्याममुष्माल्लोकाद्द्वाभ्यामन्तरिक्षाद्द्वाभ्यां पृथिव्यास्त ऋतुभ्यो निर्हताः[11] संवत्सरं प्राविशंस्ते द्वादशोपायंस्तानुपसद्भिरेव संवत्सरान्निरघ्नंश्चतसृभिरमुष्माल्लोकाच्चतसृभिरन्तरिक्षाच्चतसृभिः पृथिव्यास्ते संवत्सरा-

---

1) यजन्ते B; 2) Fehlt in D; 3) °वर्ग्य वतैव B; °वर्ग्यतैव F; 4) याजतन्ना° F; 5) संयता D; संयन्ता E; 6) ध्यौस्ते A; द्योस्ते F; 7) So corr.; die hss. ऽयस्तस्मात्पराजयामहा; 8) महापुरे D; पुरं F; 9) °विशांस्ते B; 10) द्वादशोपायंस्ता° F; 11) निर्हाता: D.

न्निर्हता अहोरात्रे प्राविशंस्ते यत्सायमुपायंस्तेनैनान्रात्र्या[1)] अनुदन्त यत्प्रातस्तेनाह्नस्तस्माद्धौः सायं प्रातस्तनमाप्या-यते[2)] प्रातः सायन्तनं[3)] ' तानुपसद्भिरेवैभ्यो लोकेभ्यो नुदमाना[4)] आयंस्ततो देवा अभवन्परासुराः ' सर्वेभ्य एवैभ्यो लोकेभ्यो[5)] भ्रातृव्यं नुदमान एति य एवं वि-द्वानुपसदमुपैति ' ॥ ७ ॥

न द्वादशाग्निष्टोमस्योपसदः स्युरंशान्ता निर्मृद्युर्न[6)] तिस्रो ऽहीनस्योपरिष्टाद्यज्ञक्रतुर्गरीयानभिषीदेद्यथा गु-रुर्भारो ग्रीवा निःशृणीयादार्तिमार्छेद्द्वादशाहीनस्य[7)] कु-र्यात्प्रत्युत्तब्ध्यै[8)] सयत्वाय[9)] ' तिस्रो ऽग्निष्टोमस्योपसदः स्युः शान्त्या[10)] अनिर्मार्गाय[10)] ' ते देवा असुर्यानिमांल्लोकान्ना-न्ववैतुमधृष्णुवंस्तानग्निना[11)] मुखेनान्ववायन्यदग्निमन्त्युप-सदां[12)] प्रतीकानि भवन्ति[13)] यथा क्षेत्रपतिः क्षेत्रे ऽन्व-वनयत्येवमेवैतदग्निना[14)] मुखेनेमांल्लोकानभिनयन्तो यन्ति ' यो ह वै देवान्साध्यान्वेद सिध्यत्यस्मा ' इमे वाव लोका

---

1) °स्तेनैना रात्र्या D; 2) प्रातस्तमाप्या° E; 3) सायन्तन् E; 4) So corr.; die hss. नुदमान; B नदमान; 5) Fehlt in F; 6) So corr. nach Kath.; die hss. °द्येरन्न; 7) So corr. nach Kāṭh. XXIV 10, die hss. निश्रीणीयादार्तिमार्छेद्वाद°, 8) So corr. nach Kāṭh., die hss. °त्प्रत्युतयै; 9) वयत्वाय E; 10) So corr. nach Kaṭh.; die hss. शान्ता-ग्निर्मार्गाय; 11) So corr. nach Kaṭh. die hss. °कान्नान्ववैतुमधृ°; 12) °पसदा A und F; 13) भवति D; 14) ऽन्वधनय° B; ऽन्ववय° D.

यत्साध्या[1] देवाः ' स य एवमेतान्त्साध्यान्वेद सिध्यत्यस्मै ' सिध्यत्यमुष्मै सिध्यत्यस्मै[2] लोकाय[2] य एवंविद्वानुपसदमुपैति ' ॥ ८ ॥

अथ यत्राहाध्वर्युरग्नीद्देवपत्नीर्व्याचक्ष्व[3] सुब्रह्मण्य सुब्रह्मण्यामाह्वयेति तदपरेण गार्हपत्यं प्राङ्मुखस्तिष्ठन्ननवानन्नाग्नीध्रो[4] देवपत्नीर्व्याचष्टे ' पृथिव्यग्नेः पत्नी ' वाग्वातस्य पत्नी ' सेनेन्द्रस्य[5] पत्नी[5] ' धेना[5] बृहस्पतेः पत्नी ' पथ्या पूष्णः पत्नी ' गायत्री वसूनां पत्नी ' त्रिष्टुब्रुद्राणां[6] पत्नी ' जगत्यादित्यानां पत्न्यनुष्टुम्मित्रस्य[7] पत्नी ' विराड्वरुणस्य पत्नी ' पङ्क्तिर्विष्णोः पत्नी ' दीक्षा[8] सोमस्य राज्ञः पत्नीत्येति भ्रातृव्यानारोहति नैनं भ्रातृव्या आरोहन्त्युपरि भ्रातृव्यान्नारोहति य एवंविद्वानाग्नीध्रो[9] देवपत्नीर्व्याचष्टे ' ॥ ९ ॥

यथा वै रथ एकैकमरमभिप्रतितिष्ठन्वर्तत एवं यज्ञ एकैकां तन्वमभिप्रतितिष्ठन्नेति ' पुरा प्रचरितोराग्नीध्रीये होतव्या ' एतद्ध वा उवाच वासिष्ठः[10] सात्यहव्यो[11] ऽस्कन्त्सोम[12] इत्युक्ते मा सूर्क्षत[13] प्रचरत प्रातर्वावाग्याहं

1) य साध्या D; 2) So corr.; die hss. °त्यस्माल्लोकाद्ध; 3) °चक्षु D und F; 4) °स्तिष्ठन्ननवानन्नाग्नीध्रो A; 5) Fehlt in D; 6) °ब्रुद्राणी D; 7) पत्न्यनु° D; 8) दक्षा D; 9) °ग्नीध्रा D; 10) वासिष्टः D; 11) सात्यहव्या A; 12) स्तं सोम E; 13) सूर्क्षीत D; सूक्षत F.

सोमं समस्थापयमिति[1] ' नास्य सोम स्कन्दति य एवंविद्वान्त्सोमं पिबति ' स ह स्म वै स आसन्ध्यामासीनः[2] सक्तुभिरुपमथ्य सोमं पिबत्यहं[3] वाव[4] सर्वतो यज्ञं वेद[5] य एतान्वेद[6] ' न मामेष हिंसिष्यतीति[7] ' नैनं सोमपीथो न पेयो हिनस्ति य एवंविद्वान्त्सोमं पिबति[8] ' तं ह स्म यदाहुः कस्मात्त्वमिदमासन्ध्यामासीनः सक्तुभिरुपमथ्य सोमं पिबसीति ' देवतास्वेव यज्ञं प्रतिष्ठापयामीत्यब्रवीद्ब्रह्मणो यस्यैवंविदुषो यस्यैवंविद्वान्यज्ञार्त्या[9] यज्ञे[9] प्रायश्चित्तं[10] जुहोति ' देवतास्वेव यज्ञं प्रतिष्ठापयति ' यज्ञार्तिं प्रतिजुहुयात्संयोनित्वाय[11] ' त्रयस्त्रिंशद्वै यज्ञस्य तन्व इत्येकान्नत्रिंशत्स्तोमभागास्त्रीणि[12] सवनानि ' यज्ञश्चतुर्थ ' स्तोमभागैरेवैतत्स्तोमभागान्प्रतिप्रयुङ्क्ते सवनैः सवनानि यज्ञेन यज्ञं ' सर्वा ह वा अस्य यज्ञस्य तन्वः प्रयुक्ता भवन्ति सर्वा आप्ताः सर्वा अवरुद्धा ' देवस्य सवितुः प्रसवे[13] बृहस्पतये स्तुतेति ' यच्चद्वै सविता देवेभ्यः प्रासुवत्तेनार्ध्नुवन्त्सवितृ-

---

1) A, B, E und F संस्थापयामीति ; D संस्थापयामिति ; 2) So corr. ; die hss. हासन्ध° ; 3) पिबन्त्यहं D ; पिबसहं F ; 4) वा F ; 5) वद D ; 6) ? ? एतां वेद A, D und F ; 7) °ष्यातीति E ; 8) पिबन्ती D ; 9) °न्यज्ञार्तान्यज्ञे A pr. m., B, E und F ; °न्यज्ञार्त्यान्यज्ञे A sec. man. ; °न्यज्ञार्त्याय यज्ञे D ; 10) प्रायश्चित्तिं A sec. m., D und F ; 11) °यनित्वाय D ; 12) इत्येतान्न° D ; इत्येकं नृत्रिं° E ; इत्येतान्नत्रिंशत्स्तोम° D ; इत्येकान्नत्रिं° F ; 13) सवे D.

प्रसूता एव स्तुवन्त्यृध्नुवन्त्यृध्यन्ते ह वा अस्य स्तोमा यज्ञ[1] ऽऋध्यते ऋध्यते[2] प्रजाया[3] ऽऋध्यते पशुभ्य ऽऋध्यते[4] ब्रह्मणे यस्यैवंविद्वान्ब्रह्मा भवति[5] ॥ १० ॥

देवाश्च ह वा असुराश्चास्पर्धन्त ते देवाः समावदेव[6] यज्ञे कुर्वाणा आसन्यदेव देवा अकुर्वत[7] तदसुरा अकुर्वत ते न व्यावृतमगच्छंस्ते देवा अब्रुवन्नयतेमं[8] यज्ञं तिर उपर्यसुरेभ्यस्तंस्यामह[9] इति तमेताभिराच्छाद्योदक्रामन्न्यृ-त्नूंषि[10] यज्ञे[11] समिधः स्वाहेति तं तिर उपर्यसुरेभ्यो यज्ञमतन्वत तमेषां यज्ञमसुरा नान्ववायंस्ततो देवा अभवन्परासुराः स य[12] एवंविद्वांस्तिर उपर्यसुरेभ्यो यज्ञं तनुते भवत्यात्मना परास्याप्रियो भ्रातृव्यो भवत्येतैरेव जुहुयात्समृतयज्ञे[13] चतुर्भिश्चतुर्भिरन्वाख्यायं[14] पुरस्तात्प्रातरनुवाकस्य जुहुयादेतावान्वै[15] यज्ञो यावानेष यज्ञस्तं वृङ्क्ते सयज्ञो भवत्ययज्ञ इतर एतैरेव जुहुयात्पुरस्ताद्द्वादशाहस्यैष[16] ह वै प्रत्यक्षं द्वादशाहस्तमेवालभ्यै-

1) यज्ञ ist wschl. interpolation; 2) ऋध्यति D; 3) प्रजया A, B, D und F; 4) Fehlt in F; 5) भवन्ति F; 6) °वदेवा A, B, E und F; 7) आकुर्वत D; 8) अयत ist corrupt; man erwartet एत; 9) So corr.; die hss. °स्तंस्यामहा; 10) So corr.; die hss. °क्रामन्ति ऋतूंषि; 11) यज्ञ D; 12) Fehlt in D; 13) So corr.; die hss. °त्समृतयज्ञे; 14) So corr.; die hss. °ख्यानं; 15) °तावान्वे D; 16) So corr.; die hss. °स्ताद्वादशाहस्यैष.

तैरेव[1] जुहुयात्पुरस्ताद्दीक्षाया[2] ' एषा[3] ह वै प्रत्यक्षं[4] दीक्षा ' क्षामेवालभ्यैतैरेवातिथ्यमभिमृशेद्यज्ञेन यज्ञमयजन्त देवा इति ' ॥ ११ ॥

यत्र विजानाति व्यक्षन्त्सोमो[5] ऽस्कन्निति तमेतया-लभ्याभिमन्त्रयते[6] ऽभूद्देवः सविता[7] वन्द्यो[8] नु न इदा-नीमह्न उपवाच्यो नृभिः । वि यो रत्ना[9] भजति मान-वेभ्यः[10] श्रेष्ठं नो अत्र द्रविणं यथा दधदिति ' ये अग्नयो अप्स्वन्तरिति[11] सप्तभिरभिजुहोति ' यदेवास्यावस्कन्नं भ-वति तदेवास्यैतदग्नौ स्वगाकरोत्यग्निर्हि[12] सुकृतीनां[13] हविषां प्रतिष्ठाय[14] विसृप्य वैप्रुषान्होमाञ्जुहोति[15] द्र-प्सश्चस्कन्देति ' या एवास्याभिषूयमाणस्य[16] विप्रुष स्क-न्दन्त्यंशुर्वा[17] ता एवास्यैतदाहवनीये[18] स्वगाकरोत्या-हवनीयो ह्याहुतीनां[19] प्रतिष्ठा ' यस्ते द्रप्स स्कन्दतीति ' स्तोको[20] वै द्रप्सो ' यस्ते अंशुर्बाहुच्युतो[21] धिषणाया

1) द्वादशाहस्तानवा° E; 2) °स्ताद्दीक्षा D; 3) एष A, B und E; 4) प्रत्यक्ष B; B fügt वै ein; 5) °न्सोमा B; 6) तमेत्वया° B; 7) सवि-तां B; 8) वन्दो A pr. m. und E; 9) रत्ना B; 10) मानवेभ्य: D; 11) अप्सन्तरिति E; 12) स्वगा° E; 13) सुकृतीनां B, D und E; 14) प्रतिष्ठाप्य A, B und F; 15) °न्होमानजु° B und E; °नजुहति D; 16) एवास्याभिष्य° B; 17) स्कन्दत्यं° E; ? vielleicht °शुर्वात्र; 18) या-वास्यैतदाह° D; 19) ह्याहुतीनां F; 20) सोको B; 21) अंशुव-हुच्युतो D.

उपस्थादिति ' ग्रावभिरभिच्युतो ऽंशुरधिषवणाभ्यामधिस्क-
न्दत्यध्वर्योर्वा[1] परि[2] यः[2] पवित्रात्तं[3] ते जुहोमि मनसा
वषट्कृतमिति ' तद्यथा वषट्कृतं स्वाहाकृतं हुतमेवं[4] भव-
ति ' ॥ १२ ॥

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यंस्तं[5] वसिष्ठ एव
प्रत्यक्षमपश्यत्सो ऽबिभेदितरेभ्य ऋषिभ्यो मा प्रवोचदिति '
सो ऽब्रवीद्ब्राह्मणं[6] ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः
प्रजनिष्यन्ते[7] ऽथेतरेभ्य ऋषिभ्यो मा प्रवोच[8] इति ' तस्मा
एतान्स्तोमभागानुवाच ' ततो[9] वसिष्ठपुरोहिताः[10] प्रजाः
प्राजायन्त[11] ' स्तोमो वा एतेषां भागस्तत्स्तोमभागानां
स्तोमभागत्वं ' रश्मिरसि क्षयाय त्वेति ' क्षयो वै देवा[12] '
देवेभ्य एव यज्ञं प्राह ' प्रेतिरसि धर्मणे[13] त्वेति ' धर्मा
मनुष्या ' मनुष्येभ्य एव यज्ञं प्राहान्वितिरसि संधिरसि प्र-
तिधिरसीति ' त्रयो वै लोका ' लोकेष्वेव यज्ञं प्रतिष्ठा-
पयति ' विष्टम्भो ऽसीति ' वृष्टिमेवावरुन्द्धे ' प्रावो[14] ऽस्य-

---

1) So corr.; die hss. °स्कन्दन्त्यध्व°; 2) परोर्य: A pr. m.; पर्य: B, E und F; 3) पवित्रातं D und F; पवित्रान्तं E; 4) हुतानेवं A pr. m.; हुतमित्रं A sec. m.; हुतामवं D; 5) पश्यन्तं D; 6) °दृब्रह्मणं A pr. m.; 7) प्रजन इष्यन्ते A und F; प्रजनिष्यन्ते B und D; 8) So corr.; die hss. प्रवोचद्; 9) ताते B; 10) °रोहितं D; 11) So corr.; प्रजायन्त A, B, E und F; प्रजयन्त D; 12) Fehlt in F; 13) धर्मणो A pr. m. und F; धर्मणा B; 14) ? ?; T. S. III 5. 2. 3 प्रवाणि अनुव्यासीति.

ज्ञांसीति[1] मिथुनमेव करोत्युशिगसि प्रकेतो ऽसि सुदितिरसीत्यष्टौ[2] वसव एकादश रुद्रा द्वादशादित्या वाग्द्वात्रिंशी स्वरस्त्रयस्त्रिंशस्त्रयस्त्रिंशद्देवा ' देवेभ्य एव[3] यज्ञं प्राहौजो ऽसि पितृभ्यस्त्वेति ' बलमेव तत्पितॄननुसंतनोति[4] ' तन्तुरसि प्रजाभ्यस्त्वेति ' प्रजा एव पशूननुसंतनोति[5] ' रेवदस्योषधीभ्यस्त्वेत्योषधीष्वेव[6] यज्ञं प्रतिष्ठापयति ' पृतनाषाडसि पशुभ्यस्त्वेति ' प्रजा एव पशूननुसंतनोत्यभिजिदसीति[5] ' वज्रो वै षोडशी ' व्यावृत्तो[7] ऽसौ वज्रस्तस्मादेषो ऽन्यैर्व्यावृत्तो[8] ' नाभुरसीति ' प्रजापतिर्वै सप्तदशः ' प्रजापतिमेवावरुन्द्धे ' ॥ १३ ॥

अधिपतिरसि धरुणो ऽसि संसर्पो[9] ऽसि वयोधा असीति[10] ' प्राणो ऽपानश्चक्षुः श्रोत्रमित्येतानि वै पुरुषमकरन्प्राणानुपैति ' प्रजात्या एव ' त्रिवृदसि प्रवृदसि स्ववृदस्यनुवृदसीति ' मिथुनमेव करोत्यारोहो ऽसि प्ररोहो ऽसि संरोहो ऽस्यनुरोहो ऽसीति ' प्रजापतिरेव ' वसुको ऽसि वस्यष्टिरसि वेषश्रीरसीति[11] ' प्रतिष्ठितिरेवाक्रमो ऽसि

---

1) Vid. p. १७८ N8te 14; 2) सुदीति° B; 3) एवं D; 4) तात्पि° E; 5) पशुन° A und B; 6) °षधिष्वेत्र A pr. m.; 7) °वृत्तौ A pr. m; °वृत D und F; °वृत्ते E; 8) So corr.; die hss. ऽन्यै व्यावृत्तो; E ऽन्यै वावृत्तो; 9) सर्पो E; संसर्प्यात् D; 10) सीति D und F; 11) वेषनश्रो° E.

संक्रमो ऽस्युत्क्रमो ऽस्युत्क्रान्तिरसीत्यृद्धिरेव[1] 'यद्धै सविता देवेभ्यः प्रासुवत्तेनार्ध्नुवन्त्सवितृप्रसूता एव 'स्तुवन्त्यृध्नुवन्ति ' बृहस्पतये स्तुतेति ' बृहस्पतिर्वा आङ्गिरसो[2] देवानां ब्रह्मा ' तदनुमत्यैवों[3] भूर्जनदिति प्रातःसवन' ऋग्भिरेवोभयतो ऽथर्वाङ्गिरोभिर्गुप्ताभिर्गुप्ते स्तुतेत्यैवों[4] भुवो जनदिति माध्यंदिने सवने ' यजुर्भिरेवोभयतो ऽथर्वाङ्गिरोभिर्गुप्ताभिर्गुप्ते ' स्तुतेत्यैवों स्वर्जनदिति तृतीयसवने[5] 'सामभिरेवोभयतो ऽथर्वाङ्गिरोभिर्गुप्ताभिर्गुप्ते स्तुतेत्यैवाथ[6] यद्यहीन उक्थ्यः षोडशी वाजपेयो[7] ऽतिरात्रो ऽप्तोर्यामा वा स्यात्सर्वाभिः सर्वाभिरत ऊर्ध्वं व्याहृतिभिरनुजानात्यों[8] भूर्भुवः स्वर्जनदृधत्करद्रुहन्महत्तच्छमोमिन्द्रवन्त[9] स्तुतेति सेन्द्रान्मापगायत[10] सेन्द्रान्स्तुतेत्यैवेन्द्रियवानृद्धिमान्वशीयान्भवति[11] य एवं वेद यश्चैवंविद्वान्स्तोमभागैर्यजते[12] ' ॥ १४ ॥

यो ह वा आयतांश्च प्रतियतांश्च[13] स्तोमभागान्विद्यात्स[14] विष्पर्धमानयोः समृतसोमयोर्ब्रह्मा[15] स्यात्स्तु-

1) °रित्यृधिरेत्र D; °रित्यृधिरेव B; 2) अङ्गिरसो F; आङ्गिरसों E; 3) °त्यैत्रा B; 4) °त्यैत्रो B und E; 5) °सवन D; 6) °वाथ B; 7) वाजपेये D; 8) °नात्यो E; 9) °न्द्रवं D; 10) ? ?; 11) सेन्द्रियां स्तुते B und D; 12) यश्चैवंवि° D; 13) प्रीतीयतांश्च D; 14) So corr.; A, D, E und F °न्विद्याच; B °न्विन्याच; 15) So corr.; die hss. सवृत°.

तेषे[1] स्तुतोर्ऽ[2] स्तुत देवस्य सवितुः सवे बृहस्पतिं[3] वः प्रजापतिं वो वसून्वो देवान्रुद्रान्वो[4] देवानादित्यान्वो देवान्साध्यान्वो देवानाप्त्यान्वो[5] देवान्विश्वान्वो देवान्सर्वान्वो देवान्विश्वतस्परिहवामहे । जनेभ्यो ऽस्माकमस्तु केवल । इतः कृणोतु वीर्यमित्येते[6] ह वा आयताश्च[7] प्रतियताश्च[8] स्तोमभागास्ताञ्जपन्नुपर्युपरि[9] परेषां ब्रह्माणमवेक्षेत[10] । तत एषामधःशिरा ब्रह्मा पतति । ततो यज्ञस्ततो यजमानो[11] । यजमाने ऽधःशिरसि पतिते स देशो ऽधःशिराः पतति यस्मिन्नर्धे[12] यजन्ते । देवाश्च ह वा असुराश्च समृतसोमौ[13] यज्ञावतनुतामथ[14] बृहस्पतिराङ्गिरसो देवानां ब्रह्मा । स आयतांश्च प्रतियतांश्च स्तोमभागाञ्जपन्नुपर्युपर्यसुराणां ब्रह्माणमवैक्षत[15] । तत एषामधःशिरा ब्रह्मापतत्ततो यज्ञस्ततो ऽसुरा इति । ॥ १५ ॥

देवा यज्ञं पराजयन्त । तमाग्नीध्रात्पुनरुपाजयन्त । तदेत-

---

1) So corr.; स्तुतोपे A, D, E und F; स्तुतोमे B; 2) स्तुतोर्ज D und E; 3) बृहस्पतिर् D und E; 4) देवा रुद्रान्वो D; 5) Fehlt in F; 6) °त्यते D; °त्येत F; 7) आयतांश्च A, B und F; अयतांश्च D; अयताश्च E; 8) प्रतियतांश्च A, B, D und F; 9) स्तोमभागांस्ता° A, D und F; स्तोमभागास्ताः त्र° B; 10) °वेक्षते F; 11) Fehlt in F; 12) °न्नर्ध D; 13) So corr.; die hss. संवृतसोमौ; 14) Man erwartet अतन्वत; 15) So corr.; °मवेक्षत A und E; °मवेक्षेत B, D und F.

यज्ञस्यापराजितं[1] यदाग्नीध्रं ' यदाग्नीध्राद्धिष्ण्यान्विहरति[2] तत एवैनं पुनस्तनुते ' पराजित्या ' अप[3] खलु वा एते गच्छन्ति ये बहिष्पवमानं[4] सर्पन्ति[5] ' बहिष्पवमाने[6] स्तुत आहाग्नीदग्नीन्विहर बर्हिः स्तृणीहि पुरोडाशानलंकुर्विति[7] ' यज्ञमेवापराजित्य[8] पुनस्तन्वाना[9] आयन्त्यंङ्गारैर्द्वे सवने विहरति शलाकाभिस्तृतीयसवनं[10] ' सशुक्रत्वायाथो[11] संभवत्येवमेवैतद्दक्षिणतो वै देवानां यज्ञं रक्षांस्यजिघांसंस्तान्याग्नीध्रेणापाघ्नत[12] ' तस्माद्दक्षिणामुखस्तिष्ठन्नग्नीत्प्रत्याश्रावयति ' यज्ञस्याभिजित्यै ' रक्षसामपहत्यै रक्षसामपहत्यै ' ॥ १६ ॥

तदाहुरथ कस्मात्सौम्य एवाध्वरे प्रवृताहुतीर्जुह्वति[13] न हविर्यज्ञ इत्यकृत्स्ना वा एषा देवयज्या[14] यद्धविर्यज्ञो[15] 'ऽथ हैषैव कृत्स्ना[16] देवयज्या यत्सौम्यो[17] ऽध्वरस्तस्मात्सौम्य एवाध्वरे प्रवृताहुतीर्जुह्वति[18] ' जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाग्यद्वाचो मधुमत्तमं[19] तस्मिन्मा

---

1) जित E; 2) So corr.; die hss. यदाग्नीधाधि°; 3) च प E; 4) °वमाने E; 5) सर्पयन्ति B; 6) °वमानं D; 7) °कुर्वीति A pr. m.; 8) °जित्यं B; 9) °न A, B, E und F; 10) शालाका° F; 11) °यथो F; 12) °संस्तान्याग्नी° B; 13) प्रवृत्ता° A pr. m. und D; 14) देवयज्ञा D; 15) °र्यज्ञा D; 16) कृत्स्ना एषा A pr. m., D und E; 17) य सोम्यो D; 18) प्रवृत्तां हुती° D; प्रवृत्ता° F; 19) मधुनं E.

धाः स्वाहा वाचे स्वाहा वाचस्पतये स्वाहा सरस्वत्यै स्वाहा सरस्वत्या इति पुरस्तात्स्वाहाकारेण जुहोति ' तस्माद्वागत ऊर्ध्वमुत्सृष्टा यज्ञं वहति मनसोत्तरां[1] ' मनसा हि मनः प्रीतं ' तद्ध हैके सप्ताहुतीर्जुह्वति[2] सप्त छन्दांसि प्रवृत्तानि[3] प्रतिमन्त्रमिति वदन्तो ' यथा मेखला[4] पर्यस्यते मेध्यस्य चामेध्यस्य[5] च विहृत्या एवं हैवैते न्युप्यन्ते मेध्यस्य चामेध्यस्य[6] च विहृत्यै[7] यज्ञस्य[8] विहृत्यै[8] ' प्राचीनं हि धिष्ण्येभ्यो देवानां लोकाः[9] प्रतीचीनं मनुष्याणां ' तस्मात्सोमं पिबता प्राञ्चो धिष्ण्या नोपसर्प्या[10] ' जनं[11] ह्येतद्देवलोकं ह्यध्यारोहन्ति[12] ' तेषामेतदायतनं[13] चोदयनं च यदाग्नीध्रं[14] च सदश्च ' तयो ऽविद्वान्त्संचरत्यार्तिमार्छत्यथ यो विद्वान्त्संचरति[15] न स धिष्णीयामार्तिमार्छति ' ॥ १७ ॥

प्रजापतिर्वै यज्ञस्तस्मिन्त्सर्वे कामाः सर्वा इष्टीः[16] सर्वममृतत्वं[17] ' तस्य हैते गोप्तारो यद्धिष्ण्यास्तांत्सदः[18]

---

1) मनसोन्तरां D; मनसोतरा E; 2) सप्ताहु° F; 3) प्रवृतानि B; 4) मेखाला E; 5) Fehlt in E; 6) Fehlt in den hss.; 7) यहृत्यै E; 8) Fehlt in F; 9) लोक B; 10) नोपसर्पा A, B und E; नोपसप्य D; 11) जिनं D; 12) So corr.; die hss. ह्युध्या°; 13) °यतन A; 14) °ग्नीध्रयं D; 15) °चरन्ति D; 16) इष्टाः D; 17) D fügt च ein; 18) यद्धिष्णाया° E.

प्रसर्पस्यन्नमस्करोति[1] 'नमो नम इति' न हि नमस्का-रमति देवास्ते[2] ह नमसिताः कर्तारमतिसृजन्तीति[3] 'तत एतं प्रजापतिं यज्ञं प्रपद्यते[4] नमो नम इति' न हि नमस्कारमति देवाः' स तत्रैव यजमानः सर्वान्कामानाप्नोति सर्वान्कामानाप्नोति' ॥ १८ ॥

यो वै सदस्यान्गन्धर्वान्वेद न[5] सदस्यामार्तिमार्छति' सदः[6] प्रसर्पस्यन्ब्रूयादुपद्रष्ट्रे नम इत्यग्निर्वै द्रष्टा तस्मा[7] उ एवात्मानं परिददाति[8] 'सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं वेद' सदः प्रसृप्य ब्रूयादुपश्रोत्रे नम इति' वायुर्वा उपश्रोता' तस्मा उ एवात्मानं परिददाति[9]' सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं वेद' सदः प्रसर्पन्ब्रूयादनुख्यात्रे[10] नम इत्यादित्यो वा अनुख्याता' तस्मा उ एवात्मानं परिददाति[9] 'सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं वेद' सदः प्रसृप्तो ब्रूयादुपद्रष्ट्रे नम इति' ब्राह्मणो वा उपद्रष्टा' तस्मा उ[11] एवात्मानं परिददाति[9] 'सर्वमायुरेति न पुरा जरसः प्रमीयते य एवं

1) °स्कारोति D; 2) देवस्ते D; 3) °मिसृजन्तीति A sec. m. und F; 4) प्रपद्येते A pr. m., B und F; 5) Man erwartet न न सद°; 6) सदा D; 7) तस्माद् F; 8) So corr.; die hss. परिदधाति; परिति D; 9) So corr.; die hss. °दधाति; 10) प्रसृपो ब्रूया° D; 11) So corr.; die hss. उ.

वेद ' ते वै[1] सदस्या गन्धर्वाः ' स[1] य एवमेतान्त्सदस्यान्गन्धर्वान्विद्वान्त्सदः प्रसर्पति स सदस्यामार्तिमार्छत्यथ यो विद्वान्त्संचरति[2] न सदस्यामार्तिमार्छत्येतेन[3] ह स्म वा अङ्गिरसः[4] सर्वं सदः पर्याहुस्तौ न सदस्यामार्तिमार्छत्यथ[5] यान्कामयेत न सदस्यामार्तिमार्छेयुरिति तेभ्य[6] एतेन सर्वं सदः परिब्रूयात्तौ न सदस्यामार्तिमार्छत्यथ[7] यं कामयेत प्रमीयेतेति तमेतेभ्य आवृश्चेत्प्रमीयते ' ॥ १९ ॥

तदाहुर्यदैन्द्रो यज्ञो ऽथ कस्माद्द्वाविव[8] प्रातःसवने प्रस्थितानां प्रत्यक्षादैन्द्रीभ्यां यजतो होता चैव[9] ब्राह्मणाच्छंसी चेदं ते[10] सोम्यं[11] मध्विति होता यजतीन्द्र[12] त्वा वृषभं वयमिति ब्राह्मणाच्छंसी ' नानादेवत्याभिरितरे ' कथं तेषामिन्द्रो भवन्ति ' मित्रं वयं हवामह इति मैत्रावरुणो यजति ' वरुणं सोमपीतय इति ' यद्धि किं च पीतवत्तदैन्द्रं[13] रूपं ' तेनेन्द्रं प्रीणाति ' मरुतो यस्य हि क्षय इति पोता यजति ' स[14] सुगोपतमो जन इतीन्द्रो वै गोपास्तदैन्द्रं रूपं ' तेनेन्द्रं प्रीणात्यग्ने पत्नीरिहावहेति नेष्टा

---

1) Fehlt in D; 2) °चरन्ति D; 3) °त्यते E; 4) अङ्गिरसं E; 5) Vielleicht °र्त्तिमार्छन्त्यिथ; °मार्छत्यथ A, B, D und F; 6) Fehlt in B; 7) °मार्छत्यथ A, D und F; 8) So corr.; die hss. कस्माद्वाविव; 9) चेव D; 10) मे E; 11) सौम्यं F; 12) यजन्तीन्द्र D; 13) °त्तदैन्द्र D; 14) च D.

यजति ' त्वष्टारं सोमपीतय इति ' यद्वै किं च पीतवत्तदैन्द्रं रूपं ' तेनेन्द्रं प्रीणात्युक्षान्नाय वशान्नायेत्याग्नीध्रो[1] यजति ' सोमपृष्ठाय वेधस इतीन्द्रो वै वेधास्तदैन्द्रं रूपं ' तेनेन्द्रं प्रीणाति ' प्रातर्यावभिरागतं देवेभिर्जेन्यावसू[2] इन्द्राग्नी सोमपीतय इति ' स्वयंसमृद्धा अच्छावाकस्यैवमु हैता ऐन्द्यो[3] भवन्ति ' यन्नानादेवत्यास्तेनान्या देवताः प्रीणाति ' यद्गायत्र्यस्तेनाग्नेय्यस्तस्मादेताभिस्त्रयमवाप्तं भवति ' ॥ २० ॥

ते वै खलु सर्व एव माध्यंदिने प्रस्थितानां प्रत्यक्षादैन्द्रीभिर्यजन्त्यभितृणवतीभिरेके[4] ' पिबा सोममभि यमुग्र तर्द इति होता यजति ' स ईं पाहि य ऋजीषी तरुत्र इति मैत्रावरुण ' एवा पाहि प्रत्नथा[5] मन्दतु त्वेति ब्राह्मणाच्छंस्यर्वाङेहि[6] सोमकामं त्वाहुरिति पोता ' तवायं सोमस्त्वमेह्यर्वाङिति[7] नेष्टेन्द्राय सोमाः प्रदिवो विदाना इत्यच्छावाक ' आपूर्णो अस्य कलशः स्वाहेत्याग्नीध्र ' एवमु हैता अभितृणवत्यो भवन्तीन्द्रो वै प्रातःसवनं नाभ्यतृणत्स एताभिर्माध्यंदिनं सवनमभ्यतृणत्तद्यदेताभिर्माध्यंदिनं[8] सवनमभ्यतृणत्तस्मादेता[8] अभितृणवत्यो भवन्ति ' ॥ २१ ॥

1) °ग्नीध्रा D; 2) °र्जन्यावसू A; °र्जेतावसू E; 3) ऐन्द्रिया A pr. m.; 4) °भिर्यजन्त्यभित्° D; 5) पतुथा A; प्रत्नया D; 6) Ed. B. Ind. °यार्वाङेहि; 7) सोमस्त्वमस्य° D; 8) So corr.; die hss. सवनमभ्यतृणावन्त°.

तदाहुर्यदैन्द्रार्भवं तृतीयसवनमथ कस्मादेक एव तृतीयसवने प्रस्थितानां प्रत्यक्षादैन्द्रार्भव्या यजतीन्द्र[1] ऋभुभिर्वाजवद्भिः[2] समुक्षितमिति होतैव । नानादेवत्याभिरितरे । कथं तेषामैन्द्रार्भव्यो भवन्तीन्द्रावरुणा[3] सुतपाविमं सुतमिति मैत्रावरुणो यजति । युवो रथो अध्वरो देववीतय इति बहूनि वाह । तदृभूणां रूपमिन्द्रश्च[4] सोमं पिबतं बृहस्पत[5] इति ब्राह्मणाच्छंसी यजत्या वां विशन्त्विन्दवः स्वाभुव इति बहूनि वाह । तदृभूणां रूपमा[6] वो वहन्तु सप्तयो रघुष्यद इति पोता यजति । रघुपत्वानः प्र जिगात[7] बाहुभिरिति बहूनि वाह । तदृभूणां रूपममेव नः सुहवा आ हि गन्तनेति नेष्टा यजति । गन्तनेति बहूनि वाह । तदृभूणां रूपमिन्द्राविष्णू[8] पिबतं मध्वो अस्येत्यच्छावाको यजत्या वामन्धांसि मदिराण्यग्मन्निति बहूनि वाह[9] । तदृभूणां रूपमिमं स्तोममर्हते[10] जातवेदस इत्याग्नीध्रो यजति । रथमिव सं महेमा मनीषयेति[11] बहूनि वाह । तदृभूणां रूपमेवमु हैता[12] ऐन्द्रार्भव्यो भवन्ति । यन्नानादेवत्यास्तेनान्या देवताः प्री-

1) यजन्तीन्द्र A sec. m. und B; 2) ऋभुभिर्वा° D; 3) °वरुण E; 4) Von इन्द्रश्च bis आ वो वहन्तु fehlt in F; 5) बृहस्पति D; 6) Von आ वो वहन्तु bis अमेव नः fehlt in B; 7) जिगातु E; 8) °विष्णुं B; °विष्णा E; 9) वा F; 10) स्तोमर्हते E; 11) मनीषिये B; 12) ता D.

णाति ' यद्व जगत्प्रासाद्धा जागतमु वै तृतीयसवनं ' तृतीयसवनस्य समृद्ध्यै ' ॥ २२ ॥

विचक्षणवतीं वाचं भाषन्ते[1] चनसितवतीं[2] ' विचक्षयन्ति ब्राह्मणं ' चनसयन्ति प्राजापत्यं[3] ' सत्यं वदन्त्येतद्धि मनुष्येषु सत्यं यच्चक्षुस्तस्मादाहुराचक्षाणमद्रागिति[4] ' स यदाहाद्राक्षमिति तथाद्धास्य श्रद्दधति ' यद्यु वै स्वयं वै[5] दृष्टं[5] भवति न बहूनां जनानामेव[6] श्रद्दधाति[7] ' तस्माद्विचक्षणवतीं वाचं[8] भाषन्ते चनसितवतीं[9] ' सत्योत्तरा हैवैषां वागुदिता भवति[10] ' ॥ २३ ॥

समृतयज्ञो[11] वा एष यद्दर्शपूर्णमासौ[12] ' कस्य वाव देवा यज्ञमागच्छन्ति कस्य वा न[13] ' बहूनां वा[14] एतद्यजमानानां सामान्यमहस्तस्मात्पूर्वेद्युर्देवताः परिगृह्णीयाद्यो ह वै पूर्वेद्युर्देवताः परिगृह्णाति तस्य श्वो भूते यज्ञमागच्छन्ति[15] ' तस्माद्धिहव्यस्य चतस्र ऋचो जपेद्यज्ञविदो हि मन्यन्ते सोम एव समृत[16] इति यज्ञो यज्ञेन समृतः[16] ' ॥ २४ ॥

---

1) भाषते B; 2) चनसि° B; 3) प्रजापत्यं D; 4) °चक्षपामद्र॰गिति E; 5) Korrupt; B. Ind. वै रिष्टं; 6) जानानामेव E; 7) श्रद्दधति A sec. m.; श्रद्दधन्ति E; 8) Fehlt in D; 9) °तवती D; 10) भवन्ति D; 11) So corr.; die hss. सवृत°; 12) यद् fehlt in B; 13) Fehlt in F; 14) च D; 15) °गच्छति B; 16) So corr.; die hss. सवृत.

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे द्वितीयः प्रपाठकः ॥

ओं देवपात्रं वै वषट्कारो[1] ' यद्वषट्करोति[2] देवपात्रेणैव तद्देवतास्तर्पयत्यथो यदाभितृष्यन्तीरभिसंस्थं[3] तर्पयत्येवमेव तद्देवतास्तर्पयति यदनुवषट्करोति ' तद्यथैवादोऽश्वान्वा गा वा पुनरभ्याकारं[4] तर्पयत्येवमेव तद्देवतास्तर्पयति यदनुवषट्करोतीमानेवाग्नीनुपासत इत्याहुर्धिष्ण्यानथ कस्मात्पूर्वस्मिन्नेवाग्नौ जुह्वति[5] पूर्वस्मिन्वषट्करोति[6] ' यदेव सोमस्याग्ने वीहीत्यनुवषट्करोति[6] तेनैव वषट्करोति धिष्ण्यान्प्रीणात्यथ[7] संस्थितान्सोमान्भक्षयन्तीत्याहुर्येषां[8] नानुवषट्करोति ' तदाहुः को नु सोमस्य स्विष्टकृद्भाग इति ' यदेव[9] सोमस्याग्ने[9] वीहीत्यनुवषट्करोति[9] तेनैव संस्थितान्सोमान्भक्षयन्तीत्याहुः ' स उ एष सोमस्य स्विष्टकृद्भागो[10] यदनुवषट्करोति ' ॥ १ ॥

वज्रो वै वषट्कारः ' स[11] यं द्विष्यात्तं[12] मनसा ध्यायन्वषट्कुर्यात्तंस्मिंस्तद्वज्रमास्थापयति ' षडिति वषट्करोति[13] '

---

1) Fehlt in F; 2) यद् fehlt in F; °ट्कारोति D; 3) यदाभितृष्यन्तीर° A pr. m.; B und F; 4) So corr. nach Ait Br. III 5; die hss. °भ्याधारं; 5) जुहुति E; 6) °षट्कारोति D; 7) अथ fehlt in D und E; 8) Von येषां bis सोमस्य hat E. स उ एष; 9) एव सोमस्याग्ने वीहीति fehlt in E; 10) °भागो A pr. m. und F; 11) स्व D und E; 12) द्विष्यात्तं D; द्विष्यान्त E; 13) वषट्कारोति D.

षड्वा ऋतव ' ऋतूनामाप्त्यै ' वौषडिति वषट्करोत्यसौ[1] वाव वावृतवः[2] षडेतमेव तदृतुष्वादधात्यृतुषु[3] प्रतिष्ठापयति ' तद्ध स्माह वेद[4] एतानि वा[5] एतेन षट्प्रतिष्ठापयति[6] ' द्यौरन्तरिक्षे प्रतिष्ठितान्तरिक्षं[7] पृथिव्यां ' पृथिव्यप्स्वापः सत्ये[8] ' सत्यं ब्रह्मणि ' ब्रह्म तपसीत्येता एव तद्देवताः[9] प्रतिस्थान्याः[10] प्रतितिष्ठन्तीरिदं[11] सर्वमनु प्रतितिष्ठति ' प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद ' ॥ २ ॥

त्रयो वै वषट्कारा ' वज्रो धामच्छद्रिक्तः[12] ' स यदेवोच्चैर्बलं[13] वषट्करोति स वज्रस्तं तं प्रहरति द्विषते भ्रातृव्याय वधं यो ऽस्य स्तृत्यस्तस्मै[14] स्तरीतवे[15] ' तस्मात्स भ्रातृव्यवता[16] वषट्कृत्यो ' ऽथ यः[17] समः[18] संततो निर्हाणाच्छत्स्व[19] धामच्छत्तं तं प्रजाश्च पशवश्चानूपतिष्ठन्ते[20] ' तस्मात्स[21] प्रजाकामेन पशुकामेन वषट्कृत्यो ' ऽथ येनैव

1) वषट्का° D; 2) वा ऋतवः D; 3) °धात्यनुषु D; 4) So corr.; die hss. वेत; 5) व E; 6) वषट्करो प्रति A pr. m.; वषट्प्र° D und E; D fügt न ein; 7) °रिक्षे D; 8) So corr.; die hss. सत्येन; 9) तद्देवतान्याः D; 10) Fehlt in D; 11) So corr.; die hss. प्रतिष्ठ°; 12) यमच्छ° D; 13) So corr.; die hss. बलं; 14) स्तृत्य° D; 15) स्तरीन्तवे F; 16) °व्यवताय D; भ्रातृव्यया E; 17) यत् A sec. m.; यात् A pr. m.; 18) So corr.; die hss. नयः; 19) Korrupt!; 20) पशवश्चात्रनूप° E; 21) तस्मात्सं D.

षडपराध्नोति[1] स रिक्तो[2] 'रिणक्त्यात्मानं[3] रिणक्ति यजमानं[4] 'पापीयान्वषट्कर्ता भवति पापीयान्यस्मै वषट्करोति' तस्मात्तस्याशां नेयात्किं स्वित्स यजमानस्य पापभद्रमाद्रियेतेति ह स्माह यो ऽस्य वषट्कर्ता भवत्यत्रैवैनं[5] यथा कामयेत तथा कुर्याद्यं कामयेत यथैवानीजानो[6] ऽभूत्तथैवेजानः स्यादिति यथैवास्यर्चं ब्रूयात्तथैवास्य वषट्कुर्यात्समानमेवैनं तत्करोति' यं कामयेत पापीयान्स्यादित्युच्चैस्तरामस्यर्चं ब्रूयान्नीचैस्तरां वषट्कुर्यात्पापीयांसमेवैनं तत्करोति' यं कामयेत श्रेयान्स्यादिति नीचैस्तरामस्यर्चं ब्रूयादुच्चैस्तरां वषट्कुर्याच्छ्रेयांसमेवैनं तत्करोति' श्रिय एवैनं तच्छ्रियमादधाति' ॥ ३ ॥

यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायन्वषट्कुर्यात्साक्षादेव तद्देवतां प्रीणाति' प्रत्यक्षाद्देवतां परिगृह्णाति' संततमृचा वषट्कृत्यं' संतत्यै' संधीयते प्रजया पशुभिर्य एवं वेद' ॥ ४ ॥

वज्रो वै वषट्कारः' स उ[7] एष प्रहृतो[8] ऽशान्तो दीदाय' तस्य ह न सर्व एव शान्तिं[9] वेद नो प्रतिष्ठां'

---

1) पराध्नोति A und F; °पराध्येति D; °पराध्नेति E; 2) रक्तो E und F; 3) रिक्त्यात्मानं A, E und F; 4) So corr.; die hss. यजमानस्य; 5) °त्रैवेन D; 6) यथैवानीयो F; 7) Fehlt in E; 8) प्रकृत D; प्रहृत F; 9) शान्ति F.

तस्माद्धाप्येतर्हि[1] भूयानिव मृत्युस्तस्य हैषैव शान्तिरेषा प्रतिष्ठा यद्वागिति ' वषट्कृत्य वागित्यनुमन्त्रयते ' वषट्कार मा मां प्रमृक्षो[2] माहं त्वां प्रमृक्षं बृहता[3] मन उपह्वये[4] व्यानेन शरीरं प्रतिष्ठासि[5] प्रतिष्ठां गच्छ[6] प्रतिष्ठां मा गमयेदिति ' तद्व ह स्माह दीर्घमेवैतत्सदप्रभ्वोजः[7] सह ओज इत्यनुमन्त्रयेतौजश्च ह वै सहश्च वषट्कारस्य[8] प्रियतमे तन्वौ ' प्रियाभ्यामेव तत्तनूभ्यां समर्धयति[9] ' प्रियया तन्वा समृध्यते य एवं वेद ' ॥ ५ ॥

वाक्च वै प्राणापानौ च वषट्कारस्ते[10] वषट्कृते वषट्कृते व्युत्क्रामन्ति ' ताननुमन्त्रयते वागोजः सह ओजो मयि प्राणापानाविति ' वाचं चैव तत्प्राणापानौ च होतात्मनि प्रतिष्ठापयति ' सर्वमायुरेति ' न[11] पुरा जरसः प्रमीयते य एवं वेद ' शं नो भव हृद आ पीत इन्दो[12] पितेव सोम सूनवे सुशेवः । सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीरित्यात्मानं प्रत्यभिमृशतीश्वरो[13] वा एषो[14] ऽप्रत्यभिमृष्टो यजमानस्यायुः प्रत्यव-

1) तस्माद्धा° A und F; तस्माद्दद्धायेतर्हि D; तस्माद्धायेतर्हि E; 2) प्रमृक्ते D; 3) बृहता A; बृहत्या D; 4) उपह्वये D; 5) So corr.; die hss. प्रतिष्ठानि; 6) So corr.; die hss. गच्छन्; 7) So corr.; die hss. °सदः प्रभ्वोजः; 8) So corr.; die hss. वषट्कारश्च; 9) समर्द्धयति E; 10) वषट्कारश्च D; 11) न A pr. m.; 12) So corr.; die hss. इन्द्रो; 13) °श्वरोश्वरो D; 14) एषा F.

हर्तुमनर्हन्मा[1] भक्षयेदिति ' तद्यदेतेन प्रत्यभिमृशत्यायुरेवास्मै तत्प्रतिरत[2] ' आप्यायस्व सं ते पयांसीति द्वाभ्यां चमसानाप्याययन्त्यभिरूपाभ्यां ' यद्यज्ञे ऽभिरूपं तत्समृद्धम् ' ॥ ६ ॥

प्राणा वा ऋतुयाजास्तं यदृतुयाजैश्चरन्ति प्राणानेव तद्यजमाने दधति ' षड्ऋतुनेति[3] यजन्ति ' प्राणमेव तद्यजमाने दधति ' चत्वार ऋतुभिरिति[4] यजन्त्यपानमेव तद्यजमाने दधति ' द्विर्ऋतुनेत्युपरिष्टाद्व्यानमेव तद्यजमाने दधति ' स[5] चासु संभृतस्त्रेधा विहृतः प्राणो ऽपानो व्यान इति ' ततो ऽन्यत्र[6] गुणितस्तथा ह यजमानः सर्वमायुरेत्यस्मिंल्लोक आप्नोत्याप्नोत्यमृतत्वमक्षितं स्वर्गे लोके ' ते वा एते प्राणा एव यदृतुयाजास्तस्मादनवानन्तो[7] यजन्ति ' प्राणानां सन्तत्यै ' सन्तता इव[8] हीमे प्राणा ' अथो ऋतवो वा ऋतुयाजाः ' संस्थानुवषट्कारो ' यो ऽत्रानुवषट्कुर्यादसंस्थितानृतून्संस्थापयेद्यांस्तं तत्र ब्रूयादसंस्थितानृतून्समतिष्ठिपद्दुःषमं[9] भविष्यतीति शश्वत्तथा स्यात् ' ॥ ७ ॥

तदाहुर्यद्धोता यक्षद्धोता यक्षदिति मैत्रावरुणो होत्रे

1) So corr.; die hss. प्रत्यविर्हर्तुर्मनरिहन्मा; 2) °रत्त D; 3) षड्तूनेव D; 4) इति fehlt in den hss.; 5) सा D; 6) ऽन्यत A pr. m.; 7) °नवानं ततो E; 8) एव D; 9) So corr. nach Ait. Br. II 29. 7; die hss. °न्समतिस्तियो दुःस्वमं; D समतिष्टिपादुःस्वमं.

प्रेष्यत्यथ कस्माद्धोतृभ्यः सद्भ्यो होत्राशंसिभ्यो होता यजद्धोता यजदिति प्रेष्यतीति ' वाग्वै होता वाक्सर्व ऋत्विजो ' वाग्यजद्वाग्यजदित्यथो[1] सर्वे वा एते सप्त होतारो ऽपि वा[2] ऋचाभ्युदितं सप्त होतार ऋतुथा[3] यजन्तीत्यथ य[4] उपरिष्टाद्द्वादशर्चजामितायै[4] ' ते वै द्वादश भवन्ति ' द्वदश[5] वै[6] मासाः संवत्सरः ' संवत्सरः प्रजापतिः ' प्रजापतिर्यज्ञः ' स यो ऽत्र भक्षयेद्यस्तं तत्र ब्रूयादशान्तो भक्षो ऽनानुवषट्कृत आत्मानमन्तरगान्न[7] जीविष्यतीति तथा ह स्याद्यो वै भक्षयेत्प्राणो भक्षः प्राण आत्मानमन्तरगादिति तथैव[8] भवति ' लिम्पेदिवैवावजिघ्रेदत्र[9] च[10] द्विदेवत्येषु[11] चेति ' तद्ध तत्र शासनं[12] वेदयन्ते ' ऽथ यदमू व्यभिचरतो[13] नान्योन्यमनुप्रपद्येते[14] अध्वर्यू तस्मादृतुर्ऋतुं[15] नानुप्रपद्यते[16] ॥ ८ ॥

प्रजापतिर्वै यत्प्रजा असृजत ता वै तान्ता असृजत ' ता हिंकारेणैवाभ्यजिघ्रत्ताः[17] प्रजा अश्वमारंस्तद्वध्यते[4]

---

1) वाग्यजा° A pr. m. und F; °यजदित्ययो D; 2) व D; वा E; 3) ? ?; 4) Korrupt; 5) द्वदर्श A; 6) ह वे D; 7) °न्तरंगान्न D; 8) A, E und F fügen ह ein; 9) So corr.; die hss. लिम्पेद्दितेवावजि°; °घ्रेत्त्र A, D und F; °घ्रेतत्र E; 10) So corr.; die hss. तद्; 11) द्वि-देवत्येषु A, D und F; 12) शाः सनं E; 13) °चरितो D; 14) °प्रपा-द्येते D; 15) °ऋतुर्ऋतुं A, D und E; 16) °द्येते A, E und F; °द्यत D; 17) °जिघ्रंस्ताः D.

वा एतद्यज्ञो यद्धवींषि पच्यन्ते यत्सोमः सूयते[1] यत्प-
शुरालभ्यति' हिंकारेण वा एतत्प्रजापतिर्हुतमभिजिघ्रति[2]
यज्ञस्याहुततायै[3] यज्ञस्यात्यै यज्ञस्य वीर्यवत्ताया[4] इति'
तस्मात्तु[5] हिंक्रियते' तस्मात्तु य[6] एव पिता पुत्राणां
सूर्जति स[7] श्रेष्ठो भवति[8]' प्रजापतिर्हि तमभिजिघ्रति'
यच्छकुनिराण्डमध्यास्ते[9] यन्न[10] सूयते[11] तद्धि सापि[12]
हिंकृणोत्यथो खल्वाहुर्महर्षिर्वा[13] एतद्यज्ञस्याग्रे[14] गे-
यमपश्यत्तदेतद्यज्ञस्याग्रे[15] गेयं यद्धिंकारस्तं देवाश्च ऋषय-
श्चाब्रुवन्वसिष्ठो[16] ऽयमस्तु यो नो यज्ञस्याग्रे गेयमद्रागि-
ति[17]' तदेतद्यज्ञस्याग्रे[18] गेयं यद्धिंकारस्ततो वै स देवानां
श्रेष्ठो ऽभवद्येन वै श्रेष्ठस्तेन वसिष्ठस्तस्माद्यस्मिन्वासि-
ष्ठो ब्राह्मणः[19] स्यात्तं[19] दक्षिणाया.[20] नान्तरीयात्तथा
हास्य प्रीतो हिंकारो भवत्यथ[21] देवाश्च ह वा ऋषयश्च
यदृक्सामे अपश्यंस्ते ह स्मैते अपश्यंस्तौ यत्रैते अपश्यंस्तत

---

1) अूयते D; 2) So corr.; die hss. °र्हितमभि; statt अभिजिघ्रति ist ein Impf. oder Perf. zu erwarten; 3) °हुतायै F; 4) So corr.; die hss. °त्तया; 5) तस्मा D; 6) ? ? vielleicht यम्; 7) Fehlt in F; 8) भवन्ति F; 9) °मध्य आस्ते A pr. m.; D und E; 10) यन्नः A pr. m.; 11) अूयते D; 12) ? D स्यापि; 13) °र्हर्षी E; 14) य तयज्ञ D; 15) गयमप° D; 16) ऋषयश्चाब्रु° E; 17) गेयमस्याद्रागिति F; 18) तयदेतय° A pr. m. und F; 19) ब्राह्मणास्यात्तं F; 20) दक्षिणाया A, D und F; 21) °त्यथा D.

एवैनं सर्वं[1] दोहमदुहंस्तौ वा एते दुग्धे यातयामे ये ऋक्सामे ' ते हिंकारेणैवाप्यायेते ' हिंकारेण वा ऋक्सामे आपीने यजमानाय दोहं दुहाते ' तस्माद्धिंकृत्याध्वर्यवः सोममभिषुण्वन्ति ' हिंकृत्योद्गातारः साम्न स्तुवन्ति ' हिंकृत्योक्थश[2] ऋचार्त्विज्यं कुर्वन्ति ' हिंकृत्याथर्वाणो ब्रह्मत्वं कुर्वन्ति ' तस्माद्धिं क्रियते ' प्रजापतिर्हि तमभिजिघ्रत्यथो[3] खल्वाहुरेको वै प्रजापतेर्व्रतं बिभर्ति गौरेव ' तदुभये पशव उपजीवन्ति ये च ग्राम्या ये[4] चारण्या इति ' ॥ ९ ॥

देवविशः कल्पयितव्या इत्याहुश्छन्दश्छन्दसि प्रतिष्ठाप्यमिति ' शंसावोमित्याह्वयते प्रातःसवने त्र्यक्षरेण शंसावो दैवेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरेण[5] ' तदष्टाक्षरं[6] संपद्यते ' ऽष्टाक्षरा वै गायत्री ' गायत्रीमेवैतत्पुरस्तात्प्रातःसवने ऽचीक्लृपतामुक्थं वाचीत्याह[7] शस्त्वा चतुरक्षरमोमुक्थशा इत्यध्वर्युः प्रतिगृणाति चतुरक्षरं तदष्टाक्षरं संपद्यते ' ऽष्टाक्षरा वै गायत्री[8] ' गायत्रीमेवैतदुभयतः प्रातःसवने ऽचीक्लृपतामध्वर्यो शंसावोमित्या-

---

1) सर्त्रं D; 2) So corr.; die hss. °ग्रस; 3) तमभिजिप्रत्ययो E; 4) न D; 5) So corr.; die hss. °क्षरं; 6) Fehlt in F; 7) वाचीन्याह E; 8) Fehlt in A, E und F.

ह्वयते माध्यंदिने षडक्षरेण ' शंसावो दैवेत्यध्वर्युः प्रति-
गृणाति पञ्चाक्षरेण[1] ' तदेकादशाक्षरं[2] संपद्यत ' एका-
दशाक्षरां[3] वै त्रिष्टुप्त्रिष्टुभमेवैतत्पुरस्तान्माध्यंदिने[4] ऽची-
क्लृपतामुक्थं वाचीन्द्रायेत्याह शस्त्वा षडक्षरमोमुक्थशा
यजेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरं ' तदेकादशाक्षरं संप-
द्यत ' एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुभमेवैतदुभयतो माध्यंदिने
ऽचीक्लृपतामध्वर्यो शंशंसावोमित्याह्वयते तृतीयसवने स-
प्ताक्षरेण ' शंसावो दैवेत्यध्वर्युः प्रतिगृणाति पञ्चाक्षरं '
तद्द्वादशाक्षरं संपद्यते ' द्वादशाक्षरा वै जगती[5] ' जगती-
मेवैतत्पुरस्तात्तृतीयसवने ऽचीक्लृपतामुक्थं[6] वाचीन्द्राय
देवेभ्य इत्याह शस्त्वा नवाक्षरमोमुक्थशा[7] इत्यध्वर्युः
प्रतिगृणाति त्र्यक्षरं ' तद्द्वादशाक्षरं संपद्यते ' द्वादशाक्षरा[8]
वै जगती ' जगतीमेवैतदुभयतस्तृतीयसवने ऽचीक्लृपता-
मित्येतद्वै तच्छन्दश्छन्दसि प्रतिष्ठापयति ' कल्पयत्येव देव-
विशो य एवं वेद ' तदप्येषाभ्यनूक्ता यद्गायत्रे अधि गा-
यत्रमाहितमिति ' ॥ १० ॥

अथैतन्नाना छन्दांस्यक्षरेण गर्ता इवाथैते स्थविष्टे[9]

---

1) So corr.; die hss. °क्षरं; 2) °क्षरां A pr. m.; 3) °शाक्षर D; 4) °त्पुरस्तन्मा° E; 5) Fehlt in D; 6) ऽचीक्लृप्तामुक्थं E; 7) ?, ओमुक्थशा ist viersilbig; Kauṣ. Br. XIV 3 hat उक्थशा; 8) °क्षरां E; 9) अविष्टे A pr. m., D, E und F.

बलिष्ठे नान्तरे[1] देवते[2] ' ताभ्यां प्रतिपद्यते ' तद्गर्तस्कन्दं रोहस्य रूपं स्वर्ग्यं[3] ' तदनवानं[4] संक्रामेदमृतं वै प्रणवो[5] ' ऽमृतेनैव तन्मृत्युं तरति ' तद्यथा मत्येन[6] वा वंशेन[7] वा गर्तं[8] संक्रामेदेवं तत्प्रणवेनोपसंतनोति[9] ' ब्रह्म ह वै प्रणवो ' ब्रह्मणैवास्मै तद्ब्रह्मोपसंतनोति ' शुद्धः[10] प्रणवः स्यात्प्रजाकामानां ' मकारान्तः प्रतिष्ठाकामानां ' मकारान्तः प्रणवः स्यादिति हैक आहुः ' शुद्ध इति त्वेव स्थितो ' मीमांसितः प्रणवो[11] ' ऽयात इह शुद्ध इह पूर्ण इति ' शुद्धः प्रणवः स्याच्छंस्त्रानुवचनयोर्मध्य[12] इति ह स्माह कौषीतकिस्तथा संहितं भवति ' मकारान्तो ऽवसानार्थे[13] ' प्रतिष्ठा वा अवसानं ' प्रतिष्ठित्या एवांयोभयोः कामयोराप्त्या ' एतौ वै छन्दःप्रवाहाववरं छन्दः परं[14] छन्दो ऽतिप्रवहतस्तस्यायुर्न[15] हिनस्ति ' छन्दसां छन्दो ऽतिप्रोढं[16] स्यात्तत्रैव[17] यं द्विष्यात्तं मनसा प्रैव विध्येच्छंन्दसां कृन्तत्रे[18] द्रवति वा[19] सं[19] वा शी-

1) ? नान्तर D; नान्तरेण E; vielleicht अनार्ते; 2) So corr. nach K. Br.; die hss. lesen व्रते; 3) So corr. die hss. स्वर्यं; 4) So corr.; die hss. तदनुवानं; 5) प्राणावो D und E; 6) So corr. nach Kauś. Br. XI 4; die hss. lesen मन्त्रेण; 7) वंसेन D und E; 8) गर्भं E; 9) प्रणावनो° D; प्रणावेनो° E; 10) शुद्धः A; 11) प्राणावो E; 12) स्याच्छ्रानानु° E; 13) °नार्थं E; 14) पर D; 15) °स्तस्त्वायुर्न E; 16) ऽतिप्रोढं A; 17) Die hss. °यत्रैव; 18) So corr.; die hss. क्रन्दत्रे; E क्रन्दत्रै; 19) So corr.; die hss. वाचं.

र्यत इति । त्रिः प्रथमां त्रिरुत्तमामन्वाह । यज्ञस्यैव तद्ब-र्हिसो[1] ॰नह्यति । स्थेम्ने[2] बलायाविस्रंसाय । यद्यपि छन्दः प्रातःसवने युज्येतार्धर्चश एव[3] तस्य शंस्यं[4] गायत्र्या रूपेणांयो[5] प्रातःसवनरूपेणेति । न त्रिष्टुब्जगत्यावेतस्मिन्स्थाने ऽर्धर्चशस्ये[6] यत्किंचिच्छन्दः प्रातःसवने युज्येतां[7] यच्छ एवैनयोः शस्यमिति[8] सा स्थितिः । ॥ ११ ॥

अथात एकाहस्य प्रातःसवनं । प्रजापतिं[9] ह वै यज्ञं तन्वानं बहिष्पवमान एव मृत्युर्मृत्युपाशेन[10] प्रत्युपाक्रामत । स आग्नेय्या गायत्र्याज्यं प्रत्यपद्यत । मृत्युर्वाव[11] तं[12] पश्यन्प्रजापतिं[13] पर्यक्रामत्तं[14] सामाज्येष्वसीदत्स[15] वायव्या प्रउगं प्रत्यपद्यत । मृत्युर्वाव तं[16] पश्यन्प्रजापतिं[17] पर्यक्रामत्तं माध्यंदिने पवमाने ऽसीदत्स ऐन्द्या[18] त्रिष्टुभा[19] मरुत्वतीयं प्रत्यपद्यत । मृत्युर्वाव तं[16] पश्यन्प्रजापतिं[20] पर्यक्रामत्स तेनैव द्रविणे पूर्वो निष्केवल्यस्य स्तोत्रियमासीदत्तमस्तृणोत्तस्मात्त य एव पूर्वमासीदति

---

1) Korrupt; Ait. Br. तद्बर्सं; 2) स्थेन्ने D; 3) एवं A sec. m.; 4) शंस्यां E; 5) रूपेणायों E; 6) °शस्य D; 7) युज्यतां F; 8) शंस्यमिति A pr. m.; ??; 9) °पति E; 10) मृत्युं मृत्यु° A, E und F; 11) °र्वावा E; 12) दं A pr. m.; D und E; दे F; 13) पश्यत्प्रजा° E; 14) पर्यक्रमन्नं D; 15) ?? vielleicht सामाज्येष्वसीदत्स; 16) दं A pr. m. und D; 17) पश्यत्प्र° E; 18) ऐन्द्रा D; 19) तष्टुभा E; 20) पश्यत्प्र° E.

स तत्स्तृणुते विद्वान्मृत्युरनवकाशमपाद्रवदशंसदितरो निष्केवल्यं ' तस्मादेकमेवोक्थं[1] होता मरुत्वतीयेन[2] प्रतिपद्यते निष्केवल्यमेवात्र हि प्रजापतिं[3] मृत्युर्व्यजहात् ' ॥ १२ ॥

मित्रावरुणावब्रवीद्युवं न इमं[4] यज्ञस्याङ्गमनुसमाहरतं[5] मैत्रावरुणीयां ' नयेत्यब्रूतां ' तौ सयुजौ सबलौ भूत्वा प्रासह्य[6] मृत्युमत्यैतां[7] ' तौ ह्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां मैत्रावरुणीयां ' तस्मान्मैत्रावरुणः प्रातःसवने मैत्रावरुणानि शंसति ' तौ ह्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां ' यद्वेव मैत्रावरुणानि शंसति प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैरुत वामुषसो बुधि[8] साकं सूर्यस्य रश्मिभिरित्यृचाभ्यनूक्तमा नो मित्रावरुणा नो गन्तं[9] रिशादसेति[10] मैत्रावरुणस्य स्तोत्रियानुरूपौ ' प्र वो मित्राय गायतेत्युक्थमुखं[11] ' प्र मित्रयोर्वरुणयोरिति पर्यास ' आ यातं मित्रावरुणेति यजत्यैते एव तद्देवते यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[12] ' नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ १३ ॥

---

1) तस्मादेका° D; 2) मरुचतीयेन D; 3) प्रजापति F; 4) इन E; 5) So corr.; die hss. °रतां; 6) प्रसहा D; 7) मृत्यम° E; 8) बुधिः E; 9) गन्त D; 10) रिशादासोति A pr. m.; 11) °त्युकमुखं E; 12) प्रत्यचा° D.

इन्द्रमब्रवीत्त्वं न इमं[1] यज्ञस्याङ्गमनुसमाहर[2] ब्राह्मणाच्छंसीयां ' केन सहेति[3] ' सूर्येणेति ' तथेत्यब्रूतां ' तौ सयुजौ सबलौ भूत्वा[4] प्रासहा मृत्युमत्यैतां ' तौ ह्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां[5] ब्राह्मणाच्छंसीयां ' तस्माद्ब्राह्मणाच्छंसी प्रातःसवन ऐन्द्राणि सूर्यन्यङ्गानि शंसति ' तौ ह्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां[5] ' यद्वेवैन्द्राणि सूर्यन्यङ्गानि शंसतीन्द्र पिब प्रतिकामं सुतस्य[6] प्रातःसावस्तव हि पूर्वपीतिरित्यृचाभ्यनूक्तमां[7] . याहि सुषुमा हि त आ नो याहि सुतावत[8] इति ब्राह्मणाच्छंसिन स्तोत्रियानुरूपावयमु त्वा विचर्षण इत्युक्थमुखमुद्वेदभिश्रुतामघमिति[9] पर्यास ' इन्द्र क्रतुविदमिति यजत्येते एव तद्देवते यथाभागं प्रीणाति[10] ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[11] ' नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ १४ ॥

इन्द्राग्नी अब्रवीद्युवं न इमं यज्ञस्याङ्गमनुसमाहरतमच्छावाकीयां[12] ' तथेत्यब्रूतां ' तौ[13] सयुजौ[14] सबलौ[15] भूत्वा प्रासहा मृत्युमत्यैतां ' तौ[16] ह्यस्यैतद्यज्ञस्याङ्गमनुस-

---

1) इम D; 2) So corr.; die hss. °समाहरन्; 3) सहेति E; 4) सभूत्वा A und F; 5) °समहारतां D; 6) सूतस्य A; 7) °नूक्तामा F; 8) सुतवत A pr. m.; 9) °तामध्यमिति E; 10) प्रीणाते D; 11) °मृशन्त D; 12) So corr.; die hss. °समाहरताम°; 13) तो D und F; 14) सयुजो D; 15) सबलो D; 16) तो D.

माहरतामच्छावाकीयां[1] 'तस्मादच्छावाकः[2] प्रातःसवन ऐन्द्राग्नानि शंसति' तौ[3] ह्यस्यैतद्यज्ञस्याङ्गमनुसमाहरतां[4] ' यद्देवैन्द्राग्नानि[5] शंसति प्रातर्यावभिरागतं देवेभिर्जेन्यावसू इन्द्राग्नी सोमपीतय इत्यृचाभ्यनूक्तमिन्द्राग्नी आगतं ' तोषा वृत्रहणा हुव इत्यच्छावाकस्य स्तोत्रियानुरूपाविन्द्राग्नी अपसस्परीत्युक्थमुखमिहेन्द्राग्नी[6] उपह्वय[7] इति पर्यास' इन्द्राग्नी आगतमिति यजत्येते एव तद्देवते यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[8] ' नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ १५ ॥

अथ शंसावोमिति स्तोत्रियायानुरूपायोक्थमुखाय[9] परिधानीयाया[10] इति चतुश्चतुराह्वयन्ते[11] ' चतस्रो वै दिशो[12] ' दिक्षु तत्प्रतितिष्ठन्त्यथो[13] चतुष्पादः पशवः ' पशूनामाप्त्या ' अथो चतुष्पर्वाणो[14] हि प्रातःसवने होत्रकास्तस्माच्चतुः सर्वे गायत्राणि शंसन्ति[15] 'गायत्रं हि प्रातःसवनं ' सर्वे समवतीभिः परिदधति ' तद्यत्समवतीभिः

---

1) So corr.; die hss. °समहारताम°; 2) °च्छवाकः E; 3) तो D; 4) °समहारतां D; 5) यद्द्देवैन्द्रा° D; यद्वैवैन्द्रा° E; 6) °न्द्राग्नीं E; 7) उपहूय E; 8) °मृशते E; 9) स्तोत्रियानु° F; 10) परीधा° E; 11) °रहूयन्ते E; 12) Fehlt in D; 13) So corr.; die hss. तत्प्रतिष्ठ°; 14) °र्वाणो D und E; 15) शंसति D.

परिदधत्यन्तो[1] वै पर्यासो ' ऽन्त उदर्को ' ऽन्तेनैवान्तं[2] परि-
दधति[3] ' सर्वे मद्वतीभिर्यजन्ति[4] ' तद्यन्मद्वतीभिर्यजन्ति[5]
सर्वे सुतवतीभिः[6] पीतवतीभिरभिरूपाभिर्यजन्ति ' यद्यज्ञे
ऽभिरूपं तत्समृद्धं ' सर्वे ऽनुवषट्कुर्वन्ति ' स्विष्टकृत्वानुव-
षट्कारो[7] ' नेत्स्विष्टकृतमन्तरयामेत्ययं वै लोकः प्रातःस-
वनं ' तस्य पञ्च दिशः पञ्चोक्थानि प्रातःसवनस्य ' स एतैः
पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोत्येताः पञ्च दिश आ-
प्नोति ' ॥ १६ ॥

घ्नन्ति[8] वा एतत्सोमं यदभिषुण्वन्ति ' यज्ञं वा एतद्घ्नन्ति
यद्दक्षिणा नीयन्ते ' यज्ञं वा एतद्दक्षयन्ति[9] ' तद्दक्षिणानां
दक्षिणात्वं ' स्वर्गो वै लोको माध्यंदिनं[10] सवनं ' यन्मा-
ध्यंदिने सवने दक्षिणा नीयन्ते स्वर्गस्य लोकस्य समष्ट्यै '
बह्व देयं ' सेतुं वा एतद्यजमानः संस्कुरुते ' स्वर्गस्य लो-
कस्याक्रान्त्यै प्रजाक्रान्त्यै[11] ' द्वाभ्यां गार्हपत्ये जुहोत्यध्वर्यु-
रस्याक्रान्तेनाक्रामयत्याग्नेय्याग्नीध्रीये[12] ' ऽन्तरिक्षं तेन ' य-
न्माध्यंदिने सवने दक्षिणा नीयन्ते स्वर्ग[13] एतेन लोके '

1) परिदधात्यन्तो° A pr. m.; 2) °वान्त D; 3) °दधाति A pr. m.; 4) मद्विती° F; 5) तद्यन्मध्वती° D; 6) सूतव° A sec. m.; 7) °कृत्वा अनु° A, E und F; 8) घन्ति E; 9) So corr.; die hss. एताःसन्न् क्षियन्ति; 10) मध्यंदिनं D; 11) Fehlt in D; ? vielleicht प्रत्याक्रान्त्यै; 12) °क्रमयत्या° A, E und F; °ग्नीध्रीयेत्य F; 13) स्वर्गा F.

हिरण्यं[1] हस्ते भवत्यथ नयति ' सत्यं वै हिरण्यं ' सत्येनैवैनं तन्नयत्यग्रेण गार्हपत्यं जघनेन सदो ऽन्तराग्नीध्रीयं च सदश्च ' ता उदीचीरन्तराग्नीध्रीयं च सदश्च चात्वालं चोत्सृजन्त्येतेन ह स्म वा अङ्गिरसः स्वर्गं लोकमायंस्तां वा एताः पन्थानमभिवहन्ति ' ॥ १७ ॥

अग्नीधे[2] ऽग्रे ददाति ' यज्ञमुखं वा अग्नीद्यज्ञमुखेनैव तद्यज्ञमुखं समर्धयति ' ब्रह्मणे ददाति ' प्राजापत्यो[3] वै ब्रह्मा ' प्रजापतिमेव तया[4] प्रीणात्यृत्विग्भ्यो ददाति ' होत्रा एव तया प्रीणाति ' सदस्येभ्यो ददाति ' सोमपीथं[5] तया निष्क्रीणीते ' न हि तस्मा अर्हति सोमपीथं[6] तया निष्क्रीणीयाद्यां[7] शुश्रुवुष[8] आर्षेयाय[9] ददाति देवलोके तयार्ध्नोति ' यामशुश्रुवुषे[10] ऽनार्षेयाय ददाति मनुष्यलोके तयार्ध्नोति ' यामप्रसृताय[11] ददाति वनस्पतयस्तया प्रयन्ते[12] ' यां[13] याचमानाय ददाति भ्रातृव्यं तया जिन्वीते[14] ' यां भीषा क्षत्रं तया ब्रह्मातीयाद्यां[15] प्रतिनुदन्ते सा

---

1) हिरण्य D; 2) So corr.; आग्नीध्रे A, D, E und F; अग्नीध्रे A sec. m.; 3) प्रजापत्यो A pr. m. und D; 4) So corr.; die hss. तेन; 5) So corr.; die hss. °पीथम्; 6) °पीथस् A, D und E; 7) याद्या D; 8) So corr.; शुश्रूवुष A, D und F; शुश्रूवुषेन् E; 9) आर्षेयय E; 10) So corr.; die hss. °शुश्रूवुषे; 11) न प्रसृताय D; 12) प्रयते D; 13) Fehlt in D; 14) ? ? 15) ब्रह्मानी° A sec. m., D und F.

व्याघ्री दक्षिणा। यस्तां पुनः प्रतिगृह्णीयाद्व्याघ्र्येनं[1] भूत्वा प्रव्लीनीयाद्दन्यया सह प्रतिगृह्णीयादथ हैनं न प्रव्लीनाति। ॥ १८ ॥

यद्गां ददाति वैश्वदेवी वै गौर्विश्वेषामेव तद्देवानां तेन प्रियं धामोपैति। यदजं[2] ददात्याग्नेयो वा अजो। ऽग्नेरेव तेन प्रियं धामोपैति। यदविं ददात्याव्यं तेनावजयति[3]। यत्कृतान्नं ददाति मांसं[4] तेन निष्क्रीणाति। यदनो वा रथो वा ददाति[5] शरीरं तेन। यद्वासो[6] ददाति बृहस्पतिं तेन। यद्धिरण्यं ददात्यायुस्तेन वर्षीयः[7] कुरुते। यदश्वं ददाति सौर्यो वा अश्वः। सूर्यस्यैव तेन प्रियं धामोपैत्यन्ततः प्रतिहर्त्रे देयं। रौद्रो वै प्रतिहर्ता। रुद्रमेव तन्निरवजयति[8]। यन्मध्यतः प्रतिहर्त्रे दद्यान्मध्यतो रुद्रमन्ववयजेत्स्वर्भानुर्वा[9] आसुरः[10] सूर्यं तमसाविध्यत्तंदत्रिरपनुनोद[11]। तदत्रिरन्वपश्यच्चंदात्रेयाय[12] हिरण्यं ददाति तम एव तेनापहते। ऽथो ज्योतिरुपरिष्टाद्धारयति[13]। स्वर्गस्य लोकस्य समष्ट्यै। ॥ १९ ॥

---

1) So corr.; die hss. °द्व्याघ्रोह्नेनं; 2) यदज्ञ A pr. m.; 3) तेनाप° A pr. m.; E und F; 4) मांत E; 5) Fehlt in den hss.; 6) यद्वा-ग्गो D; 7) वर्सय: D; 8) °न्निरवज्ञेयन्ति A pr. m.; 9) रुद्रमन्ववयज्ञात्स्व° F; 10) So corr.; die hss. आसुरि:; 11) °त्रेरपनुनोद E; 12) °त्रेयया D; 13) °द्धदारयति D.

अथात एकाहस्यैव माध्यंदिनमृक्च[1] वा इदमग्रे साम चास्तां[2] ' सैव नामर्गासीदमो[3] नाम साम ' सा वा[4] ऋक्सामोपावदन्मिथुनं[5] संभवाव प्रजात्या[6] इति ' नेत्यब्रवीत्साम ' ज्यायान्वा अतो मम महिमेति ' ते द्वे भूत्वोपावदतां ' ते न प्रति[7] चन[7] समवदत ' तास्तिस्रो भूत्वोपावदन्यत्तिस्रो भूत्वोपावदंस्तत्तिसृभिः समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवन्ति ' तिसृभिरुद्गायन्ति ' तिसृभिर्हि साम[8] संमितं भवति ' तस्मादेकस्य बह्व्यो जाया भवन्ति ' न[9] हैकस्या बहवः सह पतयो ' यद्वै[10] तत्सा[10] चामश्च समवदतां तत्सामाभवत्तत्साम्नः[11] सामत्वं ' सामन्भवति ' श्रेष्ठतां गच्छति ' यो वै भवति स सामन्भवत्यसामन्य इति ह निन्दन्ते ' ते वै पञ्चान्यद्भूत्वा पञ्चान्यद्भूत्वाकल्पेतामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा चर्गुद्गीथश्च[12] मध्यमा च प्रतीहारश्चोत्तमा च निधनं च वषट्कारश्च ' ते यत्पञ्चान्यद्भूत्वा पञ्चान्यद्भूत्वाकल्पेतां तस्मादाहुः पाङ्क्तो यज्ञः ' पाङ्क्ताः[13] पशव इति ' यद्व विराजं दशिनीमभिसं-

---

1) माध्यंदिन सवनमृक्च D; 2) यास्तां E; वास्तां A und D; 3) नामार्गासीदमो A pr. m., E und F; 4) Fehlt in D; 5) ऋक्सामोपावि° D; 6) प्रजापत्या A pr. m. und D; प्राजापत्या E; 7) So corr.; die hss. प्रतिवचनं; 8) सन्न D; 9) नै E; 10) यद्वैतत्सा A; 11) तत्सामा° D; 12) So corr. nach Ait. Br., die hss. चोद्गीथश्च; 13) Fehlt in D.

पद्येतां[1] तस्मादाहुर्विराजि[2] यज्ञो दशिन्यां[3] प्रतिष्ठित इति ' यद्वै बृहत्या[4] प्रतिपद्यते बार्हतो वा एष य[4] एष[4] तपति ' तदेनं स्वेन रूपेण समर्धयति ' द्वे तिस्रः करोति पुनरादायं ' प्रजात्यै[5] रूपं ' द्वाविवाग्रे भवतस्तत[6] उपप्रजायेते ' ॥ २० ॥

आत्मा वै स्तोत्रियः ' प्रजा अनुरूपः ' पत्नी धाय्या[7] ' पशवः[8] प्रगाथो ' गृहाः सूक्तं ' यदन्तरात्मंस्तन्निवित्प्रतिष्ठा[9] परिधानीयान्नं याज्या ' सो ऽस्मिंश्च लोके भवत्यमुष्मिंश्च[10] प्रजया च पशुभिश्च गृहेषु भवति य एवं वेद ' ॥ २१ ॥

स्तोत्रियं शंसत्यात्मा वै स्तोत्रियः ' स मध्यमया वाचा शंस्तव्य[11] ' आत्मानमेवास्य[12] तत्कल्पयत्यनुरूपं[13] शंसति ' प्रजा वा अनुरूपस्तस्मात्प्रतिरूपमनुरूपं कुर्वन्ति ' प्रतिरूपो हैवास्य प्रजायामाजायते नाप्रतिरूपस्तस्मात्प्रतिरूपमनुरूपं कुर्वन्ति ' स उच्चैस्तरामिव शंस्तव्यः[14] ' प्रजामेवास्य तच्छ्रे-

---

1) दशनी° A, D und E; °पद्यते याता A pr. m. und F; °पद्ये यातां A sec. m. und E; 2) So corr.; die hss. °विराज्ञो; 3) दशान्यां A, E und F; 4) Fehlt in F; 5) प्रजापत्यौ A pr. m.; 6) भवति तत A pr. m.; तत fehlt in D; 7) धाया E; 8) पशवः D; 9) °त्प्रतिष्ठां D; A pr. m. fügt वै ein; 10) भवति interpolation; 11) शंस्तव्यं A pr. m.; 12) °वास्या A pr. m.; 13) यत्कल्प° D; 14) शंस्तव्या E.

यसीं करोति ' धाय्यां शंसति ' पत्नी वै धाय्या ' सा नीचैस्तरामिव शंस्तव्याप्रतिवादिनी[1] हैवास्य गृहेषु पत्नी भवति यत्रैवं विद्वान्नीचैस्तरां धाय्यां शंसति ' प्रगाथं शंसति ' पशवो वै प्रगाथः ' सः स्वरवत्या वाचा शंस्तव्यः[2] ' पशवो[3] वै[3] प्रगाथः[3] ' पशवः स्वरः ' पशूनामाप्त्यै ' सूक्तं शंसति[4] ' गृहा वै सूक्तं ' प्रतिवीतं ' तत्प्रतिवीततमया[5] वाचा शंस्तव्यं[6] ' स यद्यपि ह दूरात्पशूंल्लभते[7] गृहानेवैनानाजिगमिषति[8] ' गृहा हि पशूनां प्रतिष्ठा ' निविदं शंसति[4] ' यदन्तरात्मंस्तन्निवित्तंदेवास्य[9] तत्कल्पयति ' परिधानीयां शंसति ' प्रतिष्ठा वै परिधानीया[10] ' प्रतिष्ठायामेवैनं[11] ततः प्रतिष्ठापयति ' याज्यया यजत्यन्नं वै याज्यान्नाद्यमेवास्य तत्कल्पयति ' मूलं वा एतद्यज्ञस्य यद्धाय्याश्च याज्याश्च ' तद्यदन्या अन्या धाय्याश्च याज्याश्च कुर्युरुन्मूलमेव तद्यज्ञं कुर्युस्तस्मात्ताः समान्य एव स्युः ॥ २२ ॥

तदाहुः किंदेवत्यो यज्ञ इत्यैन्द्र इति ब्रूयादैन्द्रे वाव

---

1) °दिना A sec. m.; °दिनि A pr. m.; 2) शंस्तव्या A pr. man. und E; 3) Fehlt in A; 4) शंसन्ति E; 5) तत्प्रतिवीतं तमया A sec. m. und F; 6) शंस्तव्यः A sec. m. und F; 7) °लभन्ते D; 8) °मिषाति A pr. m.; 9) °न्नदेवास्य A, D und F; 10) °नीयां A sec. m.; 11) So corr. nach Kauṣ. Br. XV 4; die hss. प्रतिष्ठाया एवैनं.

यज्ञे सति यथाभागमन्या देवता अन्वायंस्ताः[1] प्रातःस-
वने मरुत्वतीये तृतीयसवने चाथ हैतत्केवलमेवेन्द्रस्य[2]
यदूर्ध्वं मरुत्वतीयात्तस्मात्सर्वे निष्केवल्यानि शंसन्ति[3]'
यदेव निष्केवल्यानि तत्स्वर्गस्य लोकस्य[4] रूपं' यद्वेव
निष्केवल्यान्येकं ह वा अग्रे सवनमासीत्प्रातःसवनमे-
वाथ हैतं[5] प्रजापतिरिन्द्राय ज्येष्ठाय पुत्रायैतत्सवनं निर-
मिमीत[6] यन्माध्यंदिनं सवनं[7]' तस्मान्माध्यंदिने सवने
सर्वे निष्केवल्यानि शंसन्ति[8]' यदेव निष्केवल्यानि त-
त्स्वर्गस्य लोकस्य रूपं' यद्वेव[5] निष्केवल्यानि या ह वै
देवताः प्रातःसवने होता शंसति ताः शस्त्वा होत्रा-
शंसिनो ऽनुशंसन्ति[9] मैत्रावरुणं[7] तृचं[7] प्रउगे[7] होता[7]
शंसति[7]' तदुभयं[7] मैत्रावरुणं[7] मैत्रावरुणो ऽनुशंसत्यै-
न्द्रं[10] तृचं प्रउगे होता शंसति' तदुभयमैन्द्रमैन्द्रं[11] ब्रा-
ह्मणाच्छंस्यनुशंसत्यैन्द्राग्नं[12] तृचं प्रउगे होता शंसति'
तदुभयमैन्द्राग्नमैन्द्राग्नमच्छावाको ऽनुशंसत्यथ हैतत्केवल-
मेवेन्द्रस्य यदूर्ध्वं मरुत्वतीयात्तस्मात्सर्वे[13] निष्केवल्यानि

---

1) ?; vielleicht अन्वायन्ना:; न्ववायंस्ता: A, E und F; 2) हैतत्केवल्यमे° E; 3) शंसति D und E; 4) रूपस्य F; 5) Korrupt; 6) So corr.; die hss. निरमिमत; 7) Fehlt in D; 8) शंसति D; 9) °सति D und E; 10) °त्यैन्द्र F; °त्यैन्द्राग्नं A pr. man.; 11) ऐन्द्रं fehlt in E; 12) ब्रह्म-णा° E; 13) °सर्व D.

शंसन्ति[1] 'यदेव निष्केवल्यानि तत्स्वर्गस्य लोकस्य रूपं' यद्धेव[2] निष्केवल्यानि यदेददेवीरसद्दिष्ट माया[3] अथाभवत्केवलः सोमो अस्येत्यृचाभ्यनूक्तं 'देवान्ह यज्ञं तन्वानानसुररक्षांस्यजिघांसंस्ते[4] ऽब्रुवन्वामदेवं त्वं न इमं यज्ञं दक्षिणतो गोपायेति 'मध्यतो वसिष्ठमुत्तरतो[5] भरद्वाजं' सर्वाननु विश्वामित्रं 'तस्मान्मैत्रावरुणो वामदेवान्न प्रच्यवते[6] वसिष्ठाद्ब्राह्मणाच्छंसी[7] भरद्वाजादच्छावाकः सर्वे विश्वामित्रादेत एवास्मै तदृषयो ऽहरहर्नमगा[8] अप्रमत्ता यज्ञं रक्षन्ति[9] य एवं वेद य एवं वेद' ॥ २३ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे तृतीयः प्रपाठकः ॥

ओं कया नश्चित्र आ[10] भुवत्कया त्वं न[11] ऊत्येति[11] मैत्रावरुणस्य स्तोत्रियानुरूपौ 'कस्तमिन्द्र त्वावसुमिति बार्हतः प्रगाथस्तस्योपरिष्टाद्ब्राह्मणं[12] 'सद्यो ह जातो वृषभः कनीन इत्युक्थमुखमेवा त्वामिन्द्र वज्रिन्नत्रेति[13] पर्यास 'उशन्नु षु णः सुमना उपाक इति यजत्यैतामिव

---

1) शंसति D; 2) यद्देव D; 3) यदेवददेवो° E; 4) So corr.; die hss. तन्वाना असुर°; 5) वशिष्ट° D; 6) प्रव्यधते E; 7) वशिष्ठा° D; 8) ? ? °र्नामगा A sec. m, D und F; 9) रक्षति D; 10) अ D; 11) नोत्यति D; 12) °दूब्राह्मण E; 13) वज्रिन्नति D.

तद्देवतां यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्ये-
वाभिमृशन्त ' नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ १ ॥

तं वो दस्ममृतीषहं तत्त्वा यामि सुवीर्यमिति ब्रा-
ह्मणाच्छंसिन[1] स्तोत्रियानुरूपावुदु त्ये मधुमत्तमा गिर
इति बार्हतः प्रगाथः ' पशवो वै प्रगाथः ' पशवः स्वरः '
पशूनामाप्त्या ' अतो[2] मध्यं वै सर्वेषां छन्दसां बृहती '
मध्यं माध्यंदिनं[3] सवनानां ' तन्मध्येनैव मध्यं समर्धयती-
न्द्रः[4] पूर्भिदातिरद्दासमर्कैरित्युक्थमुखमुदु[5] ब्रह्माण्यैरत
अवस्येति पर्यास ' एवेदिन्द्रं वृषणं वज्रबाहुमिति परिद-
धाति[6] ' वसिष्ठासो[7] अभ्यर्चन्त्यर्कैरित्यन्नं वा अर्को ' ऽन्ना-
द्यमेवास्मै तत्परिदधाति[8] ' स न स्तुतो वीरवद्धातु गो-
मदिति ' प्रजां चैवास्मै तत्पशूंश्चाशास्ते ' यूयं पात स्वस्तिभिः
सदा न इति स्वस्तिमती रूपसमृद्धा[9] ' एतद्वै[9] यज्ञस्य
समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति ' स्व-
स्ति तस्य यज्ञस्य पारमश्नुते य एवं वेद यश्चैवंविद्वान्ब्रा-
ह्मणाच्छंस्येतया परिदधात्यृजीषी[10] वज्री[11] वृषभस्तुरा-
षाडिति यजत्यैतामेव[12] तद्देवतां यथाभागं प्रीणाति '

---

1) ब्रह्मणा° D; 2) ?, अयो ?, अन्तो A sec. m., D und E; 3) मध्यंदिनं D; 4) °यन्तीन्द्रः A; 5) पूर्भिदतिप्रद्दुता° E; 6) परिदध्यति D; 7) वशिष्ठासो D; 8) °दध्यति D; 9) °मृद्धाव् A und F; man erwartet °मृद्धैतद्वै; 10) परिदध्य° D; 11) वज्रीं A pr. m.; fehlt in F; 12) यजत्येवा° E.

वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[1] नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ २ ॥

तरोभिर्वो[2] विदद्वसुं तरणिरित्सिषासतीत्यच्छावाकस्य स्तोत्रियानुरूपावुंदिन्वस्य[3] रिच्यत इति बार्हतः प्रगाथस्तंस्योक्तं ब्राह्मणं ' भूय इद्वावृधे वीर्यायेत्युक्थमुखमिंमामू षु प्रभृतिं[4] सातये धा इति पर्यासस्तस्य दशमीमुद्धरति ' घोरस्य[5] वा आङ्गिरसस्यैतदार्षं[6] नेच्यन्नं निर्दहेच्छस्यमानं ' पिबा वर्धस्व[7] तव घा[8] सुतास[9] इति यजन्त्येतामेव तद्देवतां[10] यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[11] ' नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ ३ ॥

अथाध्वर्यो[12] शंसावोमिति स्तोत्रियायानुरूपाय[13] प्रगाथायोक्थमुखाय परिधानीयाया[14] इति पञ्च कृत्व[15] आह्वयन्ते ' पञ्चपदा पङ्क्तिः ' पाङ्क्तो यज्ञः ' सर्व ऐन्द्राणि त्रैष्टुभानि शंसन्त्यैन्द्रं हि त्रैष्टुभं माध्यंदिनं सवनं ' सर्वे सम-

---

1) °मृशन्ति A pr. m. und F; °मृशन्त D; 2) तरोभिर्वा D; 3) So corr.; die hss. °वुदिन्वस्य; 4) प्रभृति D; 5) A pr. m. fügt ह ein; 6) °तदार्षं E; °तदार्ष F; 7) वर्धस्व स्व A pr. m.; 8) धा E; 9) सुता A pr. m.; 10) तद्देवतो E; 11) प्रत्यवाभि° D; 12) °ध्वर्यो A; 13) स्तोत्रियानुरू° A sec. m. und F; 14) °नीयायां E; 15) कृत्वा A sec. m., D und F.

वतीभिः परिदधाति[1] ' तद्यत्समवतीभिः परिदधत्यन्तो वै पर्याप्तो ऽन्त उदर्को ऽन्तेनैवान्तं परिदधति ' सर्वे मद्वतीभिर्यजन्ति ' तद्यन्मद्वतीभिर्यजन्ति सर्वे सुतवतीभिः[2] पीतवतीभिरभिरूपाभिर्यजन्ति यद्यज्ञे[3] ऽभिरूपं तत्समृद्धं ' सर्वे ऽनुवषट्कुर्वन्ति ' स्विष्टकृत्वानुवषट्कारो[4] ' नेत्स्विष्टकृत अन्तरयामेत्यन्तरिक्षलोको माध्यंदिनं[5] सवनं ' तस्य पञ्च दिशः ' पञ्चोक्थानि माध्यंदिनस्य सवनस्य ' स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोत्येताः पञ्च दिश आप्नोति ' ॥ ४ ॥

अथ यदौपासनं[6] तृतीयसवन[7] उपास्यन्ते पितॄनेव तेन प्रीणात्युपांशु पात्नीवतस्याग्नीध्रो यजति ' रेतो वै पात्नीवत ' उपांश्विव वै रेतः सिच्यते ' तन्नानुवषट्करोति[8] नेद्रेतः सिक्तं संस्थापयानीत्यसंस्थितमिव[9] वै रेतः सिक्तं समृद्धं ' संस्था वा एषा यदनुवषट्कारस्तस्मान्नानुवषट्करोति[10] ' नेष्टुरुपस्थे धिष्ण्यान्ते वासीनो भक्षयति[11] ' पत्नीभाजनं[12] वै नेष्टाग्नीत्पत्नीषु[13] रेतो धत्ते[14] ' रेतसः सिक्ताः

1) °दधाति A pr. m.; 2) सुतव° A sec. m.; 3) तद्यज्ञे F; 4) स्विष्टकृत्वा अन° E; 5) माध्यांदिनं A; 6) यदौपसानं D; 7) °सवनं E; 8) °षट्कारोति D und E; 9) So corr.; die hss. संस्थापयानी°; 10) °ट्कारात्तस्मान्नानु° F; 11) भक्षयन्ति D und E; 12) °भाजन F; 13) नेष्टाग्नीत्प° E und F; 14) धत्तं D.

प्रजाः प्रजायन्ते 'प्रजानां प्रजननाय 'प्रजावान्प्रजननविष्णुर्भवति [1] 'प्रजात्यै 'प्रजायते प्रजया पशुभिर्य एवं वेद' ॥ ५ ॥

अथ शाकलाञ्जुह्वति 'तद्यथाहिर्जीर्णायास्त्वचो निर्मुच्येतेषीका वा मुञ्जादेवं हैवैते सर्वस्मात्पाप्मनः संप्रमुच्यन्ते [2] ये शाकलाञ्जुह्वति [3] 'द्रोणकलशे धाना भवन्ति' तासां हस्तैराददति [4] 'पशवो वै धानास्ता [5] आहवनीयस्य [5] भस्मान्ते निवपन्ति 'योनिर्वै पशूनामाहवनीयः' स्व एवैनांस्तद्गोष्ठे निरपक्रमे निदधत्यथ सव्यावृतो [6] ऽप्सुसोमानाप्याययन्ति 'तान्हान्तर्वेद्यां सादयन्ति [7] 'तद्धि सोमस्यायतनं 'चात्वालादपरेणाध्वर्युश्चमसानद्भिः पूरयित्वोदीचः प्रणिधाय [8] हरितानि तृणानि व्यवदधाति [9] 'यदा वा आपश्चौषधयश्च संगच्छन्ते [10] ऽथ कृत्स्नः सोमः संपद्यते' ता वैष्णव्यर्चा [11] निनयन्ति 'यज्ञो वै विष्णुर्यज्ञ [12] एवैनमन्ततः प्रतिष्ठापयत्यथ यद्भक्षः प्रतिनिधिं कुर्वन्ति मानुषेनैवैनं [13] तद्भक्षेण दैवं भक्षमन्तर्दधाति' ॥ ६ ॥

---

1) प्रजावान् fehlt in D; प्रजविष्णु° D; 2) प्रमुच्यन्त इति D; संप्रमुच्यन्त इति A; °मुच्यते E; °मुच्यते इति F; 3) शाकलं जुहुति E; 4) °दधाति A, D und F; 5) धानास्ताआहव° E; 6) सव्यावृते A pr. m.; सव्यावृततो E; 7) सादयति D und E; 8) प्रणोधाय A pr. m.; 9) °दधति F; 10) स गच्छन्ते F; 11) वैष्णुव्यर्चा A und E; 12) °र्यज्ञम् D, E und F; 13) मनुषे° A pr. m.; मानुषेनवेन E.

पूतिर्वा एषो ऽमुष्मिंल्लोके ऽध्वर्युं[1] च यजमानं चाभिवहति[2] । तद्यदेनं दग्ध्वानभिहुत्यावभृथमुपहरेयुर्यथा कुणपं वात्येवमेवैनं तत्करोत्यथ यदेनं दग्ध्वाभिहुत्यावभृथमुपहरन्ति[3] सर्वमेवैनं सयोनिं संतनुते । समृद्धिं[4] संभरत्यभूद्देवः[5] सविता वन्द्यो नु[6] न इति जुहोति । सर्वमेवैनं सपर्वाणं संभरति[7] । तिसृभिंस्त्रिवृद्धि[8] यज्ञो[8] । द्रप्सवतीभिरभिजुहोति । सर्वमेवैनं सर्वाङ्गं संभरति[9] । सौमीभिरभिजुहोति । सर्वमेवैनं सात्मानं[10] संभरति[9] । पञ्चभिरभिजुहोति । पाङ्क्तो यज्ञो । यज्ञमेवावरुन्द्धे । पाङ्क्तः पुरुषः । पुरुषमेवाप्नोति । पाङ्क्ताः पशवः । पशुष्वेव प्रतितिष्ठति[11] । प्रतितिष्ठति प्रजया पशुभिर्य एवं वेद । ॥ ७ ॥

अग्निर्वाव यम[12] इयं[13] यमी[14] । कुसीदं वा एतद्यमस्य यजमान[15] आदत्ते यदोषधीभिर्वेदिं स्तृणाति । तां यदनुपोष्य प्रयायाद्यातयेरन्नेनममुष्मिंल्लोके[16] । यमे यत्कुसीदमपमित्यमप्रतीत्तमिति[17] वेदिमुपोषतीद्धैव[18] सन्यमं कुसीदं

---

1) ऽध्वर्युं E; 2) °वहन्ति E; 3) So corr.; die hss. दग्धानभि°; °हरति E; 4) समृद्धि E; 5) संभरत्य° E und D; 6) नू F; 7) संभरन्ति A, D und F; 8) So corr.; die hss. °स्त्रिवृद्धिर्यज्ञो; 9) °रन्ति A, D und F; 10) So corr.; die hss. स आत्मानं; 11) °तिष्ठन्ति F; 12) यम् A; 13) Fehlt in F; 14) यमीं F; 15) यजमानस्य A pr. m.; 16) प्रयायातेरन्नेे° F; alle hss. °न्नेनमेमुष्मिंल्लोके; 17) So B. Ind.; die hss. य कुसीद°; °तीतमिति D, E und F; 18) So corr.; °पोषन्तीद्धैव A pr. m.; D und F; वेदिमुपोषधीद्धैव A sec. m.; वेदिमुपोषधीद्वैव E.

निरवद्यायानृणो भूत्वा स्वर्गं लोकमेति। विश्वलोप वि-श्वदावस्य त्वासञ्जुहोमीत्याह होतादा[1]। यजमानस्यापरा-भावाय। यद्व मिश्रमिव चरत्यञ्जलिना सक्तून्प्रदाव्ये जुहु-यादेष ह वा अग्निर्वैश्वानरो यत्प्रदाव्यः। स्वस्यामेवैनं तद्योन्यां सादयति। ॥ ८ ॥

अह्नां विधान्यामेकाष्टकायामपूपं[2] चतुःशरावं पक्त्वा प्रातरेतेन कक्षमुपोषेद्यदि दहति पुण्यसमं भवति। यदि न दहति पापसमं भवत्येतेन ह स्म वा अङ्गिरसः पुरा विज्ञानेन दीर्घसत्त्रमुपयन्ति[3]। यो ह वा उपद्रष्टारमुपश्रो-तारमनुख्यातारमेव विद्वान्यजते सममुष्मिंल्लोक इष्टापूर्तेन गच्छते। ऽग्निर्वा उपद्रष्टा। वायुर्वा उपश्रोतादित्यो[4] वा अनुख्याता। तान्य[5] एवं[5] विद्वान्यजते सममुष्मिंल्लोक इष्टापूर्तेन गच्छते। ऽयं नो नभसस्पतिरित्याहाग्निर्वै नभ-सस्पतिरग्निमेव तदाहैतं नो गोपायेति[6]। स त्वं नो नभ-सस्पतिरित्याह[7]। वायुर्वै नभसस्पतिर्वायुमेव तदाहैतं नो गोपायेति[8]। देव संस्फानेत्याहादित्यो[9] वै देवः संस्फान। आदित्यमेव तदाहैतं नो गोपायेत्ययं ते योनिरित्यरण्यो-

---

1) ? ? korrupt; 2) विधायान्यामेका° D; 3) दिर्घ° D; 4) उपश्रोता आदि° A sec. m. und D; 5) तान्येत्वं D; 6) गोपयेति A, D und E; 7) नभसं पति° E; 8) गोपायति D; 9) सस्पाने° F.

रग्निं[1] समारोपयेत्तंवाक्कुर्यदरण्योः समारूढो नश्येद्वदस्याग्निः[2] सीदेत्पुनराधेयः स्यादिति ' या ते अग्ने[3] यज्ञिया तनूस्तया मे ह्यारोह[4] तया मे ह्याविशायं[5] ते योनिरित्यात्मन्नग्नीन्समारोपयेदेष[6] ह वा अग्नेर्योनिः[7] ' स्वस्यामेवैनं[8] तद्योन्यां सादयति ' ॥ १ ॥

यो ह वा अग्निष्टोमं[9] साह्नं[10] वेदाग्निष्टोमस्य साह्नस्य सायुज्यं सलोकतामश्नुते य एवं[11] वेद ' यो ह वा एष तपत्येषो ऽग्निष्टोम एष साह्नस्तं सहैवाह्ना संस्थापयेयुः ' साह्नो वै नामैष ' तेनासंत्वरमाणाश्चरेयुर्यद्ध वा इदं पूर्वयोः सवनयोरसंत्वरमाणाश्चरन्ति तस्माद्धीदं[12] प्राच्यो ग्रामता बहुलाविष्टा ' अथ यद्धीदं[13] तृतीयसवने संत्वरमाणाश्चरन्ति तस्माद्धीदं[14] प्रत्यञ्चि[14] दीर्घारण्यानि भवन्ति ' यथैव प्रातःसवन एवं माध्यंदिने[15] सवन[16] एवं तृतीयसवन ' एवमु ह यजमानो ऽप्रमायुको भवति ' तेनासंत्वरमाणाश्चरेयुर्यदा वा एष प्रातरुदेत्यथ मन्दतमं तपति '

---

1) °यथोरग्नीन् A pr. m. und D; 2) °दस्याग्निं D und F; °दस्याग्नी A pr. m.; 3) अग्ने: A, D und F; अग्नि E; 4) त्वारोह A; 5) ह्याविशा अयं D; 6) °ग्नीत्समीरो° E; °ग्निंसमारो° A sec. m. F; 7) अग्नियोर्निः A, E und F; 8) स्वद्यामेवैनं E; 9) °ष्टोन F; 10) साह्न F; 11) एव E; 12) So corr.; तस्माद्धेद तं A, E und F; तस्माद्धेदत्तं A sec. m. und D; 13) So corr.; die hss. यद्धेदं; 14) So corr.; die hss. प्रत्यञ्चेद्; 15) So corr.; die hss. °दिनं; 16) सवनं D.

तस्मान्मन्द्रतमया वाचा प्रातःसवने शंसेदथ यदाभ्येत्यथ वलीयस्तपति ' तस्माद्वलीयस्या वाचा माध्यंदिने सवने शंसेदथो यदाभितरामित्यथ बलिष्ठतमं[1] तपति ' तस्माद्बलिष्ठतमया वाचा तृतीयसवने शंसेदेवं[2] शंसेद्यदि वाच ईशीत[3] ' वाग्घि शस्त्रं ' यया तु[4] वचोत्तरिण्योत्तरिण्योत्सहेत[5] समापनाय[6] तया[7] प्रतिपद्येतैतत्सुशस्ततरमिव भवति ' स वा एष न कदाचनास्तमयति नोदयति ' तद्यदेनं[8] पश्चादस्तमयतीति[9] मन्यन्ते ऽह्न एव तदन्तं[10] गत्वाथात्मानं विपर्यस्यते ' ऽहरेवाधस्तात्कृणुते रात्रीं परस्तात्स वा एष न कदाचनास्तमयति नोदयति ' तद्यदेनं पुरस्तादुदयतीति मन्यन्ते रात्रेरेव[11] तदन्तं गत्वाथात्मानं विपर्यस्यते ' रात्रिमेवाधस्तात्कृणुते ऽहः परस्तात्स वा एष न कदाचनास्तमयति नोदयति[12] ' न ह[13] वै कदाचन[14] निम्रुचत्येतस्य[15] ह सायुज्यं सलोकतामश्नुते य एवं वेद '

॥ १० ॥

---

1) बलीष्ठतमं D; 2) Fehlt in A und D; 3) So corr.; ईशन्त A pr. m., D, E und F; ईशत A sec. m.; 4) नु A, D und F; 5) So corr.; die hss. °त्सहेदा; वाचोत्तरण्योत्तरण्या° E und D; 6) समापना F; 7) तथा E; 8) तद्यदेन A pr. m. und F; 9) पश्चादस्तम° A; 10) तदह्नं D; 11) रात्रिरेव D und E; 12) नोदेति E; 13) है A sec. m.; 14) कदाचनं A pr. m. und E; 15) So corr.; die hss. निम्रोचत्येतस्य; ed. B. Ind. निम्लोचत्येतस्य.

अथात एकाहस्यैव तृतीयसवनं ' देवासुरा वा एषु लोकेषु समयतन्त ' ते[1] देवा असुरानभ्यजयंस्ते जिता अहोरात्रयोः संधिं समभ्यवागुः[2] ' स हेन्द्र[3] उवाचेमे वा[4] असुरा[4] अहोरात्रयोः संधिं[5] समभ्यवागुः ' कश्चाहं चेमानसुरानभ्युत्थास्यामहा इत्यहं चेत्यग्निरब्रवीदहं चेति वरुणो ऽहं चेति[6] बृहस्पतिरहं चेति विष्णुस्तानभ्युत्थायाहोरात्रयोः[7] संधेर्निर्जघ्नुर्यदभ्युत्थायाहोरात्रयोः संधेर्निर्जघ्नुस्तस्मादुत्था[8] ' अभ्युत्थाय[9] ह वै द्विषन्तं भ्रातृव्यं[10] निर्हन्ति य एवं वेद ' सो ऽग्निरश्वो भूत्वा प्रथमः प्रजिगाय[11] ' यदग्निरश्वो भूत्वा प्रथमः प्रजिगाय[12] तस्मादाग्नेयीभिरुक्थानि प्रणयन्ति ' यदग्निरश्वो भूत्वा प्रथमः प्रजिगाय[11] तस्मात्साकमश्वं[13] ' यत्पञ्च देवता अभ्युत्तस्थुस्तस्मात्पञ्च[14] देवता उक्थे[15] शस्यन्ते[16] ' या वाक्सो ऽग्निर्यः प्राणः स वरुणो ' यन्मनः स इन्द्रो ' यच्चक्षुः स बृहस्पतिर्यच्छ्रोत्रं स विष्णुरेते ह वा एतान्पञ्चभिः प्राणैः समीर्युदस्थापयंस्तस्मादु[17] एवैताः पञ्च देवता[18] उक्थे शस्यन्ते ' ॥ ११ ॥

---

1) ता A pr. m.; 2) ? ?; vielleicht समभ्यवेयुः 3) ऐन्द्रं E und F; 4) वासुरा E; 5) संधि D; 6) Fehlt in F; 7) °भ्युत्थाया अहो° D; 8) ? ? E °दुत्था; vielleicht °दुक्त्या? 9) अभ्युत्थाय E; 10) भ्रातृव्य A und F; 11) प्रजीगाय E; 12) प्रजगाय D; प्रजीगाय E; 13) °काममश्वं E; 14) अभ्यतस्थु° E; 15) उक्थ D; 16) शस्यते A pr. m.; 17) So corr.; die hss. समीर्येत्थाप°; 18) देवतां A sec. m. und D.

प्रजापतिर्ह्यैतेभ्यः पञ्चभ्यः प्राणेभ्यो ऽन्यान्देवान्ससृजे[1] यद्र चेदं[2] किं च पाङ्क्त 'तत्सृष्ट्वा व्याज्वलयत्तं[3] होचुर्देवा[4] ह्लानो ऽयं पितामयो[5] ऽभूः[5] 'पुनरिमं समीर्योत्थापयामेति[6] 'स ह सत्वमाख्यायाभ्युपतिष्ठते[7] 'यदि ह वा अपि निर्णिक्तस्यैव कुलस्य संध्युक्तेण[8] यजते सत्वं[9] हैवाख्यायाभ्युपतिष्ठते[10] 'यो वै प्रजापतिः स यज्ञः 'स एतैरेव पञ्चभिः प्राणैः समीर्योत्थापितो 'ये ह वा एनं पञ्चभिः प्राणैः समीर्योत्थापयंस्ता उ एवैताः पञ्च देवता[11] उक्थे शस्यन्ते ' ॥ १२ ॥

तदाहुर्यद्द्वयोर्देवतयो[12] स्तुवत इन्द्राग्न्योरित्यथ कस्माद्भूयिष्ठो[13] देवता उक्थे शस्यन्त इत्यंतो वा आग्निमारुतमन्तरुक्थान्यन्त[14] आश्विनं[15] 'कनीयसीषु देवतासु स्तुवते[16] तिष्ठत्यंथ[17] कस्माद्भूयिष्ठो[18] देवता उक्थे श-

---

1) ऽन्यान् fehlt in E; °वान्सृजे F; 2) So ed. B. Ind.; die hss. वेदं; 3) ? ? vielleicht व्यज्वलत्ते; D व्यालयते; F व्याल्लयत्ते; 4) °र्देवान् A und F; 5) ? ? vielleicht पितामहो ऽभूत्; 6) °यामीति A, E und F; 7) ? ? vielleicht °ऽयुपातिष्ठत; F °भुपगम्यति; 8) Corrupt; संध्युक्तेणां A und F; सध्युक्तेणा D; 9) So ed. B. Ind.; die hss. सत्वं; 10) °तिष्ठन्ते A pr. m.; 11) देव E; 12) So corr.; die hss. तदाहुर्यद्वयो° E; 13) °यिष्ठा ? ?; 14) अग्निमा° D; ? ? vielleicht °तमन्त उक्थान्यन्त; 15) अश्विनं D; 16) So corr.; स्तुवन्ते A pr. m. und E; सुवन्ते A sec. m. und D; स्तवते E; 17) ? ? vielleicht ऽन्तेष्वित्यंथ; 18) ? ? °ष्ठा.

स्यन्त इति ' द्वे द्वे उक्थमुखे[1] भवतस्तांच्चद्दे[2] द्वे ' ॥ १३ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवत्यैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन[3] उक्थं भवत्यैन्द्रावैष्णवमच्छावाकस्योक्थं भवति द्वे संशस्यंस्त[4] ऐन्द्रं च वारुणं[5] चैकमैन्द्रावारुणं[6] भवति[7] ' द्वे संशस्यंस्त ऐन्द्रं च बार्हस्पत्यं चैकमैन्द्राबार्हस्पत्यं भवति ' द्वे संशस्यंस्त ऐन्द्रं च वैष्णवं चैकमैन्द्रावैष्णवं भवति ' द्वे द्वे उक्थमुखे भवतस्तांच्चद्दे द्वे ' ॥ १४ ॥

अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भवतीन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं[8] धृतव्रताविल्यृचाभ्यनूक्तं ' मदद्धि तृतीयसवनमैन्द्रं[9] षु ब्रवाणि त[10] आग्निरगामि[10] भारत इति मैत्रावरुणस्य[11] स्तोत्रियानुरूपौ ' चर्षणीधृतं मघवानमुक्थ्यमित्युक्थमुखं[12] ' तस्योपरिष्टाद्ब्राह्मणमंस्तभ्नाद्यामसुरो[13] विश्ववेदा[14] इति वारुणं सांशंसिकमंदं चेति वरुणो[15] ऽब्रवीद्देवतयोः संशं-

---

1) उक्थे मुखे D; 2) So corr.; die hss. °स्तच्चद्दे; 3) ब्राह्माच्छंसिन A, D und F; 4) ? ? viell. संशस्तव्ये; संशस्यं D; शंसयं E; 5) वरुणं D; 6) °वरुणं D; 7) भवन्ति D; 8) मधं A sec. m.; मध्यं A pr. m.; 9) °सवनं मक्षं D; °मेक्षु F; 10) ताग्निरगामि A pr. m.; 11) °रुणास्या A pr. m.; 12) मघवानमुख्यमि° A; °मुखानि E; 13) So corr.; die hss. °भ्नाद्यामसुरो; 14) विश्वे देवा E; 15) वरुणो E.

सायानतिशंसायैन्द्रावरुणा[1] युवमध्वराय न इति पर्यास ऐन्द्रावरुणे ' ऐन्द्रावरुणमस्यैतन्नित्यमुक्थं ' तदेतत्स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति ' द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त ' विजित्या एवाथो द्वन्द्वस्यैव[2] मिथुनस्य प्रजात्यै ' सैकपादिनी[3] भवत्यैकपादिन्या[4] होता परिदधाति ' यत्र होतुर्होत्रिकाणां[5] युञ्जन्ति तत्समृद्धं ' तद्धि खल्वावां राजानावध्वरे[6] ववृत्यामित्यैवमेव केवलपर्यासं कुर्यात्केवलसूक्तं ' केवलसूक्तमेवोत्तरयोर्भवतीन्द्रावरुणा मधुमत्तमस्येति यजत्यैते[7] एव तद्देवते यथाभागं प्रीणाति ' वषट्कृत्यानुवषट्करोति ' प्रत्येवाभिमृशन्ते[8] नाप्याययन्ति ' न ह्यनाराशंसाः सीदन्ति ' ॥ १५ ॥

अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं[9] भवतीन्द्रश्च सोमं पिबतं बृहस्पते ऽस्मिन्यज्ञे मन्दसाना[10] वृषण्वसू इत्यृचाभ्यनूक्तं ' मद्वद्धि तृतीयसवनं ' वयमु त्वामपूर्व्य यो न इदमिदं पुरेति ब्राह्मणाच्छंसिन[11] स्तोत्रियानुरूपौ ' प्र मंहिष्ठाय बृहते बृहद्रय[12] इत्युक्थमुखमै-

1) संशंसायानिति° D; 2) द्वन्द्वं स्यैव D; 3) ? ? viell. °तिनी; 4) ? ? viell. °तिन्या; D भवत्यैक°; 5) °त्रकाणा F; 6) राजानानध्वरे A; राजानानध्वरे E; राजानानध्वर D; 7) यजत्येत A pr. m.; E und F; 8) प्रत्यवाभि° D; 9) उक्थां A pr. m.; 10) मन्दसामाना E; 11) ब्रह्मणाच्छंसिन D; 12) बृहद्रय F.

न्द्राजागतं[1] ' जागता॰ पशवः ' पशूनामाप्त्यै ' जागतमु वै तृतीयसवनं ' तृतीयसवनस्य रूपमुदप्रुतो[2] न वयो रक्षमाणा इति बार्हस्पत्यं सांशंसिकमंहं[3] चेति बृहस्पतिरब्रवीद्देवतयोः संशंसायानतिशंसायांच्छा[4] म इन्द्रं मतयः स्वर्विद[5] इति पर्यास ऐन्द्राबार्हस्पत्य[6] ' ऐन्द्राबार्हस्पत्यमस्यैतन्नित्यमुक्थं[7] ' तदेतत्स्वस्मिन्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति ' द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त[8] ' विजित्या एवांथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै[9] ' बृहस्पतिर्नः परिपातु पश्चादित्यैन्द्राबार्हस्पत्या परिदधातीन्द्राबृहस्पत्योरेव यज्ञं प्रतिष्ठापयत्युतोत्तरस्मादधरादघायोरिन्द्रः[10] पुरस्तादुत मध्यतो नः सखा सखिभ्यो[11] वरिवः[12] कृणोत्विति ' सर्वाभ्य एव दिग्भ्य आशिषमाशास्ते[13] नार्त्विं[14] ' यं कामं कामयते सो ऽस्मै कामः समृध्यते य एवं वेद यश्चैवंविद्वान्ब्राह्मणाच्छंस्येतस्या[15] परिदधाति ' बृहस्पते युवमिन्द्रश्च वस्व[16] इति यजत्यैते[17] एव तद्देवते

---

1) °मैद्रं जागतं D und E; 2) रूपमुदत्तो D; 3) °सिकामहं F; 4) संशंसायानिति° D; 5) स्वर्वि E; 6) °बार्हस्पत्यं A und F; 7) °त्यमुक्थ D; 8) °यन्ति A pr. m.; 9) प्रजापत्यै A pr. m.; 10) प्रतिष्ठापयत्ययोत्त° F; प्रतिष्ठापयत्युतोत्तरस्वा° D; °राद्धायोरिन्द्रः E; 11) सखिभि A; 12) वरीयः A; 13) °माशास्ते D; 14) ? ? D नार्त्विं; 15) याश्चैवं° D; 16) वस्व D; 17) यजत्येत A und F.

यथाभागं प्रीणाति । वषट्कृत्यानुवषट्करोति । प्रत्येवाभिमृशन्ते[1] नाप्याययन्ति[2] । न ह्यनाराशंसाः सीदन्ति[3] ॥ १६ ॥

अथ यदैन्द्राविष्णवमच्छावाकस्योक्थं भवतीन्द्राविष्णू मदपती[4] मदानामा सोमं यातं द्रविणो दधानेत्यृचाभ्यनूक्तं । महद्धि तृतीयसवनमंधा[5] ह्यीन्द्र गिर्वण इयं त इन्द्र गिर्वण इत्यच्छावाकस्य स्तोत्रियानुरूपावृतुर्जनित्री[6] तस्या अपस्परीत्युक्थमुखं[7] । तस्योक्तं ब्राह्मणं । नू मर्तो दयते सनिष्यन्निति वैष्णवं सांशंसिकमंह्वं[8] चेति विष्णुरब्रवीद्देवतयोः संशंसायानतिशंसाय[9] । सं वां कर्मणा समिषा हिनोमीति पर्यास ऐन्द्राविष्णव[10] । ऐन्द्राविष्णवमस्यैतन्नित्यमुखं । तदेतत्स्वस्मिन्नायतने[11] स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति[12] । द्वन्द्वं वा एता देवता भूत्वा व्यजयन्त । विजित्या एवाथो द्वन्द्वस्यैव मिथुनस्य प्रजात्या । उभा जिग्यथुर्न पराजयेथे इत्यैन्द्राविष्णव्यर्चा परिदधातीन्द्राविष्णोरिव[13] यज्ञं प्रतिष्ठापयतीन्द्राविष्णू पिबतं मध्वो अस्येति यजत्यैते[14] एव तद्देवते यथाभागं प्रीणाति ।

---

1) प्रत्यवाभि° D; 2) नायाय° D und E; 3) सीदति E; 4) मदयती E; 5) So corr.; °मधाम A, E und F; °मध्यम D; 6) °तुर्नोनित्री E; 7) अपपस्परी° A pr. m.; अपसस्परी° D; अपनस्परी° E; 8) °कमिदं D; 9) शंशंसायानिति° D; शंशंसा° E; 10) °वैष्णावं A sec. m. und E; 11) °यतेन D; 12) °पयन्ति A pr. m.; 13) परिदधान्तो° A; 14) यज-त्येत A und F.

वषट्कृत्यानुवषट्करोति' प्रत्येवाभिमृशन्ते[1]' नाप्याययन्ति[2]' न ह्युनाराशंसाः सीदन्ति' ॥ १७ ॥

अथाध्वर्यो शंशंसावोमिति[3] स्तोत्रियायानुरूपायोक्थमुखाय[4] परिधानीयाया[5] इति चतुश्चतुराह्वयन्ते' चतस्रो वै दिशो[6]' दिक्षु तत्प्रतितिष्ठन्ते' ऽथो चतुष्पादः[7] पशवः' पशूनामाप्त्या' अथो चतुष्पर्वाणो हि तृतीयसवने होत्रकास्तस्माच्चतुः' सर्वे त्रैष्टुभं जागतानि[8] शंसन्ति[9]' जागतं हि तृतीयसवनमथ हैतत्त्रैष्टुभान्यप्रतिभूतमिव[10] हि प्रातःसवने मरुत्वतीये तृतीयसवने च होत्रकाणां शस्त्रं' धीतरसं[11] वा एतत्सवनं यत्तृतीयसवनमथ हैतदधीतरसं[12] शुक्रियं छन्दो यत्त्रिष्टुबयातयाम[13]' सवनस्यैव तत्सरसताये[14]' सर्वे समवतीभिः परिदधति' तद्यत्समवतीभिः परिदधत्यन्तो वै पर्यासो ऽन्त उदर्को ऽन्तः सन्नाया[15] उ[15] ह[15] वा[15] अवैनायांन्तेनैवान्तं[15] परिदधति' सर्वे मद्वतीभिर्यजन्ति' तद्यन्मद्वतीभिर्यजन्ति सर्वे सुतवतीभिः[16] पीतवतीभिरभिरूपाभिर्यजन्ति[17]' यद्यज्ञे[18] ऽभिरूपं'

1) प्रत्यवाभि° D; 2) नायाययन्ति D; 3) शंशवोमिति A; 4) स्तोत्रियानुरू° A und F; 5) परिद्धा° A und F; 6) Fehlt in D; 7) चतुष्पद: F; 8) जगतानि D; 9) शंसति D; 10) ? ? °भूतामिव E; 11) धितरसं A pr. m.; वीतरसं A sec. m. und E; वितरसं D; 12) °धितरसं A pr. m., 13) So corr.; die hss. यत्त्रिष्टुभाया°; 14) So corr.; die hss. तत्सरस्वतायै; 15) Korrupt; 16) सृतव° A sec. m.; 17) ऽभिः fehlt in D; 18) विपतते A pr. m.; यदि F.

तत्समृद्धं ' सर्वे ऽनुवषट्कुर्वन्ति ' स्विष्टकृत्वानुवषट्कारो[1] ' नेत्स्विष्टकृत अन्तरयामेत्यसौ[2] वै लोकस्तृतीयसवनं ' तस्य पञ्च दिशः ' पञ्चोक्थानि तृतीयसवनस्य ' स एतैः पञ्चभिरुक्थैरेताः पञ्च दिश आप्नोति ' तद्यदेषां लोकानां रूपं या मात्रा तेन रूपेण तया मात्रयेमांल्लोकानृध्नोतीमांल्लोकानृध्नोतीति[3] ' ॥ १८ ॥

तदाहुः किं षोडशिनः षोडशित्वं[4] ' षोडश स्तोत्राणि षोडश शस्त्राणि षोडशभिरक्षरैरादत्ते[5] ' द्वे[6] वा अक्षरे अतिरिच्येते षोडशिनो ऽनुष्टुभमभिसंपन्नस्य ' वाचो वा एतौ स्तनौ ' सत्यानृते वाव ते ' अवत्येनं[7] सत्यं नैनमनृतं[8] हिनस्ति य एवं वेद य[9] एवं[9] वेद[9] ' ॥ १९ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे चतुर्थः प्रपाठकः ॥

ओमहर्वै देवा आश्रयन्त[10] रात्रीमसुरास्तें[11] समावद्वीर्या एवासन्नो व्यावर्तन्त ' सो ऽब्रवीदिन्द्रः कश्चाहं चेमा-

1) Bibl. Ind. स्विष्टकृत्वा अनु°; 2) die hss. °ष्ट्यतमन्त°; 3) So corr.; die hss. मात्राये°; 4) षोडशीत्वं A pr. m.; 5) षोडशीभि° E; 6) So corr.; die hss. ते; 7) So corr.; die hss. अवत्यैनं; 8) नैतमनृतं A sec. m. und D; 9) Fehlt in E und F; 10) आश्राम्यन्त E; 11) रात्रीन° E.

नसुराद्रात्रीमन्ववैष्यस्मह[1] इति ' स देवेषु न[2] प्रत्यवि-
न्ददबिभयू रात्रेस्तमसो मृत्योस्तम इव[3] हि रात्रिर्मृत्युर्वै
तमस्तस्माद्धाप्येतर्हि भूयानिव नक्तं स यावन्मात्रमिवा-
पक्रम्य[4] बिभेति ' तं वै छन्दांस्येवान्ववायंस्तं यच्छन्दांस्ये-
वान्ववायंस्तस्मादिन्द्रश्च[5] छन्दांसि च रात्रिं वहन्ति ' न
निविच्छस्यते न पुरोरुङ्[6] धाय्या नान्या देवता ' इन्द्रश्च[7]
ह्येव छन्दांसि च रात्रिं वहन्ति ' तान्वै पर्यायैः पर्यायम-
नुदन्त ' यत्पर्यायैः पर्यायमनुदन्त तस्मात्पर्यायास्तत्पर्याया-
णां पर्यायत्वं ' तान्वै प्रथमैरेव पर्यायैः पूर्वरात्रादनुदन्त
मध्यमैर्मध्यरात्रादुत्तमैरपररात्रादपि शर्वर्या अपिस्मसीत्य-
ब्रुवंस्तं यदपि शर्वर्या अपिस्मसीत्यब्रुवंस्तदपिशर्वराणामं-
पिशर्वरत्वं ' शर्वराणि खलु ह वा अस्यैतानि छन्दांसीति
ह स्माहैतानि ह वा इन्द्रं रात्र्यास्तमसो मृत्योरभिपत्या-
पारयंस्तदपिशर्वराणामपिशर्वरत्वम् ' ॥ १ ॥

प्रथमेषु पर्यायेषु स्तुवते प्रथमान्येव पदानि पुनराददते '
यदेवैषां मनोरथा आसंस्तदेवैषां तेनाददते[8] ' मध्यमेषु
पर्यायेषु स्तुवते मध्यमान्येव पदानि पुनराददते ' यदेवैषा-

---

1) °न्ववैयाष्यामहा A sec. m. die hss. °महा; 2) नः D; 3) त व D;
4) So corr.; die hss. °प्रक्राम्य; 5) So corr.; die hss. °दिन्द्रस्य;
6) पुरोरुङ् A pr. m.; D, E und F; 7) So corr.; die hss. इन्द्रस्य;
8) तेनादधाते A pr. m. und E.

मश्वा गाव आसंस्तद्देवैषां तेनाददत ' उत्तमेषु पर्यायेषु स्तुवत[1] उत्तमान्येव पदानि पुनराददते ' यद्देवैषां वासो हिरण्यं[2] मणिरध्यात्ममासीत्तद्देवैषां[3] तेनाददत ' आ द्विषतो वसु दत्ते निरेवैनमेभ्यः[4] सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद ' ॥ २ ॥

पवमानवदहरित्याहुर्न रात्रिः पवमानवती ' कथमुभे पवमानवती भवतः ' केन ते समावद्भाजौ भवत[5] इति ' यदेवेन्द्राय मद्वने सुतमिदं वसो सुतमन्ध इदं ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति[6] च तेन[7] रात्रिः पवमानवती ' तेनोभे पवमानवती भवतस्तेन ते समावद्भाजौ भवतः ' पञ्चदशस्तोत्रमहरित्याहुर्न रात्रिः पञ्चदशस्तोत्रा ' कथमुभे पञ्चदशस्तोत्रे भवतः ' केन ते समावद्भाजौ भवत इति ' द्वादश स्तोत्राण्यपिशर्वराणि ' तिसृभिर्देवताभिः संधिना राथंतरेणाश्विनाय स्तुवते ' तेन[7] रात्रिः पञ्चदशस्तोत्रा[8] ' तेनोभे पञ्चदशस्तोत्रे भवतस्तेन ते समावद्भाजौ भवतः ' परिमितं स्तुवन्त्यपरिमितमनुशंसन्ति ' परिमितं भूतमपरिमितं भव्यमपरिमितान्येवावरुन्ध्यादित्यतिशंसति[9]

---

1) स्तुवन्ते A und F; 2) हिरण्य A sec. m. und D; 3) °मासीत तद्देवैषां D; 4) निरेवैनामेभ्यः A pr. m.; 5) भावत E; 6) शंसति D; 7) तेना D; 8) °स्तोत्रां F; 9) °तिशंसन्ति A und F.

स्तोममति वै प्रजास्यात्मानमति पशवस्तं यदेवास्यात्या-त्मानं तदेवास्यैतेनाप्याययत्ययो[1] द्वयं वा इदं सर्वं स्नेहश्चैव °तेजश्चाथ[2] तदहोरात्राभ्यामाप्तं[3] 'स्नेहतेजसोराप्त्यै 'गायत्रान्स्तोत्रियानुरूपाञ्छंसन्ति[4] 'तेजो वै गायत्री 'तमः पाप्मा रात्रिस्तेन तेजसा तमः पाप्मानं तरन्ति 'पुनरादायं[5] शंसन्त्येवं[6] हि सामगा स्तुवते 'यथा स्तुतमनुशस्तं[7] भवति 'न हि तत्स्तुतं[8] यन्नानुशस्तं 'तदाहुरथ कस्मादुत्तमा-त्प्रतीहारादाहृय साम्ना शस्त्रमुपसंतन्वन्तीति[9] ' ॥ ३ ॥

पुरुषो वै यज्ञस्तस्य शिर एव हविर्धानं[10] 'मुखमा-हवनीय 'उदरं सदो 'ऽन्नमुक्थानि[11] 'बाहू[12] मार्जाली-यश्चाग्नीध्रीयश्च[13] 'या इमा देवतास्ते ऽन्तःसदसं[14] धिष्ण्याः 'प्रतिष्ठे गार्हपत्यव्रतश्रपणावित्यथापरं[15] 'तस्य मन एव ब्रह्मा 'प्राण उद्गाताऽपानः प्रस्तोता 'व्यानः प्रतिहर्ता 'वाग्घोता 'चक्षुरध्वर्युः 'प्रजातिः[16] सदस्यो 'ऽङ्गानि हो-त्राशंसिन 'आत्मा यजमानस्तं यदध्वर्युः स्तोत्रमुपाकरोति

---

1) ? ? °ययत्ययो ?; 2) So corr.; die hss. तत्तेजश्च°; 3) So corr.; die hss. °ऽयामाप्त्यं; 4) Die hss. यायत्रीं; A, D und F स्तोत्रियानुरूपं; °सते D und E; 5) पुनरादाय A pr. m. und F; 6) शंसति D; 7) शांस्तं E; शंस्तं F; 8) त स्तुतं D; तत स्तुतं E; 9) °तन्वतीति D; °तन्वीति F; 10) हविर्धान F; 11) So corr. nach K. Br. XVII 7, Z. 6; die hss. ऽन्तरुक्थानि; 12) बहू D; 13) मार्जालीयश्चा A, E und F; 14) ऽन्तःसदसं D; 15) °व्रतश्रपणा° A, E und F; 16) So corr. nach K. Br. XVII 7, Z. 9; die hss. प्रजापतिः.

सोमः पवत इति चक्षुरेव तत्प्राणैः संदधात्यथ[1] यत्प्रस्तोता ब्रह्माणमामन्त्रयते ब्रह्मन्स्तोष्यामः प्रशास्तरिति मनो ऽग्रणीर्भवत्येतेषां[2] प्राणानां मनसा हि[3] प्रसूता[4] स्तोमेन स्तुयमेति । प्राणानेव तन्मनसा संदधात्यथ[5] यद्ब्रह्मा स्तुतेत्युच्चैरनुजानाति मनो वै ब्रह्मा । मन एव तत्प्राणैः संदधात्यथ यत्प्रस्तोता प्रस्तौत्यपानमेव तत्प्राणैः संदधात्यथ यत्प्रतिहर्ता प्रतिहरति व्यानमेव तदपानैः संदधात्यथ यदुद्गातोद्गायति समानमेव तत्प्राणैः संदधात्यथ यद्धोता साम्ना शस्त्रमुपसंतनोति वाग्वै होता वाचमेव तत्प्राणैः संदधात्यथ[5] यत्सदस्यो ब्रह्माणमुपासीदति प्रज्ञातिर्वै[6] सदस्यः प्रज्ञातिमेवाप्नोत्यथ[7] यद्धोत्राशंसिनः सामसंततिं[8] कुर्वन्त्यङ्गानि वै होत्राशंसिनो ऽङ्गान्येवास्य तत्प्राणैः संदधात्यथ यद्यजमानः स्तोत्रमुपासीदत्यात्मा वै यजमान आत्मानमेवास्य तत्कल्पयति । तस्मान्नैनं बहिर्वेद्यभ्याश्रावयेन्नाभ्युदियान्नाभ्यस्तमियान्नाधिष्ण्ये[9] प्रतपेन्नेत्प्राणेभ्य आत्मानमन्तरगादिति[10] । ॥ ४ ॥

---

1) °संदध° D; 2) गुणी° A sec. m.; गृणी° A pr. m.; 3) ? ? om. ?; 4) प्रसृता D; 5) संदध्यत्यथ D; 6) So corr.; die hss. प्रजापतिर्वै; 7) So corr.; die hss. प्रजापतिमेवा°; 8) So corr.; die hss. साम संतति; A pr. m. साम संततिं; 9) So corr.; A pr. m. und D बर्हिर्वे°; A sec. m., E und F बहिर्वे°; 10) °मन्तरागादिति A pr. m.

प्रथमेषु पर्यायेषु स्तुवते प्रथमेषु पदेषु निनर्दयन्ति[1) प्रथमरात्रादेव तदसुरान्निर्घ्नन्ति[2)' मध्यमेषु पर्यायेषु स्तुवते मध्यमेषु पदेषु[3) निनर्दयन्ति' मध्यमरात्रादेव तदसुरान्निर्घ्नन्त्युत्तमेषु[4) पर्यायेषु स्तुवत उत्तमेषु पदेषु निनर्दयन्त्युत्तमरात्रादेव तदसुरान्निर्घ्नन्ति[4)' तद्यथाभ्यागारं[5) पुनः पुनः[3) पाप्मानं निर्हरत्येवमेवैतत्स्तोत्रियानुरूपाभ्यामहोरात्राभ्यामेव तदसुरान्निर्घ्नन्ति[6)' गायत्रीं[7) शंसन्ति[8)' तेजो वै[9) ब्रह्मवर्चसं गायत्री' तेज एवास्मै तद्ब्रह्मवर्चसं यजमाने दधति' गायत्रीः[10) शस्त्वा जगतीः[11) शंसन्ति[12)' ब्रह्म ह वै जगती' ब्रह्मणैवास्मै तद्ब्रह्मवर्चसं यजमाने दधति' व्याह्वयन्ते गायत्रीश्च जगतीश्चान्तरेण' छन्दांस्येव तन्नानावीर्याणि कुर्वन्ति' जगतीः शस्त्वा त्रिष्टुभः शंसन्ति' पशवो वै जगती' पशूनेव तत्त्रिष्टुब्भिः[13) परिदधति' बलं वै वीर्यं त्रिष्टुब्बलमेव[14) तद्वीर्ये ऽन्ततः प्रतिष्ठापयत्यन्धस्वत्यो मद्वत्यः[15) सुतवत्यः पीतवत्यस्त्रिष्टुभो याज्याः समृद्धाः सु-

---

1) °यति D; 2) Die hss. °न्निरघ्नन्ति; 3) Fehlt in D; 4) So corr.; die hss. °न्निरघ्न°; 5) So corr.; die hss. °ऽयाघारात्; 6) Die hss. °न्निरघ्नन्ति; 7) गायत्रोः??; 8) शंसति D; 9) Fehlt in A sec. m. und E; 10) गयत्रीं A pr. m. und F; 11) जगतीं A, D und F; 12) शंसति D; 13) So corr.; die hss. तत्त्रिष्टुभ; 14) Korrupt, man erwartet बल एव E und F; 15) मद्वन्त्यः E.

लक्षणा[1] 'एतद्धि रात्रीरूपं' जागृयाद्रात्रिं[2] 'यावद्ध वै न वा स्तुवते न वा शस्यते[3] तावदीश्वरा[4] असुरा रक्षांसि च यज्ञमन्ववचनयन्ति' तस्मादाहवनीयं समिद्धमाग्नीध्रीयं[5] गार्हपत्यं धिष्ण्यान्समुज्ज्वलयतेति[6] भापयेरञ्ज्वलयेरन्प्रकाशमिवैव[7] तत्स्यादरिभक्तः[7] शयीरंस्तान्ह[7] तः[8] श्रेष्ठो[8] वा[8] इति[8] पाप्मा[8] नाभिवृकणोति[8]' ते तमः पाप्मानमपाघ्नते' ते तमः पाप्मानमपाघ्नते' ॥ ५ ॥

विश्वरूपं वै त्वाष्ट्रमिन्द्रो[9] ऽहन्स[10] त्वष्टा हतपुत्रो ऽभिचरणीयमपेन्द्रं सोममाहरत्तस्येन्द्रो यज्ञवेशसं[11] कृत्वा[11] प्रासह्य सोममपिबत्स विष्वङ्व्यार्छत्तस्मात्सोमो[12] नानुपहूतेन[13] [न[13]] पातव्यः' सोमपीथो ऽस्य व्यर्धुको[14] भवति' तस्य मुखात्प्राणेभ्यः श्रीर्यशांस्यूर्ध्वान्युदक्रामंस्तानि[15] पशून्प्राविशंस्तस्मात्पशवो यशो' यशो ह भवति य एवं वेद' ततो ऽस्मा एतदश्विनौ च सरस्वती च यज्ञं

---

1) सुलक्षा A sec. m.; D, E und F; 2) जागृयाद्रा° E; 3) शस्यन्ते F; 4) A und F fügen वा ein; 5) समृद्धमाग्नीध्रियं D; 6) So corr. die hss. धिष्ण्यं समु°; °समुज्ज्वलयतेति D; °समुज्ज्वलयेति E; 7) So corr.; die hss. भापयेर°; die hss. शमिव वै तस्यादरेभिन्नं सुवीरंस्तान्ह; 8) Korrupt; 9) त्वष्ट्र° A und F; 10) die hss. ऽहं स; 11) So corr.; die जज्ञिरे स तंस्कृत्वा; 12) So corr.; die hss. विष्वद्व्यर्छत्त°; 13) Doppelte negation!; नानुपहूयतेन A; 14) वृद्धि° A pr. m.; वृद्धि° A sec. m.; वृद्धि° D, E und F; 15) °न्युदक्रामन्तानि A und D.

समभरंस्तसौत्रामणिं भैषज्याय । तयेन्द्रमभ्यषिञ्चंस्ततो[1] वै स[2] देवानां श्रेष्ठो[3] ऽभवच्छ्रेष्ठः स्वानां चान्येषां च भवति य एवं वेद यश्चैवं विद्वांत्सौत्रामण्याभिषिच्यते । ॥ ६ ॥

अथ साम गायति ब्रह्मा । क्षत्रं वै साम । क्षत्रेणैवैनं तदभिषिञ्चत्यथो साम्राज्यं[4] वै साम । साम्राज्येनैवैनं तत्साम्राज्यं गमयत्यथो सर्वेषां वा एष वेदानां[5] रसो यत्साम । सर्वेषामेव तद्वेदानां रसेनाभिषिञ्चति । बृहत्यां[6] गायति[7] । बृहत्यां वा असावादित्यः श्रियां प्रतिष्ठायां प्रतिष्ठितस्तपत्यैन्द्र्यां बृहत्यां गायत्यैन्द्रो वा एष यज्ञक्रतुर्यत्सौत्रामणिरिन्द्रायतन[8] एष एतर्हि यो यजते । स्व एवैनं तदायतने प्रीणात्यथ कस्मात्संशानानि[9] नामैतैर्वै सामभिर्देवा इन्द्रमिन्द्रियेण वीर्येण[3] समश्यंस्तथैवैतद्यजमाना[10] एतैरेव सामभिरिन्द्रियेणैव वीर्येण संश्यन्ति । संश्रवसे[11] विश्रवसे सत्यश्रवसे श्रवस इति सामानि भवन्त्येष्वेवैनं लोकेषु प्रतिष्ठापयति । चतुर्निधनं भवति । चतस्रो वै दिशो । दिक्षु तत्प्रतितिष्ठन्ते । ऽथो चतुष्पादः पशवः । पशूनामाप्त्यै । तदाहुर्यदेतत्साम गीयते ऽथ क्वैतस्य

---

1) तयन्द्र° F; 2) Fehlt in D und F; 3) Fehlt in D; 4) सामराज्यं E; 5) देवानां D; 6) बृहत्या E; 7) गयन्ति A pr. m.; 8) So corr.; die hss. °रैन्द्रायतन; 9) °त्संश्यानानि A, E und F; 10) °ज्ञमान E; 11) संश्रावासे A pr. m.

साम्न[1] उक्थं[1] का प्रतिष्ठा' त्रया[2] देवा एकादशेत्या-हुरेतद्वा एतस्य साम्न[1] उक्थमेषा[1] प्रतिष्ठा' त्रयस्त्रिंशं[3] ग्रहं गृह्णाति' साम्नः प्रतिष्ठायै प्रतिष्ठायै[4]' ॥ ७ ॥

प्रजापतिरकामयत वाजमाप्नुयां[5] स्वर्गं लोकमिति[6]' स एतं वाजपेयमपश्यद्वाजपेयो वा[7] एष य एष तपति' वाजमेतेन यजमानः स्वर्गं[8] लोकमाप्नोति' शुक्रवत्यो[9] ज्योतिष्मत्यः प्रातःसवने भवन्ति' तेजो[10] ब्रह्मवर्चसं ताभिराप्नोति' वाजवत्यो माध्यंदिने सवने[4]' स्वर्गस्य लोकस्य समष्ट्या' अन्नवत्यो गणवत्यः पशुमत्यस्तृतीयसवने भवन्ति' भूमानं ताभिराप्नोति' सर्वः सप्तदशो भवति[11]' प्रजापतिर्वै सप्तदशः' प्रजापतिमेवाप्नोति[12]' हिरण्यस्रज ऋत्विजो भवन्ति' महस[13] एव तद्रूपं क्रियत' एष मे ऽमुष्मिंल्लोके प्रकाशो[14] ऽसदिति' ज्योतिर्वै हिरण्यं[15]' ज्योतिष्येवैनमन्तर्दधत्याजिं[16] धावन्ति' यजमानमुज्जापयन्ति[17]' नाकं[18] रोहति समहसे[19] रोहति[20] विश्वमहसे

1) So corr.; die hss. साम्नमुक्थं; 2) त्रयो A pr. m.; 3) त्रयस्त्रिंश E; 4) Fehlt in D; 5) So corr.; die hss. °प्नुयात्; 6) So corr.; die hss. लोकमेति; 7) Fehlt in F; 8) स्वर्गं E; 9) °वत्यो E; 10) Von तेजो bis भूमा° fehlt in F; 11) So corr.; die hss. भवन्ति; 12) प्राजाप° D; 13) महस्त A sec. m.; महत्य F; 14) प्रशाको F; 15) हिरण्य D; 16) °दधात्याजिं F; 17) °पयति D; 18) So corr. नाके A, E und F; नाक D; 19) Fehlt in E und F; P. Br. सहजसे; 20) Fehlt in E und F.

रोहति सर्वमह्नसे रोहति ' मनुष्यलोकादेवैनमन्तर्दधति ' देवस्य सवितुः सवे[1] स्वर्गं लोकं वर्षिष्ठं नाकं रोहेयमिति[2] ब्रह्मा रथचक्रं सर्पति[3] ' सवितृप्रसूत एवैनं तत्सर्पत्यथो[4] प्रजापतिर्वै ब्रह्मा ' प्रजापतिमेवैनं वध्रादधिप्रसुवति[5] ' नाकस्योज्जित्यै ' वाजिनां संतत्यै ' वाजिसामाभिगायति ' वाजिमान्भवति ' वाजो वै स्वर्गो[6] लोकः ' स्वर्गमेव तल्लोकं रोहति[7] ' विष्णोः शिपिविष्टवतीषु बृहदुत्तमं भवति ' स्वर्गमेव तल्लोकं रूढ्वा ब्रध्नस्य विष्टपमतिक्रामत्यतिक्रामति ' ॥ ८ ॥

अथातो ऽप्तोर्यामा ' प्रजापतिर्वै यत्प्रजा असृजत ता वै तान्ता[8] असृजत ' ताः सृष्टाः पराच्य एवासन्नोपावर्तन्त[9] ' ता एकेन स्तोमेनोपागृह्णात्तां अत्यरिच्यन्त[10] ' ता द्वाभ्यां ' ताः सर्वैस्तांस्मात्सर्वस्तोमस्तां एकेन पृष्ठेनोपागृह्णात्तां अत्यरिच्यन्त ' ता द्वाभ्यां ' ताः सर्वैस्तांस्मात्सर्वपृष्ठस्तां[11] अतिरिक्तोक्थ्ये वारवन्तीयेनावारयंस्तांस्मादेषो[12]

---

1) So corr.; सत्रं A, D und F; सत्रे E; 2) रुहेयमिति A pr. m.; रोहमिति F; 3) समर्पयति A sec. m. und E; 4) तत्समर्पयत्यथो A, E und F; 5) °सूवति A pr. m.; E und F; °स्रुवति D; 6) D fügt वै ein; 7) Von रोहति bis रूढ्वा fehlt in F; 8) ताता F; 9) °न्नोव्यावर्तन्त D; 10) अतिरिच्यन्त D; 11) So corr.; die hss. °र्वस्पृष्ठस्ता; 12) ? wschl. °वारयन्तस्मादेषो.

ऽतिरिक्तोक्थवान्भवति[1] ' तस्माद्धारयन्तीयं ' ता यदात्वा-
यच्छदतो[2] वा अतोर्यामांयो[3] प्रजा वा[4] ऋतुरित्याहुः[4] '
प्रजानां यमन[5] इति[6] हैवैतदुक्तं[7] ता[8] बर्हिः[8] प्रजा-
अयिरंस्तर्हि[8] हैतेन यजते ' स एषो ऽष्टापृष्ठो भवति '
तद्यथान्यस्मिन्यज्ञे विश्वजितः[9] पृष्ठमनु[10] संचरं भवति
कथमेतदेवमत्रेति[11] ' पितैष[8] यज्ञानां ' तद्यथा श्रेष्ठिनि[12]
संवशेयुरपि विद्विषाणा एवमेवैतच्छ्रेष्ठिनो वशेयान्नमन्न-
स्यानुचर्याय[13] जमन्ते ' ॥ १ ॥

तद्यथैवादो ऽह्न उक्थानामाग्नेयं[14] प्रथमं भवत्येवमे-
वैतदत्राप्याग्नेयं प्रथमं भवत्यैन्द्रे वाव तत्रोत्तरे[15] ' ऐन्द्रे
वा एते ' ऐन्द्राविष्णावमच्छावाकस्योक्थं[16] भवति ' चतु-
रात्रावान्यतिरिक्तोक्थानि[17] भवन्ति ' पशवो वा उक्थानि '
चतुष्टया वै पशवो ' ऽथो चतुष्पादः पशवः ' पशूनामाप्त्यै '
त एते स्तोत्रियानुरूपास्तृचा अर्धर्चशस्याः[18] ' प्रतिष्ठा वा
अर्धर्चः[19] ' प्रतिष्ठित्या एवांथैतेषामेवाश्विनानां सूक्तानां

---

1) °वन्ति E; 2) So corr.; die hss. यदाप्ना°; 3) So corr.; die hss. °र्यामा अयो; 4) So corr.; वापुरिति A; वापुरिति E; वापुरिति F; 5) यज्ञामन F; 6) इतो A und E; 7) °तदुक्त A und F; 8) ? ?; 9) द्विश्वजि E; 10) पृष्ठयनु E; 11) °वमित्रेति D; 12) श्रेष्ठनि D; 13) ? ? संशयान्° D; 14) उक्थांनाग्नेयं D; 15) तत्रोत्तर A und F; 16) °स्योक्तं D; 17) °क्तोक्तानि D; 18) °र्चशस्य E; 19) So corr.; die hss. वार्धर्चः.

द्वे द्वे समाहावमेकैकमहरहः शंसत्यश्विनौ[1] वै देवानां भिषजौ॰ तस्मादाश्विनानि सूक्तानि शंसति[2] ' तदश्विभ्यां प्रददुरिदं भिषज्यतमिति ' क्षेत्रपत्याः[3] परिधानीया भवन्ति ' यत्र ह तस्तत्प्रजा[4] अशनायन्तीः पिपासन्तीः[5] संरुद्धा स्थिता आसंस्ता दीना एताभिर्यथाक्षेत्रं[6] पाययां चकार तर्पयां चकाराथो इयं वै क्षेत्रं पृथिव्यस्यामदीनायामन्ततः प्रतिष्ठास्यामह इति ' त्रिष्टुभो याज्या भवन्ति[7] ' यत्र ह तस्तत्प्रजा[4] अशनायन्तीः पिपासन्तीः[8] संरुद्धा स्थिता बभूवुस्ता हैवैना एताभिर्यथौकसं व्यवसाययां[9] चकार ' तस्मादेता याज्या भवन्ति तस्मादेता[10] याज्या[10] भवन्ति[10] '

॥ १० ॥

अथतो ऽनैकाहिकं ' अस्तोत्रियमन्वस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातःसवने ' ऽहीनमेव तत्संतन्वन्त्यहीनस्य संतत्यै ' तद्यथा ह वा एकाहः सुत[11] एवमहीनः सुतस्तं यथैकाहस्य सुतस्य सवनानि संतिष्ठमानानि यन्त्येवमहीनस्य[12] सुतस्याहानि संतिष्ठमानानि यन्ति ' तद्यच्छ्वस्तो-

---

1) शंसत्या° F; 2) शंसन्ति A und F; 3) So corr.; die hss. क्षेत्रपत्य:; 4) ??; 5) पिपासन्तो A, D und F; पिपासन्तो: E; 6) °क्षत्रं D; 7) भवति F; 8) So corr.; die hss. पिपा°; 9) व्यवसायां D; 10) Fehlt in A sec. m., D und F; 11) स्तुत A sec. m., D und F; 12) यन्त्येव° D.

त्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातःसवने । ऽहरेवं तदह्नो ऽनुरूपं कुर्वन्त्यपरेणैव[1] तदह्नापरमहरभ्यारभन्ते[2] तत्तथा न माध्यंदिने सवने । श्रीर्वै पृष्ठानि । तानि तस्मिन्नेवावस्थितानि भवन्त्येतेनैव विधिना तृतीयसवने[3] । न श्वस्तोत्रियमद्यस्तोत्रियस्यानुरूपं[4] कुर्वन्ति । ॥ ११ ॥

अथात आरम्भणीया एव । ऋजुनीती[5] नो वरुण इति मैत्रावरुणस्य मित्रो नयतु विद्वानिति । प्रणेता वा एष होत्रकाणां यन्मैत्रावरुणस्तस्मादेषा प्रणेत्रिमती[6] भवतीन्द्रं[7] वो विश्वतस्परीति ब्राह्मणाच्छंसिनो । हवामहे जनेभ्य इतीन्द्रमेवैतयाहरहर्निर्ह्वयन्ते । न हैवैषां[8] विहवे ऽन्य इन्द्रं[9] वृङ्क्ते यत्रैवं विद्वान्ब्राह्मणाच्छंस्येतामहरहः शंसति । यत्सोम आ सुते[10] नर[11] इत्यच्छावाकस्यैन्द्राग्नी अजोहवुरितीन्द्राग्नी एवैतयाहरहर्निर्ह्वयन्ते[12] । न हैवैषां[13] विहवे ऽन्य[14] इन्द्राग्नी[14] वृङ्क्ते यत्रैवंविद्वानच्छावाक[15] एतामहरहः[16] शंसति । ता वा एताः स्वर्गस्य

---

1) कुर्वन्त्यवरेणैव D; 2) °रभते A sec. m.; 3) °सदने E; 4) श्वस्तोत्रियमद्यस्तोत्रि° F; 5) ऋतुनीति D; ऋतुनीती E; 6) प्रणेत्रीमती D; 7) भवन्तीन्द्रं D und E; 8) ह वैषां A pr. m.; 9) इन्द्राग्नीं E; 10) सते A sec. m., und D; 11) Fehlt in F; 12) °र्निह्वयन्ति D; 13) हैषां D; 14) ऽन्येन्द्राग्नी D; ऽन्य इन्द्राग्नीं E; 15) Die hss. °च्छावाकस्यैता°; 16) अहः nur einmal in E.

लोकस्य नावः संतारण्यः 'स्वर्गमेवैताभिर्लोकमनुसंतरन्ति[1]' ॥ १२ ॥

अथातः परिधानीया एव 'ते स्याम देव वरुणेति मैत्रावरुणस्येयं स्वश्च[2] धीमहीत्ययं[3] वै लोक इषमित्यसौ लोकः स्वरित्युभावेवैनौ तौ लोकावारभते' व्यन्तरिक्षमतिरदिति ब्राह्मणाच्छंसिनो' विवत्तृचं[4]' स्वर्गमेवैताभिर्लोकं विवृणोति 'मदे सोमस्य रोचनेन्द्रो यदभिनद्वलमिति[5]' 'सिषासवो[6] ह वा एते यद्दीक्षितास्तस्मादेषा वलवती भवत्युद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः। अर्वाञ्चं नुनुदे वलमिति' सनिमेतेभ्य एतयावरुन्द्ध' इन्द्रेण रोचना दिवो दृढानि दृंहितानि च। स्थिराणि न पराणुद इति' स्वर्गमेवैतयाहरहर्लोकमवरुन्द्ध' आहं स्वरस्वतीवतोरित्यच्छावाकस्येन्द्राग्न्योरवो वृण इत्येतद्ध वा इन्द्राग्न्योः प्रियं धामो यद्वागिति' प्रियेणैवैनौ[7] तद्धाम्ना समर्धयति' प्रियेणैव धाम्ना समृध्यते य एवं वेद' ॥ १३ ॥

उभय्यो[8] होत्रकाणां परिधानीया भवन्त्यहीनपरि-

---

1) °संचरन्ति A, D und F; °संचरति E; 2) अस्व A, D und E; 3) °ित्ययं F; 4) विवृचं E; 5) °दृब्रलमिति A pr. m. und F; 6) निषिसवो A pr. m.; 7) प्रियेणैनौ D; 8) उभयो A, D und E.

धानीयाश्चैकाहिकस्य[1] ' तत ऐकाहिकीभिरेव मैत्रावरुणः परिदधाति ' तेनास्माल्लोकान्न प्रच्यवत ' आहीनिकीभिरच्छावाकः ' स्वर्गस्य लोकस्याप्त्या ' उभयीभिर्ब्राह्मणाच्छंस्येवमसावुभौ[2] व्यन्वारभमाण एतीमं च[3] लोकममुं चाथो ऽहीनं चैकाहं चाथो[4] संवत्सरं चाग्निष्टोमं चाथो मैत्रावरुणं चाच्छावाकं चैवमसावुभौ व्यन्वारभमाण एत्यथ तत ऐकाहिकीभिरेव तृतीयसवने होत्रकाः परिदधति[5] ' तेनास्माल्लोकान्न प्रच्यवत ' आहीनिकीभिरच्छावाकः ' स्वर्गस्य लोकस्य समष्ट्यै ' कामं तद्धोता शंसेद्यद्धोत्रकाः[6] पूर्वेद्युः शंसेयुर्यद्वै होता तद्धोत्रकाः[6] ' प्राणो वै होताङ्गानि होत्रकाः ' समानो वा अयं प्राणो ऽङ्गान्यनुसंचरति ' तस्मात्तत्कामं होता शंसेद्यद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्वै होता तद्धोत्रका ' आत्मा वै होताङ्गानि होत्रकाः ' समाना वा इमे ऽङ्गानामन्तास्तस्मात्तत्कामं[7] होता शंसेद्यद्धोत्रकाः पुर्वेद्युः शंसेयुर्यद्वै होता तद्धोत्रकाः ' सूक्तान्तैर्होता परिदधात्यथ समान्य[8] एव होत्रकाणां परिधानीया भवन्ति ' ॥ १४ ॥

1) भवत्य° D und E; 2) उभायो° E; 3) व F; 4) वायो D
5) So corr.; die hss. °दधाति; 6) °त्रकः D; 7) ऽङ्गानामन्त्रास्त° D,
8) सामान्य A pr. m.; D und E.

यः श्वस्तोत्रियस्तमन्यस्तोत्रियस्यानुरूपं कुर्वन्ति प्रातः-
सवने ' ऽहीनमेव तत्संतन्वन्त्यहीनस्य[1] संतत्यै ' त[2] एते
होत्रकाः प्रातःसवने षडहस्तोत्रियं शस्त्वा[3] माध्यंदिने
ऽहीनसूक्तानि शंसन्त्या[4] सत्यो यातु मघवां ऋजीषीति '
सत्यवन्मैत्रावरुणो[5] ' ऽस्मा इदु प्र तवसे तुरायेति ब्राह्म-
णाच्छंसी ' शासद्वह्निर्दुहितुर्नप्त्यं गादित्यच्छावाकस्तदाहुः
कस्मादच्छावाको वह्निवदेतत्सूक्तमुभयत्र[6] शंसति स[7] प-
राङ्ङु चैवाहःस्वर्वाङ्ङु[8] चेति ' वीर्यवान्वा एष बह्वृचो यद-
च्छावाको ' वहति ह वै वह्निर्धुरो यासु युज्यते ' तस्मा-
दच्छावाको वह्निवदेतत्सूक्तमुभयत्र[9] शंसति स[7] पराङ्ङु
चैवाहःस्वर्वाङ्ङु[10] चेति ' तानि पञ्चस्वहःसु शस्यन्ते च-
तुर्विंशे ऽभिजिति विषुवति विश्वजिति महाव्रते ' तान्ये-
तान्यहीनसूक्तानीत्याचक्षते ' न ह्येषु किं चन हीयते '
पराञ्चि ह वा एतान्यहान्यनभ्यावर्तीनि[11] भवन्ति ' त-
स्मादेतान्येतेष्वहःसु शस्यन्ते ' यदेतानि शंसन्ति[12] तत्स्व-
र्गस्य लोकस्य रूपं ' यद्वेवैतानि शंसन्तीन्द्रमेवैतैर्निर्ह्वयन्ते[13]

---

1) तत्संतन्वत्य° D; 2) Fehlt in D; 3) शंसा F; 4) शंसत्या° D und E; 5) सत्यवान्मै° A pr. m.; 6) °मुतयत्र D; °मुभयति F; 7) ??; 8) So corr.; चैवाहस्वर्वाङ्ङु A, E und F; चैवाहः सर्वाङ्ङु D; 9) वह्निवदेतत्सू° A; 10) So corr.; die hss. चैवाहस्वर्वाङ्ङु; 11) So corr.; die hss. एतान्यहान्यभ्या°; 12) शंसति D; 13) शंसन्तो° A.

यथर्षभं वाशितायै ' ते वै देवाश्चर्षयश्चाब्रुवंत्समानेन यज्ञं संतन्वामहा इति ' तदेतद्यज्ञस्य समानमपश्यंत्समानान्प्रगाथांत्समानीः प्रतिपदः समानानि सूक्तान्योकःसारी वा इन्द्रो ' यत्र वा इन्द्रः पूर्वं[1] गच्छति[2] गच्छत्येव तत्रापरं ' यज्ञस्यैव सेन्द्रतायै ' ॥ १५ ॥

॥ इत्यथर्ववेदे गोपथब्राह्मणोत्तरभागे पञ्चमः प्रपाठकः ॥

ओं तान्वा एतान्संपातान्विश्वामित्रः प्रथममपश्यदेवा त्वामिन्द्र वज्रिन्नत्र यन्न इन्द्रो जुजुषे[3] यच्च वष्टि कथा महामवृधत्कस्य[4] होतुरिति ' तान्विश्वामित्रेण दृष्टान्वामदेवो[5] ऽसृजत ' स हेक्षां चक्रे विश्वामित्रो यान्वा[6] अहं[6] संपातानदर्शं तान्वामदेवो[7] ऽसृजत ' कानि न्वहं[8] हि[9] सूक्तानि संपातांस्तत्प्रतिमान्सृजेयमिति[10] ' स एतानि सूक्तानि संपातांस्तत्प्रतिमानसृजत[11] ' सद्यो ह जातो वृषभः कनीन उद्गु ब्रह्माण्यैरत[12] ऽवस्याभि तष्टेव दीधया मनी-

1) पूर्वं F; 2) गच्छति fehlt in F; 3) जुषे D; 4) नाह° A pr. m.; 5) दृष्टा° A sec. m. und E; 6) यान्वाहं A und F; यावान्वाहं D; 7) °दर्शंस्तान्वामदेवो E; 8) So corr.; die hss. त्वं; 9) Korrupt!; 10) °त्प्रतिमानसृजेतेयमिति E; °त्प्रतिमानसृजयमिति D; 11) °सृजते A pr. m.; 12) ब्रह्माण्यं° D.

षामिति विश्वामित्र ' इन्द्रः पूर्भिदातिरद्दासमर्कैर्य [1] एक इद्धव्यश्चर्षणीनां [2] यस्तिग्मशृङ्गो वृषभो न भीम इति वसिष्ठ ' इमामू षु प्रभृतिं सातये धा इच्छन्ति [3] त्वा सोम्यासः सखायः [4] शासद्वह्निर्दुहितुर्नप्त्यं [5] गादिति भरद्वाज ' एतैर्वै संपातैरेत [6] ऋषय इमांल्लोकान्त्समपतंस्तंयत्समपतंस्तस्मात्संपातास्तत्संपातानां संपातत्वं ' ततो वा एतांस्त्रीन्संपातान्मैत्रावरुणो विपर्यासमेकैकमहरहः [7] शंसत्येवा त्वामिन्द्र वज्रिन्नत्रेति प्रथमे ऽहनि ' यन्न इन्द्रो जुजुषे यच्च वष्टीति [8] द्वितीये ' कथा महामवृधत्कस्य होतुरिति तृतीये ' त्रीनेव संपातान्ब्राह्मणाच्छंसी विपर्यासमेकैकमहरहः शंसतीन्द्रः पूर्भिदातिरद्दासमर्कैरिति प्रथमे ऽहनि ' य एक इद्धव्यश्चर्षणीनामिति द्वितीये [9] ' यस्तिग्मशृङ्गो वृषभो न भीम इति तृतीये ' त्रीनेव संपातानच्छावाको विपर्यासमेकैकमहरहः शंसतीमामू षु प्रभृतिं सातये धा इति प्रथमे ऽहनीच्छन्ति त्वा सोम्यासः सखाय इति द्वितीये ' शासद्वह्निर्दुहितुर्नप्त्यं गादिति तृतीये ' तानि वा एतानि नव त्रीणि चाहरहःशंस्यानि [10] '

---

1) पूर्भिदत्ति° A pr. m.; 2) मुर्त्तणीनां E; 3) इच्छन्ते A; 4) खाय: E; 5) प्रसद्द° E; 6) संपतेरेत D; 7) °कमह: A sec. m.; 8) वष्टोति A pr. m.; 9) द्वे F; 10) वाहरह:° E.

तानि द्वादश भवन्ति ' द्वादश ह वै मासाः संवत्सरः ' संवत्सरः[1] प्रजापतिः ' प्रजापतिर्यज्ञस्तंत्संवत्सरं[2] प्रजापतिं यज्ञमाप्नोति[3] ' तस्मिंत्संवत्सरे प्रजापतौ[4] यज्ञे ऽहरहः प्रतितिष्ठन्तो यन्ति ' प्रतितिष्ठत[5] ' इदं सर्वमनु प्रतितिष्ठति[6] ' प्रतितिष्ठति[6] प्रजया पशुभिर्य एवं वेद ' तान्यन्तरेणावापमावपेरन्नंन्यूङ्खा[7] विराजश्चतुर्थे ऽहनि वैमदीश्च[8] पङ्क्तीः पञ्चमे पारुच्छेपीः[9] षष्ठे ' अथ यान्यन्यानि महास्तोत्राण्यष्टर्चान्यावपेरन् ॥ १ ॥

को अद्य[10] नर्यो देवकाम इति मैत्रावरुणो[11] ' वने न वा यो न्यधायि चाकन्निति ब्राह्मणाच्छंस्यां याह्यर्वाङुपवन्धुरेष्ठा[12] इत्यच्छावाक ' एतानि वा आवपनान्येतैरेवावपनैर्देवाश्चर्षयश्च[13] स्वर्गं लोकमायंस्तथैवैतद्यजमाना एतैरेवावपनैः[14] स्वर्गं लोकं यन्ति ' सद्यो ह जातो वृषभः कनीन[15] इति मैत्रावरुणः पुरस्तात्संपातानामहरहः शंसति ' तदेतत्सूक्तं स्वर्ग्यमेतेन[16] सूक्तेन

---

1) Fehlt in D; 2) °स्तं संवर्त्सरं D; 3) °प्नोति Sing. und Plur. durch einander gebraucht; Ait. Br. VI 19, 7; अपुवन्ति; 4) प्रजापतै A pr. m. und D; प्रजापति: E; 5) So corr.; die hss. प्रतिष्ठन्त; 6) °तिष्ठन्ति D; 7) °न्यूङ्ख A; 8) So corr.; die hss. वैपदीश्च; 9) So corr.; die hss. पारुत्नेपी:; 10) अद्यं E; 11) °रुणौ F; 12) °पबन्धुरेष्ठा D und F; 13) आवपमानान्ये° E; °पनेदेवाश्च D; 14) °वपने: D; 15) वतीन E; 16) स्वर्गने° A pr. m., D, E und F.

देवाश्चर्षयश्च स्वर्गं[1] लोकमायंस्तथैवैतद्यजमाना[2] एते-
नैव सूक्तेन स्वर्गं[1] लोकं यन्ति । तदृषभवत्पशुमद्भवति ।
पशूनामाप्त्यै । तत्पञ्चर्चं भवत्यन्नं वै पङ्क्तिरन्नाद्यस्यावरु-
द्ध्या[3] । अरिष्टैर्नः पथिभिः पारयन्तेति[4] स्वर्गतायाः[5] ए-
वैतदहरहः शंसत्युत ब्रह्माण्यैरत[6] अवस्येति[7] ब्राह्म-
णाच्छंसी । ब्रह्मण्वदेतत्सूक्तं समृद्धमेतेन सूक्तेन देवाश्चर्ष-
यश्च स्वर्गं[8] लोकमायंस्तथैवैतद्यजमाना एतेनैव सूक्तेन
स्वर्गं[9] लोकं यन्ति । तद्वै षडृचं[10] । षड्वा ऋतव । ऋ-
तूनामाप्त्यै । तदुपरिष्टात्संपातानामहरहः शंसत्यभि तष्टेव
दीधया मनीषामित्यच्छावाको[11] ऽहरहः शंसत्यभिवदति[12]
तत्यै[13] रूपमभि प्रियाणि मर्मृशत्पराणीति । यान्येव प-
राण्यह्नानि तानि प्रियाणि । तान्येव तदभिमर्मृशन्तो यन्त्य-
न्वारभमाणाः । परो वा अस्माल्लोकात्स्वर्गो[14] लोकः ।
स्वर्गमेव तल्लोकमभिमृशन्ति । कवीँरिच्छामि[15] संदृशे[16]
सुमेधा इति । ये ह वा अनेन पूर्वे प्रेतास्ते[17] वै कव-

---

1) स्वर्गां A, E und F; 2) °जमानां A pr. m.; 3) °धस्यावरुन्ध्या D; 4) पारयन्त्विति A pr. m. D, E und F; 5) स्वर्गाताया A und F; 6) °पयैरेत A pr. m. und F; 7) स्नुवत्येति D; 8) स्वर्गां A und F; 9) स्वर्गां A; 10) षडर्चं A und F; 11) °त्याच्छावाको A; 12) °भि-वदन्ति A, D, E; 13) तप्वे A und D; 14) So corr.; °ल्लोको स्वर्गो A pr. m.; °ल्लोका: स्वर्गो A sec. m. D, E und F; 15) कावां° E; 16) संदृशे A; 17) So corr.; die hss. प्रेतास्ते.

यस्तांनेव[1] तदभ्यतिवदति ' यद्व वै दशर्चं[2] दश वै प्राणाः ' प्राणानेव तदाप्नोति ' प्राणानां संतत्यै ' यद्व वै दशर्चं ' दश वै पुरुषे प्राणा ' दश स्वर्गा[3] लोकाः ' प्राणांश्चैव तत्स्वर्गांश्च लोकानाप्नोति ' प्राणेषु चैवैतत्स्वर्गेषु च[4] लोकेषु प्रतितिष्ठन्तो[5] यन्ति ' यद्व वै दशर्चं ' दशाक्षरा विराडियं वै स्वर्गस्य लोकस्य[6] प्रतिष्ठा ' तदेतदस्यां प्रतिष्ठायां प्रतिष्ठापयति[7] ' सकृदिन्द्रं निराह ' तेनैन्द्राद्रूपान्न प्रच्यवते ' तदुपरिष्टात्संपातानामहरहः शंसति ' ॥ २ ॥

कस्तमिन्द्र त्वावसुं कन्नव्यो अतसीनां कद्रू न्वस्याकृतमिति[8] कद्वन्तः प्रगाथा अहरहः शस्यन्ते ' को[9] वै प्रजापतिः ' प्रजापतेराप्त्यै ' यदेव कद्वन्तस्तांत्स्वर्गस्य लोकस्य रूपं ' यद्वेव कद्वन्तो ' ऽथो अन्नं वै कमंथो अन्नस्यावरुद्ध्यै[10] ' यद्वेव कद्वन्तो ' ऽथो सुखं वै कमंथो सुखस्यावरुद्ध्यै ' यद्वेव कद्वन्तो ' ऽथो ऽहरहर्वा एते शान्तान्यहीनसूक्तान्युपयुञ्जाना[11] यन्ति ' तानि कद्वद्भिः प्रगाथैः शमयन्ति ' तान्येभ्यः शान्तानि कं भवन्ति[12] ' तान्येताञ्छान्तानि[13] स्वर्ग[14]

1) So corr.; die hss. तान्येव; 2) दशर्चे E; 3) So corr.; die hss. स्वर्गो; 4) Fehlt in E; 5) °ष्ठन्ति D; 6) Fehlt in A, D und F; 7) °पयन्ति A pr. m.; 8) न्वास्याकृ° A pr. m. D und F; 9) So corr.; die hss. शंसत्येको; 10) अन्यस्या° D; 11) °पयुञ्जाना D; 12) भवन्ति D und E; 13) ताञ्छातानि E; 14) स्वर्गा A, स्वर्ग D.

लोकमभिवहन्ति । त्रिष्टुभः सूक्तप्रतिपदः[1] शंसेयुस्ता हैके पुरस्तात्त्रिगाथानां[2] शंसन्ति धाय्या इति वदन्तस्तदु तथा न कुर्यात्क्षत्रं वै होता विशो होत्राशंसिनः । क्षत्रायैव[3] तद्विशं[4] प्रत्युद्यामिनीं कुर्युः । पापवस्यसं[5] । त्रिष्टुभो[6] वा[7] इमाः सूक्तप्रतिपद[8] इत्येवं विद्याद्यथा वै समुद्रं प्रतरेयुरेवं हैवैते प्रप्लवन्ते[9] ये संवत्सरं द्वादशाहं वोपासते[10] । तद्यथा सैरावतीं[11] नावं पारकामाः समारोहेयुरेवं हैवैतास्त्रिष्टुभः स्वर्गकामाः[12] समारोहन्ति । न ह वा एतच्छन्दो गमयित्वा[13] स्वर्गं[14] लोकमुपावर्तन्ते[15] । वीर्यवत्तमं[16] हि । ताभ्यो न व्याहृयीत[17] । समानं हि छन्दो । ऽथो नेद्धाय्याः[18] करवाणीति । यदेनाः शंसन्ति[19] तत्स्वर्गस्य लोकस्य रूपं । यद्वेवैनाः शंसन्तीन्द्रमेवैताभिर्निर्ह्वयन्ति[20] यथर्षभं[21] वाशितायै[22] । ॥ ३ ॥

---

1) सूक्तः प्रति° A sec. m., E und F; 2) °गाथाना A sec. m. und F; 3) So corr.; die hss. क्षत्रस्यैव; 4) So corr.; die hss. तद्विषं; 5) So corr.; A und F पापमनस्यसं; D und E पावनस्यसं; 6) त्रिष्टुभो F; 7) ?? मा D; vielleicht न?; 8) °तिपाद् D; 9) प्रप्लवयन्ते F; 10) वोपासन्ते A, D und E; 11) सैरावती D, E und F; 12) स्वर्गाकामाः A und F; 13) गामयित्वा D; 14) स्वर्गा A; 15) °वर्तीते A pr. m.; °वर्तन्ते D und E; 16) विर्यवन्तं नं D, E und F; 17) यो हृयीत A pr. m.; °व्याहृयीत E und F; 18) So corr.; die hss. न्ये धाय्याः; 19) शंसति D und E; 20) शंसतीन्द्र° E; 21) °षो D; 22) So corr.; die hss. वासितायै.

अपेन्द्र प्राचो मघवन्नमित्रानिति मैत्रावरुणः पुरस्तात्संपातानामहरहः शंसत्यपापाचो[1] अभिभूते[2] नुदस्वापोदीचो[3] अप शूराधराच[4] उरौ यथा तव शर्मन्मदेमेत्यभयस्य रूपमभयमिव[5] ह्यन्विच्छति[6] ब्रह्मणा[7] ते[8] ब्रह्मयुजा[9] युनज्मीति ब्राह्मणाच्छंस्येतामहरहः शंसति[10] युक्तवतीं युक्त इव[11] ह्यहीनो ऽहीनस्य रूपमुरुं नो लोकमनुनेषीत्यच्छावाको ऽहरहः शंसत्यनुनेषीत्येत इव[11] ह्यहीनो ऽहीनस्य रूपं नेषीति सत्त्रायणरूपमोकःसारी[12] हैवैषामिन्द्रो भवति यथा गौः प्रज्ञातं[13] गोष्ठं[14] यथर्षभो[15] वाशिताया[16] एवं[17] हैवैषामिन्द्रो यज्ञमागच्छति[18] न शुनंहूययाहीनस्य[19] परिदध्यान्नेत्रियो[20] ह राष्ट्राच्च्यवते यो हैव परो भवति तमभिह्वयति[21] ॥ ४ ॥

अथातो ऽहीनस्य[22] युक्तिश्च विमुक्तिश्च व्यन्तरिक्षम-

1) °पायायो E; 2) अभिभूतं D; 3) °पोदेचो E; 4) श्यूरध° A pr. m. und D; 5) अभयम् fehlt in D; 6) So corr.; die hss. °च्छेति; 7) ब्राह्मणा D; 8) ते A; 9) ब्राह्मणायुजा D; 10) शंसन्ति A sec. m.; D, E und F; 11) इवा A pr. m., D, E und F; 12) So corr.; सौत्रायणा° D; सत्रायण A, E und F; 13) प्रतातं A, D und E; 14) गोष्ट D; 15) So corr.; die hss. यथर्षभं; 16) So corr.; die hss. वासिताया; 17) एव A sec. m. und F; 18) °गच्छन्ति A pr. m., D, E und F; 19) हुयया° A pr. m.; 20) परिदधात्त° D; परिदध्या त्नेत्रियो E; 21) तमपिह्वयति E; 22) So corr.; die hss. ऽहीनश्च.

तिरित्यहीनं[1] युङ्क्ते[2] ' एवेदिन्द्रमिति विमुञ्चति ' नूनं सा त इत्यहीनं[3] युङ्क्ते[4] ' नू ष्टुत इति विमुञ्चत्येष ह[5] वा अहीनं तन्तुमर्हति य एनं योक्तुं[6] च विमोक्तुं च वेद ' तस्य हैषैव युक्तिरेषा विमुक्तिस्तांश्चेत्प्रथमे ऽहनि चतुर्विंश[7] एकाहिकीभिः[8] परिदध्युः प्रथम एवाहनि यज्ञं संस्थापयेयुर्नाहीनकर्म कुर्युरथ यदहीनपरिधानीयाभिः[9] परिदध्युस्तद्यथा युक्तो ऽविमुच्यमान[10] उत्कृत्येतैवं यजमाना उत्कृत्येरन्नाहीनकर्म कुर्युरथ यदुभयीभिः परिदध्युस्तद्यथा दीर्घाध्व उपविमोकं[11] यायात्तादृक्तत्समानीभिः[12] परिदध्युस्तदाहुरेकया द्वाभ्यां वा स्तोममतिशंसेद्दीर्घारण्यानि[13] भवन्ति ' यत्र बह्वीभि स्तोमो ऽतिशस्यते ऽथो क्षिप्रं देवेभ्यो ऽन्नाद्यं संप्रयच्छामीत्यपरिमिताभिरुत्तरयोः[14] सवनयोरपरिमितो[15] वै स्वर्गो लोकः[16] ' स्वर्गस्य[16] लोकस्य समष्ट्यै ' तद्यथाभिह्वयते[17] पिपासते क्षिप्रं प्रयच्छेत्तादृक्तत्समानीभिः परिदध्युः ' संततो हैवै-

---

1) °रद्दीत्यहीनं A, D und F; 2) युक्त A pr. m., D und E; 3) °हीन E; 4) युक्ते A pr. m. und D; 5) Fehlt in D; 6) योक्त F; 7) °विंशति D; 8) एकाहीकिभिः F; 9) Die hss. यदहीनः परि°; 10) So corr.; die hss. °माना; 11) °मोकयं A sec. m.; 12) याद्यास्तादृ° A pr. m., E und F; याद्यास्तादृ° D; 13) °रण्यनि A pr. m.; 14) संप्रयच्छमीत्य° A und E; 15) सवनेयोर° A pr. m.; 16) Fehlt in D; 17) यथाभितहैते F.

षामारब्धो ऽविस्रस्तो यज्ञो भवति 'संततमृचा[1] वषट्कृत्यं' संतत्यै[2] 'संधीयते प्रजया पशुभिर्य एवं वेद' ॥ ५ ॥

तदाहुः कथं द्व्युक्थो[3] होतैकसूक्त एकोक्था होत्रा द्विसूक्ता[4] इत्यसौ वै होता यो ऽसौ तपति 'स वा एक एव' तस्मादेकसूक्तः 'स यद्विख्यातो द्वाविवाभवति' तेन एव मण्डलं भा अपरं शुक्लमपरं कृष्णं' तस्माद् द्व्युक्थो' रश्मयो वाव होत्रास्तें[5] वा एकैकं[6] 'तस्मादेकोक्थास्तांयदेकैकस्य[7] रश्मेर्द्वौ[8] द्वौ वर्णौ भवतस्तस्माद्द्विसूक्ताः[9] 'संवत्सरो वाव होता' स वा एक एव' तस्मादेकसूक्तस्तस्य[10] यद्द्व्यान्यहानि भवन्ति शीतान्यन्यान्युष्णान्यन्यानि तस्माद् द्व्युक्थ[11] 'ऋतवो वाव होत्रास्तें वा एकैकं' तस्मादेकोक्थास्तांयदेकैकस्यर्तौ[12] द्वौ[12] द्वौ मासौ भवतस्तस्माद्द्विसूक्ताः' पुरुषो वाव होता' स वा एक एव' तस्मादेकसूक्तः' स यत्पुरुषो भवत्यन्यथैव प्रत्यङ्भवत्यन्यथा प्राङ्स्माद् द्व्युक्थो' ऽङ्गानि वाव होत्रास्तानि वा एकैकं' तस्मादेकोक्थास्तांयदेकैकमङ्गं द्युतिर्भवति तस्माद्

---

1) ततमृचा D; 2) तत्यै E; 3) द्व्युक्तं F; 4) द्विसूत्रा F; 5) होत्रका D; 6) Hier endet E; 7) तस्मादेकाच्छ्व° D; 8) So corr.; die hss. रश्मे द्वौ; 9) भवन्तस्त° A pr. m.; °सूक्तः A pr. m. und D; 10) सूक्तस्य F; 11) °द्व्युकथा F; 12) So die hss.; wschl. °स्तयदेकैकस्यर्तोर्द्वौ.

द्विसूक्तास्तंदाहुर्यद् ह्युक्थो होतिकसूक्त एकोक्था होत्रा द्विसूक्ताः कथं तत्सम्ं भवति ' यदेव द्विदेवत्याभिर्यजन्त्ययो[1] °यद्विसूक्ता होत्रा इति ब्रूयात्तंदाहुर्यदग्निष्टोम[2] एव सति यज्ञे द्वे होतुरुक्थे अतिरिच्येते कथं ततो होत्रा न व्यवच्छिद्यन्त इति ' यदेव द्विदेवत्याभिर्यजन्त्ययो यद्विसूक्ता होत्रा इति ब्रूयात्तंदाहुर्यदग्निष्टोम[2] एव[3] सति[3] यज्ञे सर्वा देवताः सर्वाणि छन्दांस्याप्याययन्त्यंथ कतमेन छन्दसायातंयामान्युक्थानि प्रणयन्ति कया देवतयेति ' गायत्रेण छन्दसाग्निना देवतयेति ब्रूयाद्देवान्ह यज्ञं तन्वानानसुररक्षांस्यभिचेरिरे[4] यज्ञपर्वाणि[5] यज्ञमेषां हनिष्यामस्तृतीयसवनं[6] प्रति ' तृतीयसवने ह यज्ञस्त्वरिष्टो[7] बलिष्ठः ' प्रतनुमेषां[8] यज्ञं हनिष्याम[9] इति ' ते वरुणं दक्षिणतो ऽयोजयन्मध्यतो[10] बृहस्पतिमुत्तरतो विष्णुं ' ते ऽब्रुवन्नेकैकाः स्मो ' नेदमुत्सहामह इति ' स्तुतो द्वितीयो येनेदं सह[11] व्यश्नवामहा[11] इति ' तानिन्द्रो ऽब्रवीत्सर्वे मद्वितीया स्थेति ' ते सर्व[12]° इन्द्रद्वितीयास्तंस्मादैन्द्रा-[13]

---

1) °भियज्ञत्ययो D; 2) °दाग्निष्टोम A sec. m. und F; 3) Fehlt in F; 4) So corr.; die hss. तन्वाना असुर°; 5) Fehlt in D; 6) हविष्या° F; 7) ? ? vielleicht °रिष्टो; 8) ? ?; 9) हविष्याम A pr. m. und F; 10) ऽयोजयान्म° A pr. m., D und E; 11) समश्नवा° D; 12) सर्वे A pr. m.; 13) So corr.; die hss. इन्द्रं द्वि°.

वारुणमैन्द्राबार्हस्पत्यमैन्द्रावैष्णावमनुशस्यते[1]' द्वितीयवन्तो ह वा एतेन स्वा भवन्ति' द्वितीयवन्तो मन्यन्ते[2] य[3] एवं[3] वेद[3]' ॥ ६ ॥

आग्नेयीषु मैत्रावरुणस्योक्थं प्रणयन्ति' वीर्यं वा अग्निर्वीर्येणैवास्मै[4] तत्प्रणयत्यैन्द्रावारुणमनुशस्यते[4]' वीर्यं वा इन्द्रः' क्षत्रं वरुणः' पशव उक्थानि' वीर्येणैव तत्क्षत्रेण चोभयतः पशून्परिगृह्णाति' स्थित्या' अनपक्रान्त्या' ऐन्द्रीषु ब्राह्मणाच्छंसिन उक्थं प्रणयन्ति' वीर्यं वा इन्द्रो' वीर्येणैवास्मै तत्प्रणयत्यैन्द्राबार्हस्पत्यमनुशस्यते[5]' वीर्यं वा इन्द्रो' ब्रह्म बृहस्पतिः' पशव उक्थानि' वीर्येणैव तद्ब्रह्मणा[6] चोभयतः पशून्परिगृह्णाति' स्थित्या' अनपक्रान्त्या' ऐन्द्रीष्वच्छावाकस्योक्थं[7] प्रणयन्ति' वीर्यं वा इन्द्रो' वीर्येणैवास्मै तत्प्रणयत्यैन्द्रावैष्णावमनुशस्यते[8]' वीर्यं वा इन्द्रो' यज्ञो विष्णुः' पशव उक्थानि' वीर्येणैव तद्यज्ञेन चोभयतः पशून्परिगृह्य क्षत्रे[9] ऽन्ततः[9] प्रतिष्ठापयति' तस्मात्तु क्षत्रियो[10] भुयिष्ठं हि[11] पशूना-

1) ऐन्द्रावारुणम् fehlt in F; 2) मन्यते F; 3) य एवं वेद ist gedankenlos zugefügt; 4) अग्निर्वीर्येणैव तद्ब्रह्मणा चोभयतः पशून्परिगृह्णाति F; 5) तस्मात्प्रणा° F; °नुशिष्यते D; 6) तद्ब्राह्मणा D; 7) °कस्योक्थ D; 8) तत्प्रणायत्यैन्द्रा° F; 9) क्षत्रन्ततः A pr. m., D und E; 10) ?? क्षत्रिया?; 11) Korrupt.

मीशते[1] ' ऽधिष्ठाता[2] प्रदाता यस्मै प्रत्ता वेदा अवरुद्धा-स्तांन्येतान्यैन्द्राणि जागतानि शंसत्यथो[3] एतैरेव सेन्द्रं तृतीयसवनमेतैर्जागतं सवनं ' धराणि ह वा अस्यैतान्युक्थानि भवन्ति यन्नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुत्तस्मात्तानि[4] सार्धमेवोपेयुः ' सार्धमिदं रेतः सिक्तं[5] समृद्धमेकधा प्रजनयामिति ' ये ह वा एतानि नानूपेयुर्यथा रेतः सिक्तं[6] विलुम्पेत्कुमारं[7] वा जातमङ्गशो विभजेत्तादृक्तत्तस्मात्तानि[8] सार्धमेवोपेयुः[9] ' सार्धमिदं रेतः सिक्तं समृद्धमेकधा प्रजनयामिति ' शिल्पानि शंसति देवशिल्पान्येतेषां वै शिल्पानामनुकृतीह[10] शिल्पमधिगम्यते ' हस्ती कंसो वासो हिरण्यमश्वतरीरथः शिल्पं ' शिल्पं हास्य समधिगम्यते य एवं वेद ' यदेव शिल्पानि शंसति तत्स्वर्गस्य लोकस्य रूपं ' यद्वेव शिल्पान्यात्मसंस्कृतिर्वै शिल्पान्यात्मानमेवास्य तत्संस्कुर्वन्ति ' ॥ ७ ॥

नाभानेदिष्ठं शंसति ' रेतो वै नाभानेदिष्ठो ' रेत एवास्य तत्कल्पयति ' तद्रेतोमिश्रं भवति[11] ' ह्मया[12] रेतः

---

1) °मिशन्ते F; 2) ? ? यो ऽधि°; 3) शंसत्यथो D; 4) वृषाकपायिरेव° D; 5) सिक्ता D; 6) सिक्ता D; सिक्तुं F; 7) विलुम्पेत कु° F; 8) °त्तस्मात्तत्तानि D; 9) °वोपेयः D; 10) So corr.; die hss. °नुकृतिर्हि; 11) भवन्ति A und D; 12) ह्यया D.

संजग्मानो निषिञ्चदिति[1] ' रेतसः सम्पृञ्चा एव ' तं सनारशंसं[2] शंसति ' प्रजा वै नरो ' वाक्शंसः ' प्रजासु तद्वाचं[3] दधाति[4] ' तस्मादिमाः प्रजा वदन्त्यो जायन्ते ' तं हैके पुरस्तात्प्रगाथानां शंसन्ति पुरस्तादायतना वागिति वदन्त ' उपरिष्टादेक उपरिष्टादायतना वागिति वदन्तो ' मध्य एव शंसेन्मध्यायतना[5] वा इयं वागुपरिष्टान्नेदीयसीव ' तं होता रेतोभूतं शस्त्वा मैत्रावरुणाय संप्रयच्छत्येतस्य[6] त्वं प्राणान्कल्पयेति[7] ' वालखिल्याः शंसति[8] ' प्राणा वै वालखिल्याः ' प्राणानेवास्य तत्कल्पयति ' ता[9] विहृताः[10] शंसति ' विहृता[10] वै प्राणाः ' प्राणेनापानो ' ऽपानेन व्यानः ' स पच्छः प्रथमे सूक्ते विहरत्यर्धर्चशो द्वितिय[11] ' ऋक्शः तृतीये ' स यत्प्रथमे सूक्ते विहरति वाचं[12] चैव तन्मनश्च विहरति ' यद्द्वितीये[13] चक्षुश्चैव तच्छ्रोत्रं च विहरति ' यत्तृतीये प्राणं चैव तदात्मानं च विहरति ' तदुपाप्तो[14] विहरेत्कामो[14] ' नेतुर्वै[14] प्रगा-

---

1) ऽगिषि° D; 2) संनाराशंसं F; 3) तद्वाच A pr. m. und F; 4) दधामि D; 5) °न्मध्ययतना D; 6) संप्रयच्छेत्येतस्य L; 7) So corr.; die hss. °ल्पयति; 8) शंसन्ति F; 9) वा F; 10) विहिताः D; 11) द्वितीय A; 12) वाचां D; 13) °तीय A pr. m. und E; 14) Korrupt. Ait. Br. विहरे कामो नेतु वै D °न्येतुः वै.

याः कल्पन्ते[1] ' ऽतिमर्शमेव[2] विहरेत्तथा वै प्रगाथाः कल्पन्ते[3] ' यद्देवातिमर्शं तत्स्वर्गस्य लोकस्य रूपं ' यद्देवातिमर्शमात्मा वै बृहती ' प्राणाः सतोबृहती ' स बृहतीमशंसीत्स आत्माथ[4] सतोबृहतीं[5] ' ते प्राणा ' अथ बृहतीमंथ सतोबृहतीं ' तदात्मानं प्राणैः परिबृहन्नेति ' यद्देवातिमर्शमात्मा वै बृहती ' प्रजाः सतोबृहती ' स बृहतीमशंसीत्स आत्माथ सतोबृहतीं ' ते प्रजा ' अथ बृहतीमंथ सतोबृहतीं ' तदात्मानं प्रजया परिबृहन्नेति ' यद्देवातिमर्शमात्मा वै बृहती[6] ' पशवः सतोबृहती ' स बृहतीमशंसीत्स आत्माथ सतोबृहतीं ' ते पशवो ' ऽथ बृहतीमंथ सतोबृहतीं[7] ' तदात्मानं पशुभिः परिबृहन्नेति ' तस्य मैत्रावरुणः प्राणान्कल्पयित्वा ब्राह्मणाच्छंसिने संप्रयच्छत्येतस्य त्वं प्रजनयेति ' सुकीर्तिं शंसति ' देवयोनिर्वै सुकीर्तिस्तांयज्ञियायां देवयोन्यां यजमानं प्रजनयति[8] ' वृषाकपिं शंसत्यात्मा वै वृषाकपिरात्मानमेवास्य तत्कल्पयति ' तं न्यूङ्खयत्यंन्नं[9] वै न्यूङ्खो ' ऽन्नाद्यमेवास्मै तत्सं-

---

1) So corr.; कल्पयन्ते A und F; कल्पयन्त D; 2) So corr.; ऽतिमर्शं समेव A und F; ऽतिमर्श समेव D; 3) कल्पयन्ते D; 4) आत्मा F; 5) °बृहती A sec. m. und F; 6) बृहतीं A; 7) °बृहती F; 8) प्रजनयेति A und F; 9) So corr.; तन्यूङ्ख इत्यन्नं A und D; तन्यूङ्खमित्यन्नं F.

प्रयच्छति यथा[1] कुमाराय जाताय स्तनं 'स पाङ्क्तो[2] भवति[2] 'पाङ्क्तो ह्ययं पुरुषः पञ्चधा विहितो 'लोमानि त्वगस्थि मज्जा मस्तिष्कं 'स यावानेव पुरुषस्तावन्तं यजमानं संस्कृत्याच्छावाकाय संप्रयच्छत्यैतस्य त्वं प्रतिष्ठां कल्पयेत्यैवयामरुतं[3] शंसति 'प्रतिष्ठा वा एवयामरुत्प्रतिष्ठायामेवैनमन्ततः प्रतिष्ठापयति 'याज्यया यजत्यन्नं वै याज्यान्नाद्यमेवास्मै तत्संप्रयच्छति' ॥ ८ ॥

तानि वा एतानि सहचराणीत्याचक्षते यन्नाभानेदिष्ठो वालखिल्यो वृषाकपिरेवयामरुत्तानि सह वा[4] शंसेत्सह[4] वा न शंसेद्यदेषामन्तरीयात्तद्यजमानस्यान्तरीयाद्यदि[5] नाभानेदिष्ठं[6] रेतो ऽस्यान्तरीयाद्यदि वालखिल्याः प्राणानस्यान्तरीयाद्यदि वृषाकपिमात्मानमस्यान्तरीयाद्यद्येवयामरुतं प्रतिष्ठा वा एवयामरुत्प्रतिष्ठाया एवैनं तं च्यावयेद्दैव्याश्च मानुष्याश्च 'तानि सह वा शंसेत्सह वा न शंसेत्स ह बुडिल आश्वितरास्युर्विश्वजितो[7] होता सन्नीक्षां[8] चक्र एतेषां वा एषां[9] शिल्पानां विश्वजिति सांवत्सरिके द्वे होतुरुक्थे माध्यंदिनमभिप्रत्यवेते 'हन्ता-

1) कथा F; 2) Fehlt in D; 3) कल्पयेत्य° D und F; 4) वांशेत्सह D; 5) °तरीयायदि A; 6) °नेदिष्ठो F; 7) ? ?; अश्वितरा° A pr. m.; wschl. आश्वितराश्विर्विश्वजितो; 8) So corr.; die hss. सं दीक्षां; 9) एवा F.

हमित्यमेवयामरुतं शंसयानीति[1] ' तद्ध[2] तथा शंसयां[3] चक्रे ' तद्ध तथा शस्यमाने गोश्र आजगाम ' स होवाच होतः[4] कथा ते शस्त्रं विचक्रं[5] प्लवत इति ' किं ह्यभूदित्यैवयामरुदयमुत्तरतः शस्यत इति ' स होवाचेन्द्रो वै माध्यंदिनः ' कथेन्द्रं माध्यंदिनान्निनीषसीति[6] ' नेन्द्रं माध्यंदिनान्निनीषामीति[7] स होवाच ' छन्दस्त्विदममाध्यंदिनंसाचि[8] ' जागतं वातिजागतं वा ' स उ मारुतो ' मैवं संमृढेति ' स होवाचास्माच्छावाकेत्यथास्मिन्ननुशासनमीषे ' स होवाचेन्द्रमेव विष्णुन्यङ्गानि शंसत्वथ त्वं होतुरुपरिष्टाद्रौद्रिया धाय्यायाः पुरस्तान्मारुतस्य सूक्तस्याप्यस्यथा[9] इति ' तथेति ' तदप्येतर्हि तथैव शस्यते ' यथा षष्ठे पृष्ठ्याहनि[10] कल्पत एव यज्ञः कल्पते यजमानस्य प्रजातिः[11] कथमत्राशस्त एव नाभानेदिष्ठो भवत्यथ वालखिल्याः शंसति ' रेतो वा अग्रे ऽथ प्राणा ' एवं ब्राह्मणाच्छंस्यशस्त एव नाभानेदिष्ठो भवत्यथ वृषाकपिं[12] शंसति ' रेतो वा

---

1) So corr.; प्रस्ययानीति A, D und F?; 2) तद्दत् A, तद्दत् D; 3) So corr.; die hss. प्रस्ययां; 4) तम: F; 5) विचक F; 6) So corr. nach Ait. Br.; die hss. °दिनान्यनीकसीति; 7) So corr.; माध्यंदिनान्यनीयानीति A; °दिन्यं नीयानिति D; माध्यंदिनान्यकीकसीतिगिति F; 8) So corr.; die hss. °त्विदंनु माध्यंदिनं साति; 9) So corr.; die hss. °प्यस्यधा A und F; °प्यस्यध्म D; 10) °हानि A pr. m. und F; 11) प्रजापतिः A pr. m. und F; 12) वृपकपिं D.

अग्रे ऽथात्मा कथमत्र यजमानस्य प्रजातिः[1] कथं प्राणा अवरुद्धा भवन्तीति[2] ' यजमानं वा एतेन सर्वेण ' यज्ञक्रतुना संस्कुर्वन्ति ' स यथा गर्भो योन्यामन्तरेव प्राणानस्यान्तरियाद्यदि वृषाकपिमात्मानमस्यान्तरियाद्यद्येव[3] या संभवञ्छेते ' न ह वै सकृदेवाग्रे सर्वं संभवत्येकैकं वा अङ्गं संभवतः[4] संभवति ' सर्वाणि चेत्समाने ऽहनि क्रियेरन्कल्पत एव यज्ञः कल्पते यजमानस्य प्रजातिरथ[5] हैवैवयामरुतं होता शंसेत्तांस्यास्य[6] प्रतिष्ठा ' तस्यामेवैनमन्ततः[7] प्रतिस्थापयति प्रतिस्थापयति ' ॥ १ ॥

देवक्षेत्रं[8] वै षष्ठमहर्देवक्षेत्रं[9] वा एत[10] आगच्छन्ति ये षष्ठमहरागच्छन्ति ' न वै देवा अन्यो ऽन्यस्य गृहे वसन्ति[11] नर्तुर्ऋतोर्गृहे[12] वसतीत्याहुस्तद्यथायथमृत्विज ऋतुयाजान्यजन्त्यसंप्रदायं ' तद्यदृतून्कल्पयन्ति[13] यथायथं जनिता[14] ' तदाहुर्नर्तुप्रैषैः[15] प्रेष्येयुर्नर्तुप्रैषैर्वषट्कुर्युर्वाग्वा[16]

---

1) प्रजापतिः A pr. m. und F; 2) भवतीति D; 3) °याद्यद्यो वे A sec. m. und D; °याद्यद्रे व A pr. m.; 4) So corr.; die hss. संभवति; fehlt in ed. B. Ind.; 5) प्रजापतिरथ A pr. m. und D; 6) ? ? Ait. Br. °तथास्य; 7) So corr.; die hss. तस्या एवैनमन्तत; 8) देवक्षत्रं D und F; 9) °क्षत्रं D und F; 10) एव A pr. m.; 11) सन्ति D; 12) So corr.; नर्तुर्तों गृहे A; नर्तु ऋतो गृहे D; नर्तुर्तों गृहे F; 13) °ल्पयंति D und F; 14) Sic!; 15) So corr.; die hss. °प्रैषैः; 16) So corr.; die hss. °प्रैषैर्व°.

ऋतुप्रैषा[1] ' आप्यते[2] वै वाक्षष्ठे ऽह्नीति[3] ' यदृतु-
प्रैषैः[4] ° प्रेष्येयुर्यदृतुप्रैषैर्वषट्कुर्युर्वाचमेव[5] तदाप्तां शान्ता-
मृक्तवतीं[6] वहरावणीमृच्छेयुरच्युताद्यज्ञस्य[6] च्यवेरन्यज्ञा-
त्प्राणान्प्रजायाः[7] पशुभ्यो जिह्मा ईयुस्तस्मादृग्मेभ्य[8] एव
प्रेषितव्यमृग्मेभ्यो ऽधि वषट्कृत्यं ' तन्न वाचमाप्तां शान्ता-
मृक्तवतीं[9] वहरावणीमृच्छन्ति[9] ' नाच्युताद्यज्ञस्य च्यवेर-
न्नं[10] यज्ञात्प्राणान्प्रजायाः[11] पशुभ्यो जिह्मा यन्ति ' पारुच्छे-
पीरुपदधति[12] द्वयोः सवनयोः पुरस्तात्प्रस्थितयाज्यानां '
रोहितं[13] वै नामैतच्छन्दो यत्पारुच्छेपमेतेन ह वा इन्द्रः
सप्त स्वर्गाल्लोकानारोहदारोहति[14] सप्त स्वर्गाल्लोकान्य[15]
एवं[16] वेद ' तदाहुर्यत्पञ्चपदा एव पञ्चमस्याह्नो रूपं षट्-
पदाः[17] षष्ठस्याथ कस्मात्सप्तपदाः[18] षष्ठे ऽहनि शस्यन्त[19]
इति ' षड्भिरेव पदैः षष्ठमहरवाप्नुवन्त्यवह्यैवैतदहर्यत्स-

---

